## लेखक के बारे में :




चन्द्रा सर (संस्कृत)
7+ वर्षों का शिक्षण अनुभव (संस्कृत एवं हिंदी विशेषज्ञ)
Founder : Sanskrit Chandra youtube channel and app


Youtube | App | Telegram

Area of Teaching : PGT I TGT I KVS I NVS I BPSC TRE I CTET & TET चंद्रा सर विगत 7 वर्षों से लगातार टीचिंग एग्जाम से जुड़े संस्थानों और अपने यूट्यूब चैनल संस्कृत चंद्रा के माध्यम से लाखों अभ्यर्थियों का मार्गदर्शन कर चुके हैं। चंद्रा सर की संस्कृत और हिंदी भाषा पर इतनी बेहतरीन पकड़ है कि एग्जाम के अधिकतम प्रश्न सर की क्लास और नोट्स से ही रहते हैं जिसके कारण सर से मार्गदर्शन प्राप्त अभ्यर्थी आसानी से अपनी सफलता की कहानी लिखने में सक्षम हो पाते हैं। सर के द्वारा प्रतिदिन अपने यूट्यूब चैनल के माध्यम से बेहतरीन शिक्षा से वंचित छात्र छात्राओं को उनके आगामी परीक्षाओं की मुफ्त तैयारी कराई जाती है।


SUBSCRIBE ON CALL OR WHATSAPP 7985789062


अन्य उपयोगी पुस्तकें




Buy books at great discounts on: www.examcart.in | www.amazon.in/examcart |


AGRAWAL EXAMCART
Paper Pakka Fasega!
CB2052


CTET & STETs
संस्कृत भाषा और शिक्षाशास्त्र
अध्ययन पुस्तक
ISBN - 978-93-6890-035-1
₹ 299


CTET & STETs संस्कृत भाषा और शिक्षाशास्त्र अध्ययन पुस्तक
CB2052
AGRAWAL EXAMCART

SANSKRIT CHANDRA

KNOCKOUT

# CTET & STETs
# संस्कृत भाषा और शिक्षाशास्त्र

(CTET, UPTET, REET, MPTET, BTET, HTET, HPTET, CGTET, JHTET एवं अन्य राज्यों की TET परीक्षाओं के पाठ्यक्रम का समावेश)

(पेपर-1 & 2)
(कक्षा 1 से 5) एवं (कक्षा 6 से 8)

विगत वर्षों के पेपर्स के विश्लेषण चार्ट का समावेश

AGRAWAL EXAMCART
Paper Pakka Fasega!



इस पुस्तक का गहन अध्ययन कराएगा TET परीक्षाओं के अधिकतम प्रश्नों को KNOCK OUT !

# सम्पूर्ण अध्ययन पुस्तक

**पुस्तक की मुख्य विशेषताएं:-**

1. **संपूर्ण थ्योरी** — थ्योरी में CTET एवं अन्य राज्यों की TET परीक्षाओं के सम्पूर्ण पाठ्यक्रम तथा NCERT कक्षा 1 से 8 तक की पाठ्यपुस्तकों का भी समावेश
2. **संपूर्ण शिक्षाशास्त्र** — सम्पूर्ण शिक्षाशास्त्र का सरल भाषा में समावेश
3. **अभ्यास प्रश्न** — अध्यायवार प्रारूप में सर्वोत्तम अभ्यास प्रश्नों का समावेश एवं 2 मॉक टेस्ट



चन्द्रा सर (संस्कृत)


| Code | Price | Pages | ISBN |
|---|---|---|---|
| CB2052 | ₹ 299 | 270 | 978-93-6890-035-1 |

# विषय सूची

## परीक्षा से सम्बन्धित जानकारी (Exam Information)


➔ **परीक्षा से सम्बन्धित महत्वपूर्ण सूचना (Important Information)** v
(CTET परीक्षा की सम्पूर्ण जानकारी एवं पुस्तक या किसी भी समस्या के लिए हमारा Helpline No.)

➔ **पाठ्यक्रम एवं परीक्षा पैटर्न** vii

➔ **विश्लेषण चार्ट** viii
(विगत वर्षों के पेपर्स में कितने प्रश्न हर विषय के अध्याय से पूछे गये, उस का चार्ट)


## संस्कृत भाषा और शिक्षाशास्त्र


| | | |
|---|---|---|
| **1.** | अपठित गद्यांशः | **1-32** |
| **2.** | अपठित पद्यांशः | **33-43** |
| **3.** | संस्कृत साहित्य का संक्षिप्त इतिहास | **44-50** |
| **4.** | संस्कृत साहित्य में भारतीय दर्शन | **51-56** |
| **5.** | भाषा-विज्ञान | **57-61** |
| **6.** | वर्ण-परिचय, संज्ञा प्रकरण | **62-68** |
| **7.** | सर्वनाम, विशेषण, लिंग, वाच्य-ज्ञान एवं धातु रूप | **69-89** |
| **8.** | अव्यय पद | **90-93** |
| **9.** | शब्द-विचार (सुबन्त-प्रकरण) | **94-106** |
| **10.** | सन्धि-प्रकरण | **107-119** |
| **11.** | समास प्रकरणः | **120-129** |
| **12.** | उपसर्ग | **130-131** |
| **13.** | प्रत्यय | **132-144** |
| **14.** | विलोम शब्दः | **145-147** |
| **15.** | पर्यायवाची शब्दः | **148-149** |
| **16.** | समोच्चारित भिन्नार्थक शब्द एवं वाक्य प्रयोग | **150-152** |
| **17.** | विभिन्न वस्तुओं के संस्कृत में नाम (घर, परिवार, परिवेश, पशु, पक्षियों, घरेलू उपयोग की वस्तुएँ) | **153-172** |
| **18.** | शरीर के प्रमुख अंगों के संस्कृत में नाम | **173-175** |
| **19.** | संस्कृत अनुवाद | **176-183** |
| **20.** | अशुद्धि–संशोधनम् | **184-191** |
| **21.** | काव्य प्रकरण : रस, अलंकार व छन्द | **192-203** |
| **22.** | कवियों एवं लेखकों की रचना | **204-205** |
| **23.** | महत्वपूर्ण संस्कृत सूक्तियाँ एवं काव्य पंक्तियाँ | **206-213** |
| **24.** | संस्कृत भाषा शिक्षण | **214-262** |

# अतिरिक्त अध्ययन सामग्री ई-बुक
# (Extra Study Material E-Book)

**Extra Study Material ई-बुक का Content**

- विगत वर्षों (2024) के 5 सॉल्व्ड पेपर्स की ई-बुक
- डिस्काउंट कूपन दिया गया है। उसका उपयोग करें और 'www.examcart.in' से हमारी किताबें सबसे अच्छे डिस्काउंट पर खरीदें।

**नोट :** **Link Expire** होने से पहले दिए गए **QR Code** को स्कैन करके आप यह **Extra Study Material E-Book** को Download कर लें।

## ऐसी पुस्तकें जो कोई आपको बताना नहीं चाहता!

इन अनोखी पुस्तकों ने कई छात्रों को उनके पहले प्रयास में ही परीक्षा पास करने में मदद की है और हम जो कहते हैं, उसे साबित भी करते हैं—इसीलिए हर पुस्तक के कुछ सैंपल चैप्टर दिए गए हैं। हम गारंटी देते हैं कि इन्हें पढ़ने के बाद आपको समझ आएगा कि ये पुस्तकें क्यों सबसे बेहतरीन हैं और क्यों इतने सारे छात्र इनसे सफल हुए हैं।

**नोट**

पढ़ने के लिए, किसी भी पुस्तक के पास दिए गए **QR Code** को स्कैन करें, उसके वेबसाइट पेज पर **"View PDF"** पर क्लिक करें। अगर पुस्तक पसंद आए, तो **Extra Study Material** ई-बुक में दिया गया डिस्काउंट कूपन इस्तेमाल करें और बेहतरीन डिस्काउंट भी पाएँ!




CTET (कक्षा 1 से 5) (Guidebook)




CTET (कक्षा 1 से 5) (Practice Sets)




CTET (कक्षा 1 से 5) (Solved Papers)




CTET (कक्षा 6 से 8) गणित एवं विज्ञान (Guidebook)




CTET (कक्षा 6 से 8) गणित एवं विज्ञान (Practice Sets)




CTET (कक्षा 6 से 8) गणित एवं विज्ञान (Solved Papers)




CTET (कक्षा 6 से 8) सामाजिक अध्ययन (Guidebook)




CTET (कक्षा 6 से 8) सामाजिक अध्ययन (Practice Sets)




CTET (कक्षा 6 से 8) सामाजिक अध्ययन (Solved Papers)

अध्याय
1

# अपठित गद्यांशः

## महत्वपूर्ण अभ्यास प्रश्न

### निर्देश (प्रश्न संख्या 1 से 9 तक)

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

वाग्भटः विख्यातः प्राचीनः वैद्यराजः। सः सिन्धप्रान्ते जन्म अलभत। सः आसीत् पञ्चमे शतके। तेन आयुर्वेदशास्त्रे विपुलं संशोधनं कृतम्। तेन लिखितस्य ग्रन्थस्य नाम–'अष्टाङ्गसंहिता' इति। अद्यापि सः ग्रन्थः प्रमाणभूतः मन्यते। तिबेटतः रामेश्वरपर्यन्तं तस्य कीर्तिः प्रसृता। एतं ग्रन्थम् अधिकृत्य अद्य यावत् 29 भाष्यविवरणग्रन्थाः प्रसिद्धाः सन्ति।

एकदा धन्वन्तरिः व्यचिन्तयत्–पृथिवीतले विद्यमानानां विविधानां वैद्यानां परीक्षा करणीय।' इति। अतः तेन शुकस्य रूपं धृतम्। सः एकम् एव प्रश्नं त्रिवारम् उच्चार्य वैद्यान् पृष्टवान्। सः प्रश्नः आसीत्–'कोऽरुक्? कोऽरुक् ? कोऽरुक् ?' (क : आरोग्यसम्पन्नः भवति इत्यर्थः)

वैद्याः विविधानि उत्तराणि दत्तवन्तः केचन तु सुदीर्घम् उत्तरं दत्तवन्तः। किन्तु कस्यापि उत्तरेण धन्वन्तरिः न सन्तुष्टः।

अन्ते शुकः वाग्भटं प्रति आगतः। वाग्भटः स्नानार्थं नदीतीरं गच्छति स्म। शुकरूपधारी धन्वन्तरिः मार्गे स्थितस्य एकस्य वृक्षस्य शाखायाम् उपविष्टः। तेन वाग्भटाय त्रिवारं प्रश्नः कृतः –'कोऽरुक ? कोऽरुक् ? कोऽरुक् ?

वाग्भटेन ज्ञातं यत् एषः न सामान्यः पक्षी इति। सः पक्षिणं नमस्कृतवान्। पक्षिणे सत्काररूपेण फलानि तेन अर्पितानि।

शुकः अवदत्–''आदौ उत्तरं दातव्यम्। यदि उत्तरं तृप्तिकरं स्यात् तार्हि एवं अहम् उपाहारं स्वीकरिण्यामि'' इति।

वाग्भटः क्षणमात्रं चिन्तितवान्। त्रयाणां प्रश्नानाम् एकम् एव उत्तरं सः दत्तवान्–''हितभुक्, मितभुक् उष्णभुक्'' इति। तस्य आशयः–आहारः हितकारः मितरूपः उष्णः च भवेत् इति।,

वाग्भटस्य उत्तरेण शुकः सन्तुष्टः अभवत्। सः उपाहारं स्वीकृत्य ततः निरगच्छत्।

**1.** कोऽरुक् इति अत्र सन्धिच्छेदः कथम्?
(A) कोरुक् (B) को अरुक्
(C) कः रुक् (D) कः अरुक्

**2.** हितभुक् मितभुक् उष्णभुक् अति वाक्ये मितशब्दस्य अर्थः
(A) सूर्यः (B) अल्पम्
(C) विशिष्टम् (D) मित्रम्

**3.** वैद्यपरीक्षायां कः उत्तीर्णः अभवत् ?
(A) वाग्भटः (B) शुकः
(C) चरकः (D) धन्वन्तरिः

**4.** तिब्बतदेशात् रामेश्वरपर्यन्तं कस्य प्रसिद्धिः आसीत् ?
(A) क्षपणकस्य (B) शुश्रुतस्य
(C) वाग्भटस्य (D) धन्वन्तरेः

**5.** उष्णभुक् इति समस्तपदस्य विग्रहः कथं स्यात्?
(A) उष्णं भोजयति इति
(B) उष्णं भुक्तम् इति
(C) उष्णेन भुक्
(D) उष्णं भुङ्क्ते इति

**6.** कस्मिन् क्षेत्रे वाग्भटः प्रसिद्धः आसीत्?
(A) कृषिक्षेत्रे (B) वाणिज्यक्षेत्रे
(C) वैद्यकीयक्षेत्रे (D) व्याकरणक्षेत्रे

**7.** अष्टाङ्गसंहिता इति कस्य शास्त्रस्य ग्रन्थः?
(A) गणितशास्त्रस्य (B) वैद्यकीयशास्त्रस्य
(C) व्याकरणशास्त्रस्य (D) दर्शनशास्त्रस्य

**8.** अष्टाङ्गसंहिताग्रन्थाधारेण कति भाष्यविवरणग्रन्थाः प्रसिद्धाः ?
(A) नवविंशतिः (B) एकोनविंशतिः
(C) नव (D) नवतिः

**9.** वैद्यानां परीक्षां कर्तुं धन्वन्तरिणा कस्य रूपं धृतम्।
(A) शुकस्य (B) शुनः
(C) कीटस्य (D) मनुष्यस्य

### निर्देश (प्रश्न संख्या 10 से 18 तक)

अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां विकल्पात्मकोत्तरेभ्य उचितमम् उत्तरं चित्वा लिखत।

पावनसलिला नर्मदा अस्माकं प्रदेशस्य जीवनदायिनी सरित् अस्ति। एषा एव रेवा इति नाम्नापि प्रसिद्धा। अस्याः तटे अनेकानि तीर्थस्थानानि सन्ति प्राचीनकालादेव अस्याः तटे तपस्विनां स्थानानि सन्ति, अतः नर्मदायाः परिक्रमणं कृत्वा जनाः आत्मानं धन्यं मन्यन्ते। अत्रत्यं नैसर्गिकं सौन्दर्यं दर्शनीयम्।

अनूपपुरमण्डले अमरकण्टकं नाम पर्वतोऽस्ति। तत एव नर्मदा प्रादुर्भवति। तदनन्तरम् एषा गहनेषु अरण्येषु उत्तुङ्गपर्वतेषु भ्रमणं कुर्वती डिण्डोरीमण्डलं प्रविशति। डिण्डोरीतः सर्पाकारगत्या उच्चावचमार्गेण महाराजपुरं प्राप्नोति, ततः जाबालिपुरम् आगच्छति। श्वेतशिलाखण्डानां कृते प्रसिद्धे भेडाघाटनामके स्थाने धूआँधारजलप्रपातस्वरूपं धारयति। तदवलोकनार्थं बहवाः पर्यटकाः अत्र आगच्छन्ति।

नर्मदा नद्यामेव बरगी–इन्दिरासागर– सरदारसरोवरादयः बन्धाः निर्मिताः सन्ति। एभिः बन्धैः विद्युदुत्पादनं भूमिसेचनं, जलपरिवहनं, अभयारण्यनिर्माणम् पर्यटनस्थलनिर्माणम् इत्यादयो विविधलाभाः भवन्ति।

**10.** डिण्डोरी–स्थानात् इत्यस्य कृते कः शब्दः अनुच्छेदे प्रयुक्तः? तच्चित्वा लिखत
(A) कावेरीतः (B) मनोहरस्यगृहतः
(C) डिण्डोरीतः (D) मेहरौलीतः

**11.** 'तद्द्रष्टुम्' इत्यस्य कृते कः शब्दः अनुच्छेदऽस्मिन् प्रयुक्तः।
(A) आकाशात् पतितम्
(B) केशवं प्रति
(C) तदवलोकनार्थम्
(D) तस्मात् भीतः

**12.** 'उत्तुङ्गपर्वतेषु' पदे का विभक्तिः?
(A) चतुर्थी (B) तृतीया
(C) प्रथमा (D) सप्तमी

**13.** 'बन्धाः' इति पदे किं वचनम्?
(A) एकवचनम् (B) द्विवचनम्
(C) बहुवचनम् (D) शृगालवचनम्

**14.** का जीवनदायिनी सरित् अस्ति?
(A) केलिका (B) मल्लिका
(C) छाता (D) नर्मदा

**15.** जनाः किं कृत्वा आत्मानं धन्यं मन्यन्ते?
(A) आकण्ठं भोजनं कृत्वा
(B) तटे शयनं कृत्वा
(C) नर्मदायाः परिक्रमणं कृत्वा
(D) खर्जूरवृक्षमारुह्य

**16.** 'उद्भवति' पदस्य समानार्थकशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः। तच्चित्वा लिखत।
(A) नृत्यं करोति (B) सम्मोहितं करोति
(C) वेगेन धावति (D) प्रादुर्भवति

**17.** नर्मदायाः अपरं नाम अपि अनुच्छेदे प्रयुक्तः तच्चित्वा लिखत।

(A) तटम् (B) सिंही
(C) सुता (D) रेवा

**18.** अमरकण्टकं नाम पर्वतः कुत्र अस्ति?
(A) अनूपपुरमण्डले
(B) शृगालस्य गुहायाम्
(C) नूपुरमण्डले
(D) प्रभामण्डले

**निर्देश (प्रश्न संख्या 19 से 27 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्य उचिततमम् उत्तरं चित्वा लिखित–

पुरा वृत्रासुरः देवान् भृशमपीडयत्। इन्द्रादयः देवाः प्रजापतिमुपागच्छन्। तान् प्रजापतिः आगमनस्य कारणम् अपृच्छत देवाः अवदन्। प्रभो ! वृत्रासुरः अस्मान् पीडयति। तस्य शक्तेः समक्षं वयं स्थातुं न शक्नुमः। प्रजापतिः अभणत्–हरिः एव अस्मान् रक्षितुं समर्थः। तमेव शरणं गच्छामः। देवैः साकं वैकुण्ठं गत्वा प्रजापतिः सर्वं वृत्तान्तं न्यवेदयत्। तत् श्रुत्वा हरिः अकथयत्–भोः प्रजापते ! देवाः महर्षेः दधीचेः अन्तिकं गत्वा तस्मात् अस्थियाचनं कुर्वन्तु। तस्य अस्थिभिः वज्रायुधं घटयत। तेन वृत्रासुरं हन्तुम् असुरान् च जेतुं पारयिष्यथ।

ततः सर्वे देवाः दधीचेः तपोवनमगच्छन्। तस्य तपोवनं कपीनां क्रीडाभिः हरिणानां विहारैः अलीनां गुञ्जनैः च रमणीयम् आसीत्। देवाः दधीचेः आश्रमं प्राविशन्। तत्र ऋषिभिः परिवृतम् देदीप्यमानं दधीचिम् अपश्यम्।

**19.** अस्थिभिः किम् घटयत?
(A) गदायुधम् (B) गोलायुधम्
(C) गुटिकाम् (D) वज्रायुधम्

**20.** वानराणाम् इति पदस्य पर्यायशब्दः अत्रानुच्छेदे प्रयुक्तः। तच्चित्वा लिखत
(A) हरिणानाम् (B) नदीनाम्
(C) अलीनाम् (D) कपीनाम्

**21.** 'वृत्रासुरं हन्तुम् असुरान् च जेतुं पारयिष्यथ' इति प्रजापतिं कः उक्तवान्?
(A) हरिः (B) वृत्रासुरः
(C) दधीचिः (D) ऋषिः

**22.** देवान् कः अपीडयत्?
(A) कीलनाख्या नदी (B) पर्वतशिखरः
(C) वृत्रासुरः (D) निम्बवृक्षः

**23.** तुमुन् प्रत्ययान्तशब्दः कः?
(A) सिंहासनम् (B) प्रजापतिः
(C) काण्डम् (D) स्थातुम्

**24.** असमर्थः इति पदस्य विलोमशब्दः अनुच्छेदे प्रयुक्तः तच्चित्वा लिखत–
(A) समर्थः (B) श्रीकण्ठः
(C) बिल्वपत्रम् (D) अमृतापत्रम्

**25.** 'क्त्वा' प्रत्ययान्तपदं चित्वा लिखत–
(A) श्रुत्वा (B) गन्तुम्
(C) हन्तुम् (D) जेतुम्

**26.** 'प्रवेशं कृतवन्तः' इति पदस्य पर्यायशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः। तच्चित्वा लिखत–
(A) जघान (B) अपठन्
(C) अपतम् (D) प्राविशन्

**27.** देवाः कैः परिवृतं देदीप्यमानं दधीचिम् अपश्यम्?
(A) जलैः (B) अग्निभिः
(C) फलैः (D) ऋषिभिः

**निर्देश (प्रश्न संख्या 28 से 36 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

पुरा एकस्मिन् वृक्षे एका चटका प्रतिवसति स्म। कालेन तस्याः सन्ततिः जाता । एकदा कश्चित् प्रमत्तः गजः तस्य वृक्षस्य अधः आगत्य तस्य शाखां शुण्डेन अत्रोटयत्। चटकायाः नीडं भुवि अपतत्। तेन अण्डानि विशीर्णानि। अथ सा चटका व्यलपत्। तस्याः विलापं श्रुत्वा काष्ठकूटः नाम खगः दुःखेन ताम् अपृच्छत्–''भद्रे किमर्थं विलपसि ?'' इति।

चटकावदत्–''दुष्टेनैकेन गजेन मम सन्ततिः नाशिता। तस्य गजस्य वधेनैव मम दुःखम् अपसरेत्।'' ततः काष्ठकूटः तां वीणारवा–नाम्न्याः मक्षिकायाः समीपम् अनयत्। तयोः वार्तां श्रुत्वा मक्षिकावदत् – ''ममापि मित्रं मण्डूकः मेघनादः अस्ति। शीघ्रं तमुपेत्य यथोचितं करिष्यामः।'' तदानीं तो मक्षिकया सह गत्वा मेघनादस्य पुरः सर्वं वृत्तान्तं न्यवेदयताम्।

**28.** वृक्षे का प्रतिवसति स्म ?
(A) हंसी (B) एका
(C) चटका (D) कोकिला

**29.** गजः शाखां केन अत्रोटयत् ?
(A) दुःखेन (B) शुण्डेन
(C) आयुधेन (D) पादेन

**30.** मेघनादः कः अस्ति ?
(A) प्रमत्तः (B) मण्डूकः
(C) खगः (D) मित्रम्

**31.** चटकायाः किं भुवि अपतत् ?
(A) अन्नम् (B) नीडम्
(C) हिरण्यम् (D) वस्त्रम्

**32.** गजः कीदृशः आसीत् ?
(A) प्रमत्तः (B) दुःखितः
(C) गर्वितः (D) बलिष्ठः

**33.** गजेन कानि विशीर्णानि ?
(A) फलानि (B) पुष्पाणि
(C) कुण्डानि (D) अण्डानि

**34.** 'विशीर्णानि' – पदस्य अर्थः अस्ति–
(A) अण्डानि (B) नष्टानि
(C) सञ्चितानि (D) प्राप्तानि

**35.** 'अधः' इति पदस्य विलोमपदं भवति–
(A) नीचैः (B) पार्श्वे
(C) भुवि (D) उपरि

**36.** 'करिष्यामः' इति पदे लकारः अस्ति–
(A) लट् लकारः (B) लोट् लकारः
(C) लृट् लकारः (D) लङ् लकारः

**निर्देश (प्रश्न संख्या 37 से 45 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखतः

पुरा एकस्मिन् स्थाने द्वे नार्यौ वसतः स्म। तयोः परस्परं महती प्रीतिः।

कालान्तरे तयोः मध्ये एकस्य पुत्रस्य विषये महान् कलहः अजायत।

सरला–अयं मम पुत्र इति सक्रोधम् उद्घोषयति। विमला–न अयं तव, अपितु अयं मम पुत्र इति तारस्वरेण प्रतिवदति। इत्थं च क्रमेण तयोः कलहः चरमावस्थां गतः। अथ विवादे पराकाष्ठं गते द्वे अपि न्यायालयं गतवत्यौ। तयोः वक्कीलौ स्व–स्वपक्षं न्यायाधीशस्य समक्षं सप्रमाणं प्रस्तुतवन्तौ। न्यायाधीशः उभयमपि पक्षं समम् अश्रुतपूर्वकं च ज्ञात्वा किंकर्तव्यविमूढः सञ्जातः। सः प्रारम्भे अकथयत् सर्वप्रथमम् अयं बालकः कया सह अधिकां प्रसन्नताम् अनुभवति इति ज्ञातव्यम् सः तु उभाभ्यां सह प्रथमः दृश्यते इति ज्ञात्वा न्यायाधीशः निर्णेतुं न समर्थः यत् अयं वस्तुतः कस्याः पुत्रः।

अधिकं सूक्ष्मं विचिन्त्य न्यायाधीशः अवदत् यत् मया उभयः पक्षः श्रुतः। साम्प्रतं निर्णयं सावधानतया शृण्वन्तु। बालकं प्रति भवत्योः समाना स्नेहमयी च प्रीतिः। अतः इमं बालकं विभज्य अर्धम् अर्धं स्वीकुरुताम्। इमं निर्णयं श्रुत्वा विमला प्रसन्ना अभवत्। सरला तु मूर्च्छिता सती तत्क्षणमेव भूमौ अपतत्। सा नामाविधैः उपचारैः अर्धघण्टानन्तरं चेतनां लब्धवती।

ततः च सा करौ प्रसार्य बहुविह्वला, अश्रुधाराभिः रुदती न्यायाधीशं प्रार्थयत्–मान्याः! मोहनस्य रोमांशच्छेदनमपि मम प्राणच्छेदनसमम् अतिदुःखकरं भविष्यतिः। भवन्तम् अस्य बालकस्य अहं जीवनं याचे। दीयताम् इमं बालकं विमलायै, यस्यै कस्यै वा इत्यत्र न मदीयः कोऽपि दुराग्रहः, किन्तु येन बालकः अयं स्वस्थः, सुखी, चिरायुः च भवेत् तथैव भवद्भिः कर्तव्यम्।

क्षणेन मौनं त्यक्त्वा न्यायाधीशः स्वनिर्णयम् अघोषयत्–वस्तुतः सरलायाः ममत्वं स्वाभाविकं, तस्याः मूर्च्छा च नैसर्गिकी, अतः सरलैव मोहनस्य माता, इत्येव अस्य वादस्य निर्णयः। विमलायाः पक्षः न विचरयोग्यः। एवं न्यायाधीशस्य बुद्धिवैभवेन सरला स्वपुत्रं पुनः प्राप्य बहुप्रसन्ना अभवत्।

**37.** 'नारी' इति पदस्य पर्यायो भवति
(A) पनसः (B) जम्बुकः
(C) पुरुषः (D) महिला

**38.** गद्यांशेऽस्मिन् 'उच्चस्वरेण' इति पदस्य कृते कः शब्दः प्रयुक्तः ?
(A) तारस्वरेण (B) मन्दस्वरेण
(C) चौरेण (D) संन्यासिना

**39.** सरलाविमलयोः मध्ये कस्मिन् विषये कलहः अजायत ?

(A) पुत्रविषये (B) चित्रविषये

(C) वस्त्रविषये (D) रोटिकाविषये

**40.** विवादस्य निर्णयाय ते कुत्र गतवत्यौ ?

(A) स्वभवनम् (B) नदीतीरम्

(C) आपणम् (D) न्यायालयम्

**41.** 'बालकं विभज्य अर्धम् अर्धं स्वीकुरुताम्'' इति कः अवदत् ?

(A) सरला (B) द्वारपालः

(C) न्यायाधीशः (D) विमला

**42.** ''अहम् अस्य बालकस्य जीवनं याचे'' इति का अवदत् ?

(A) कपोतः (B) काकः

(C) न्यायाधीशः (D) सरला

**43.** अनुच्छेदेऽस्मिन् 'दीर्घायुः' इति पदस्य कृते किं पदं प्रयुक्तम् ?

(A) चिरायुः (B) गोमायुः

(C) अल्पायुः (D) वृक्षायुः

**44.** न्यायाधीशस्य निर्णयेन सरला कस्य वास्तविकी माता ?

(A) सुकर्णस्य (B) सुयोधनस्य

(C) मोहनस्य (D) द्वारपालस्य

**45.** बहुप्रसन्ना इति पदस्य विलोमपदं भवति :

(A) बहुभोजी (B) बहुभाषिणी

(C) बहुदुःखी (D) बहुसुखी

## निर्देश (प्रश्न संख्या 46 से 54 तक)

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

जीवने अन्नापेक्षया जलस्य अधिकं महत्त्वमस्ति। अत एव जलस्यापरं नाम 'जीवनम्' इति सङ्गच्छते। अस्माकं देशः कृषिप्रधानः। देशस्यौद्योगिकः, आर्थिकः भौतिकश्च विकासः कृषिमवलम्ब्यैव तिष्ठति। कृषेः विकासाय जलमावश्यकम्। वृष्टिजलेन, नदीजलेन, प्रपातजलेन, कूपजलेन तडागजलेन वा कृषेः सेचनं भवति। ये च देशाः नदीजलेन सस्यसम्पन्नाः भवन्ति ते नदीमातृकाः। अस्माकं स्नानाय, पानाय सस्यसेचनाय च नद्यः जलं वितरन्ति। नदीषु तत्र तत्र सेतुं बध्वा जलसञ्चयं च कृत्वा जनाः कुल्याद्वारा सञ्चितं जलं सुदूरं नयन्ति। तेन च क्षेत्राणि सिञ्चन्ति। काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी इति प्रार्थना जलस्य महत्त्वं सूचयति। न हि शक्नुवन्ति जलं बिना जीवितुं तृणान्यपि। तृणादीनि च धेन्वादीनां पशूनामाहाराः भवन्ति।

प्रायेण नदीतीरेष्वेव महानगराणि विकासमु–पगच्छन्ति। नानाप्रकाराः उद्योगाः अपि तत्रैव स्थापिताः विकसिताः च। जलमार्गेण संचारस्य सौकर्यमपि मानवजीवनं सुखमयं करोति। अत एव नदीतटेषु जनानां वासस्थानानि आधिक्येन सन्ति। सर्वप्रकाराणामुद्योगानां विकासः विद्युतः शक्तिम् अपेक्षते। तां विना कोऽपि उद्योगः अधिकोत्पादनक्षमो लाभप्रदो वा न भवति। प्रकाशाय तस्याः उपयोगः सर्वविदितः। सा च शक्तिः स्वाभाविकैः कृतकैः वा जलप्रपातैः निरायासमुत्पाद्यते। अतः जलं विद्युदुत्पादनेऽपि सहायकं भवति। एवं च नद्यः राष्ट्रजीवनं सर्वसम्पन्नं कुर्वन्ति। अतः भारतीयाः निग्रहे अनुग्रहे च इमाः देवताः मन्यन्ते। पुरातनाः महर्षयस्तु जलस्य महत्त्वं ज्ञातवन्तः आसन्। अत एव ते शिवाः आपः सन्तु इति प्रार्थयन्त।

**46.** जीवने अन्नापेक्षया कस्य अधिकं महत्त्वम् अस्ति ?

(A) जलस्य (B) पत्रस्य

(C) पुष्पस्य (D) मूलस्य

**47.** जलस्य अपरं नाम किम् ?

(A) चरणौ (B) वस्त्रम्

(C) आभूषणम् (D) जीवनम्

**48.** ''जलम्' इति पदस्य पर्यायो भवति

(A) समीपम् (B) दुग्धम्

(C) नीरम् (D) दूरम्

**49.** 'एकत्रीकृतम्' इति पदस्य कृते गद्यांशेऽस्मिन् कः शब्दः प्रयुक्तः ?

(A) आनीतम् (B) सञ्चितम्

(C) वितरितम् (D) दत्तम्

**50.** तृणादीनि केषाम् आहारः भवन्ति ?

(A) मत्स्यानाम्

(B) पशूनाम् (धेन्वादीनाम्)

(C) पक्षीणाम् (काकादीनाम्)

(D) सर्पाणाम्

**51.** उद्योगानां विकासः किम् अपेक्षते ?

(A) पीतशक्तिम् (B) विद्युतः शक्तिम्

(C) वृक्षशक्तिम् (D) पुष्पशक्तिम्

**52.** 'सर्वविदितः' पदस्य पर्यायो भवति

(A) सर्वैः ज्ञातः (B) मया ज्ञातः

(C) त्वया ज्ञातः (D) मात्रा ज्ञातः

**53.** नद्यः राष्ट्रजीवनं कथं कुर्वन्ति ?

(A) सिद्धिरहितम् (B) पर्वतम्

(C) सर्वसम्पन्नम् (D) लक्ष्यविहीनम्

**54.** परिच्छेदे 'कृतकैः' इति प्रयुक्तपदस्य अभिप्रायः

(A) प्राकृतिकैः (B) नवीनैः

(C) प्राचीनैः (D) निर्मितैः

## निर्देश (प्रश्न संख्या 55 से 63 तक)

अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां विकल्पात्मकोत्तरेभ्यः समुचितम्। उत्तरं चित्वा लिखत।

अनादिकालात् प्रचलन्त्याम् अस्माकं परम्परायां बहवः वैदिकाः ऋषयः अभवन्। महर्षिः वसिष्ठः महर्षि विश्वामित्रः च वैदिककालीनौ ऋषी आस्ताम्। उचिते वयसि यथोचितं व्रतं पालयन्तौ तौ महान्तौ तपस्विनौ अभवताम्। योग्याद् गुरोः स्वाध्यायम् अधीयानौ तौ ज्ञानिनौ सञ्जातौ। एव तयोः उभयोः पार्श्वे तु ज्ञानस्य भण्डार एव आसीत्।

अनयोः महर्षिः विश्वामित्रः स्वभावेन क्रोधी आसीत्। परन्तु उग्राणि तपांसि समाचरता तेन ब्रह्मर्षिषु स्थानं प्राप्तम्। प्रसिद्धिं गायत्री–मंत्र समाजाय प्रयच्छता तेन अचिरात् प्रसिद्धिः लब्धा। जपतः जनान् अभीष्टफलं प्रददती गायत्रीलोके कामधेनुरूपेण प्रसिद्धं प्राप्तवती। मुक्तिं कामयमानैः जनैः गायत्री–मन्त्रस्य शक्त्या भास्वतः सूर्यदेवात् सद्बुद्धि प्रार्थ्यते।

महर्षिः वसिष्ठः सततं ब्रह्म उपासीनः महतीं सिद्धिं प्राप्तवान्। वसिष्ठेन मृत्युं वशीकुर्वतः महामृत्युञ्जयमन्त्रस्य रचना कृता। एकदा सतसङ्ग तपश्चरणयोः मध्ये कतरः श्रेष्ठः इति विषये विवादः अभवत्। वसिष्ठः सत्सङ्गस्य पक्षे आसीत्। विश्वामित्रस्यः तु स्वतपस्यायाम् अभिमानः आसित। परस्परं विवदमानयोः एतयोः विवादे असमाहिते च तौ क्षीरसागरे भगवतः शेषनागस्य सविधे निर्णयार्थम् अगच्छताम्। शेषनागः द्वयोर्मध्य सत्सङ्गः एव श्रेयान् इत्युक्त्वा विवादस्य समाधानं कृतवान्।

**55.** गद्यांशे 'अस्माकं परम्परायाम्' इत्यस्य कः अर्थः ?

(A) सामाजिक–परम्परायाम्

(B) पाश्चात्य–परम्परायाम्

(C) वैदिक–परम्परायाम्

(D) भारतीय–परम्परायाम्

**56.** ज्ञानस्य प्राप्त्यै कस्य अपेक्षा भवति ?

(A) योग्य–गुरोः

(B) उपयुक्तवातावरणस्य

(C) पाठ्यपुस्तकस्य

(D) पाठ्यसामग्रीणाम्

**57.** विश्वामित्रेण महर्षेः पदं कथं लब्धम् ?

(A) गायत्रीमन्त्रबलेन (B) उग्रेण क्रोधेन

(C) उग्रेण तपसा (D) उग्रेण ब्रह्मबलेन

**58.** विश्वामित्रस्य प्रसिद्धेः किं कारणमासीत्?

(A) गायत्रीमन्त्रस्य जपनम्

(B) क्रोधयुक्तः स्वभावः

(C) उग्राणि तपांसि

(D) गायत्रीमन्त्रस्य उपायनम्

**59.** 'तपांसि' समाचरता विश्वामित्रेण किं प्राप्तम् ?

(A) गोधूमम् (B) धनम्

(C) वस्त्रम् (D) ब्रह्मर्षिषु स्थानम्

**60.** वसिष्ठेन कस्य रचना कृता?

(A) कामधेनुमन्त्रस्य

(B) गायत्रीमन्त्रस्य

(C) महामृत्युंजयमन्त्रस्य

(D) सूर्योपासनामन्त्रस्य

**61.** विवादस्य विषयः कः आसीत् ?

(A) सूर्य–निशाकरयोः कतरः श्रेष्ठः

(B) विश्वामित्र–वसिष्ठयोः कतरः श्रेष्ठः

(C) गायत्री–सूर्ययोः कतरः श्रेष्ठः

(D) सत्संगतपश्चरणयोः कतरः श्रेष्ठः

**62.** सततं पदस्य पर्यायः अस्ति–

(A) निरन्तरम् (B) प्रथमतया

(C) श्वः (D) अधुना

**63.** विवादस्य समाधाने कः श्रेयान् ?

(A) विष्णुः (B) विश्वामित्रः

(C) सत्सङ्गः (D) वसिष्ठ

**निर्देश (प्रश्न संख्या 64 से 69 तक)**

निम्नलिखितानुच्छेदाधारितानां प्रश्नानां समुचितम् उत्तरं चिनुत–

अथ एकदा भगवान् बोधसत्त्वः बहुजन्मार्जित– पुण्यफलैः शिवीनां राजा बभूव। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्। जनकल्याण ाकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य–औदार्यसद्गुणोपेतः स नगरस्य समन्ततः धन–ध ान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न–पान–वसन–रजत–सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशदेशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसङ्ख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।' एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

**64.** 'परितः' इति अर्थे अत्र किं पदं प्रयुक्तम्?

(A) समन्ततः (B) नगरात्

(C) सकलम् (D) विचरन्

**65.** के दानवीराः सौभाग्यशालिनः?

(A) ये शरीराङ्गानि अति दातुम् अवसरं प्राप्नुवन्तिः

(B) दानं दातुं सर्वदा उत्साहिनः ये

(C) ये याचकेभ्यः प्रभूतं धनं यच्छन्ति

(D) यैः सह प्रभूतं धनम् अस्ति

**66.** राजा किं दृष्ट्वा चिन्तनशीलः अभवत्?

(A) याचकानां न्यूनसङ्ख्याम्

(B) अन्यदेशयाचकान्

(C) विशालजनसमूहम्

(D) याचकानां धनप्राप्त्यर्थं लोभम्

**67.** जनाः अभीष्टानि वस्तूनि कुतः प्राप्नुवन्ति स्म?

(A) सुवर्णापणतः (B) नगरतः

(C) दानशालातः (D) अन्नशालातः

**68.** 'विज्ञाय' पदे प्रत्ययः अस्ति–

(A) णिच् (B) ल्यप्

(C) ण्यत् (D) यत्

**69.** "अथ एकदा भगवान् .....बभूव" वाक्ये कर्तृपदम् अस्ति–

(A) भगवान् (B) पुण्यफलैः

(C) राजा (D) शिवीनाम्

**निर्देश (प्रश्न संख्या 70 से 78 तक)**

निम्नलिखितानुच्छेदाधारितानां प्रश्नानां समुचितम् उत्तरं चिनुत–

एकदा स्वातिनामकः मुनिः पिपासया पिडितोऽभवत्। जलमूलम् अन्विष्यता तेन कश्चन आह्लादकरः शब्दः श्रुतः। तम् अनुसृत्य स अग्रे गतः। तत्र कुत्रचित् पर्वतात् पतन्तः जलबिन्दवः शुष्कपर्णानाम् उपरि पतित्वा मधुरं संगीतं जनयन्ति स्म। एतद् अवगत्य प्रेरितः सः तृषाकुलतां विस्मृत्य वेगेन आश्रमम् आगतवान्। सङ्गीतसाधनेषु प्रतिध वनेः उत्पादनार्थं यः सूक्ष्मक्रमः आवश्यकः तम् अन्विष्टवान् सः। एवं यत् सङ्गीतसाधनं निर्मितवान् तस्य नाम मृदङ्ग इति।

एषा कथा भरतमुनेः नाट्यशास्त्रे वर्णिता। प्रतिध्वनिविज्ञानं विना सङ्गीतसाधनानां निर्माणम् असाध्यम् वर्तते। न केवलं सङ्गीतशास्त्रे अपितु गणितशास्त्रे, भौतिके, रसायने, जीवविज्ञाने, आयुर्वेदे, धनुर्वेदे, भूविज्ञाने, खगोलविज्ञाने, नक्षत्रविज्ञाने, धातुविज्ञाने, रत्नविज्ञाने, विमानविज्ञाने वास्तुविज्ञाने, शिल्पविज्ञाने, किं बहुना, सैन्यविज्ञानेऽपि गभीराध्ययनं कृत्वा अभूतपूर्वाः सिद्धयः सम्प्राप्ताः।

महर्षिपराशररचितवृक्षायुर्वेदे वृक्षाणां पर्णेः

क्रियमाणाः विविधाः क्रियाः वर्णिताः यथा प्रकाशनिस्सारण प्रक्रिया, पर्णस्य अवान्तरभागाः, पर्णकणेषु स्थितः प्लाज्मा, बीजनिर्माणमादयः। रेखागणिते यः सिद्धान्तः 'पाइथोगोरस' इति नाम्ना विख्यातः, मूलतः सः सिद्धान्तः बोधायनाचार्येण शुल्बसूत्रेषु पूर्वमेव निरूपितः।

**70.** मधुर–सङ्गीतोत्पादनस्य कारणम् आसीत्

(A) जलमूलम्

(B) जलवेगः

(C) शुष्कपर्णोपरि पतिताः जलबिन्दवः

(D) आह्लादकरः शब्दः

**71.** 'मृदङ्ग' इति सङ्गीतसाधनस्य आविष्कारकः अस्ति–

(A) स्वातिनामकः मुनिः

(B) भरतमुनिः

(C) महर्षिपराशरः

(D) बोधायनाचार्यः

**72.** सङ्गीतसाधनानां निर्माणार्थम् अत्यावश्यकम् अस्ति–

(A) गणितशास्त्रे सिद्धिः

(B) प्रतिध्वनिविज्ञानस्य ज्ञानम्

(C) सङ्गीतशास्त्राध्ययनम्

(D) भौतिकशास्त्रज्ञानम्

**73.** बीजनिर्माण–प्रक्रियासम्बद्धं वर्णनं प्राप्यते–

(A) वृक्षायुर्वेदे (B) जीवविज्ञाने

(C) नाट्यशास्त्रे (D) सङ्गीतशास्त्रे

**74.** रेखागणित–सम्बद्धः 'पाइथोगोरस' इति सिद्धान्तः मूलतः दृश्यते–

(A) नाट्यसूत्रेषु

(B) भौतिकविज्ञानसूत्रेषु

(C) गणितसूत्रेषु

(D) शुल्बसूत्रेषु

**75.** "न केवलं सङ्गीतशास्त्रे......... गभीराध्ययनं ......... सिद्धयः सम्प्राप्ताः" इति वाक्ये कर्मपदम् अस्ति–

(A) गभीरम् (B) सम्प्राप्ताः

(C) सिद्धयः (D) अध्ययनम्

**76.** "यत् सङ्गीतसाधनं निर्मितवान् .......... " वाक्ये 'निर्मितवान्' क्रियापदस्य कर्तृपदम् अस्ति–

(A) स्वातिः मुनिः (B) भरतमुनिः

(C) मृदङ्ग (D) यत्

**77.** अत्र 'अभूतपूर्वाः' इति पदम् अस्ति–

(A) क्रियापदम्

(B) सर्वनामपदम्

(C) विशेषणपदम्

(D) विशेष्यपदम्

**78.** 'जनयन्ति स्म' इति क्रियाप्रयोगः अस्ति–

(A) भूतकालार्थे (B) लृट्लकारे

(C) वर्तमानकाले (D) विधि–सन्दर्भे

**निर्देश (प्रश्न संख्या 79 से 87 तक)**

अधोलिखितं गद्यांशं पठित्वा तदनन्तरं प्रदत्तप्रश्नानां विकल्पात्मकोत्तरेषु समुचितम् उत्तरं चित्वा लिखत।

कस्मिंश्चिदरण्ये वसति स्म कोऽपि सिंहः। पर्वतस्य गुहायां सः दिवा अस्वपत् रात्रौ च बने इतस्ततः परिभ्रमन् पशूनभक्षयत्। कदाचित् प्रभूतमाहारं कृत्वा अयं सिंहः कस्यचित् वृक्षस्य छायायां सुखेन अस्वपत् ततः बहवः मूषकाः बिलात् निर्गत्य सानन्दं सिंहस्य शरीरे अनृत्यन् इतस्ततः। तेन पीड़ितः सिंहः प्रबुद्धः अभवत्। तं प्रबुद्धं दृष्ट्वा पलायन्ते सर्वे मूषकाः बिलम्। तेषां कमपि मूषकमगृह्णात् सिंहः करतलेन। तदा सः मूषकः आर्तस्वरेण भो महाराज! त्वं किल पशूनां राजा। प्रसिद्धः तव पराक्रमः। अहं तु शुद्रः जन्तुः। मम अपराधं तावत् क्षमस्व। मां मा जहि। मयि दयां कुरु। कदाचिदहं करिष्यामि तव साहाय्यम्।' इति। एतद् तस्य आर्तवचनं श्रुत्वा सिहः तममुञ्चत्।

**79.** मूषकाः कुतः निर्गच्छन्ति स्म ?

(A) बिलात् (B) गुहातः

(C) वनात् (D) वृक्षमूलात्

**80.** मूषकाः कुत्र नृत्यन्ति स्म ?

(A) बिले (B) सिंहस्य शरीरे

(C) गुहायाम् (D) वृक्षोपरि

**81.** सिंहः एकं मूषकं केन अगृह्णात् ?

(A) पादेन (B) बाहुबलेन

(C) करतलेन (D) दण्डेन

**82.** 'जहि' इति क्रियापदस्य लकारः अस्ति—

(A) लट्लकारः (B) लङ्लकारः

(C) लृट्लकारः (D) लोट्लकारः

**83.** 'कस्मिंश्चिदरण्ये' पदस्य सन्धिच्छेदः अस्ति—

(A) कस्मिश्चित् + अरण्ये

(B) कस्मिंश्चित् + अरण्ये

(C) कस्मिन् + चिद + रण्ये

(D) कस्मिन् + अरण्ये

**84.** 'मयि' इति पदे विभक्तिः अस्ति—

(A) तृतीया (B) सप्तमी

(C) पञ्चमी (D) सम्बोधनम्

**85.** सिंहः केन पीड़ितः आसीत् ?

(A) मूषकाणां नृत्येन (B) धावनेन

(C) मूषकेन (D) बुभुक्षया

**86.** 'निर्गत्य' इति पदे प्रत्ययः अस्ति—

(A) ल्यप् (B) क्त

(C) तुमुन् (D) क्त्वा

**87.** 'अत्र–तत्र' इत्यर्थे किम् अव्ययपदं प्रयुक्तम् ?

(A) इतस्ततः (B) किल

(C) मा (D) कदाचित्

## निर्देश (प्रश्न संख्या 88 से 97 तक)

अधोलिखितं गद्यांशं पठित्वा तदनन्तरं प्रदत्तप्रश्नानां विकल्पोत्तरेषु समुचितम् उत्तरं चित्वा लिखत।

अस्ति वाराणस्यां कर्पूरपटको नाम रजकः। स च एकदा अभिनवयस्कया वध्वा सह चिरं केलिं कृत्वा निर्भरमालिङ्ग्य प्रसुप्तः। तदनन्तरं तद्गृहद्रव्याणि हर्तुं चोरः प्रविष्टः। तस्य प्राङ्गणे गर्दभो बद्धस्तिष्ठति कुक्कुरश्च उपविष्टः अस्ति। अथ गर्दभः श्वानमाह—सखे, भवतस्तावदयं व्यापारः। तत् किमिति। त्वम् उच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि ? कुक्कुरो ब्रूते—भद्र मम नियोगस्य चर्चा त्वया न कर्तव्या। त्वमेव किं न जानासि यथा तस्य अहर्निशं गृहरक्षां करोमि। यतोऽयं चिरान्निवृत्तो ममोपयोगं न जानाति। तेनाधुनापि मम आहारदाने मन्दादरः। यतो बिना विधुरदर्शनं स्वामिन उपजीविषु मन्दादरा भवन्ति। गर्दभो ब्रूते–शृणु रे बर्बर। याचते कार्यकाले यः स किं भृत्यः स किं सुहृत् ? कुक्कुरो ब्रूते—शृणु तावत्।

भृत्यान्संभाषयेद्यस्तु कार्यकाले स किं प्रभुः
यतः—आश्रितानां भृतौ स्वामिसेवायां धर्मसेवने।
पुत्रस्योत्पादने चैव सन्ति प्रतिहस्तकाः।।

ततो गर्दभः सकोपमाह—अरे दुष्टमते! पापीयांस्त्वं यद्वि पत्तौ स्वामिकार्योपेक्षां करोषि। भवतु तावत्। यथा स्वामी जागरिष्यति तन्मया कर्तव्यम्। यतः

पृष्ठतः सेवयेदर्कं जठरेण हुताशनम्।
स्वामिनं सर्वभावेन परलोकममायया।

इत्युक्त्वा उच्चैः चीत्कारशब्दं कृतवान्। ततः रजकः तेन चीत्कारेण प्रबुद्धो निद्राभङ्गकोपात् उत्थाय गर्दभं लगुडेन ताडयामास। अतोऽहं ब्रवीमि—

पराधिकारचर्चां यः कुर्यात् स्वामिहितेच्छया।
स विषीदति चीत्कारात् गर्दभः ताडितो यथा।।

**88.** अस्यां कथायां कयोर्मध्ये सम्भाषणं प्रवृत्तम् ?

(A) चोर–रजकयोः

(B) रजक–कुक्कुरयोः

(C) गर्दभ–कुक्कुरयोः

(D) वधू–रजकयोः

**89.** किमर्थं श्वा चोरं दृष्ट्वापि न उच्चैः भषति ?

(A) असहायत्वात् (B) अनादृतत्वात्

(C) अशक्तत्वात् (D) दुष्टत्वात्

**90.** रजकस्य नाम—

(A) विष्णुशर्मा (B) स्वामी

(C) कर्पूरपटकः (D) नारायणः

**91.** गर्दभेन केनोपायेन रजकः कोपितः—

(A) गर्भभत्वेन (B) सम्भाषणेन

(C) चीत्कारेण (D) चोरागमनेन

**92.** रजकः कस्मात् प्रबुद्धः ?

(A) कुक्कुरशब्दात् (B) चोरागमनात्

(C) सूर्योदयात् (D) गर्दभचीत्कारात्

**93.** अस्य कथायाः नीतिः—

(A) स्वामिनं न सेवयेत्

(B) पराधिकारः चर्चां न कुर्यात्

(C) चीत्कारं न कुर्यात्

(D) मित्रकार्यं न कुर्यात्

**94.** 'श्वा' इत्यस्य पर्यायपदम्—

(A) गर्दभः (B) कुक्कुरः

(C) रजकः (D) चोरः

**95.** 'आदरः' इत्यस्य विरुद्धशब्दः—

(A) अनादरः (B) कोपः

(C) सम्मानः (D) दुष्टता

**96.** 'ब्रवीमि' इति—

(A) मध्यमपुरुषबहुवचनम्

(B) प्रथमपुरुषैकवचनम्

(C) उत्तमपुरुषैकवचनम्

(D) उत्तमपुरुषबहुवचनम्

**97.** उपविष्टः इति—

(A) कर्मणि कृदन्तः (B) कर्तरि कृदन्तः

(C) वर्तमान कृदन्तः (D) विध्यर्थकः कृदन्तः

## निर्देश (प्रश्न संख्या 98 से 106 तक)

अधोलिखितं गद्यांश पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचितमय् उत्तरं चिनुत।

उल्लालराज्यं किश्चन लघुसंस्थानम्। तत् सम्पद्धरितम् आसीत्। प्रजाः च सन्तोषेण जीवन्ति स्म तत्र। तत्र एलालवङ्गमरीचादीनाम् उत्पत्तिः अधिका। तानि क्रेतुं विदेशीयाः बहवः आयान्ति स्म।

सम्पत्तिकारणतः तस्य संस्थानस्य राजा बिलासप्रियः जातः। गच्छता कालेन तस्य मद्यपानप्रवृत्तिः अधिका जाता। वाणिज्यार्थम् आगताः पोर्तुगीसाः कदाचित् कांञ्चन प्रदेशान् जित्वा भारते स्वशासनम् आरब्धवन्तः। उल्लालसंस्थानस्य राज्ञे अधिकाधिकं मद्यं दत्त्वा ते तस्य गाढां मैत्रीं सम्पादितवन्तः।

राज्ञः मद्यसेवनप्रवृत्तिः यदा अधिका जाता तदा राज्ञी अभयादेवी तं बहुधा बोधिवती। तथापि राज्ञः व्यवहारे कोऽपि परिष्कारः न जातः। अथ कदाचित् पोर्तुगीसैः प्रेरितः राजा तेषां केन्द्रं गत्वा तत्रैव वासम् आरब्धवान्। मद्यपानाय यत् मद्यं क्रेतव्यं, तन्निमित्तं स्वसंस्थानमेव पोर्तुगीसाधीनं कृतवान् सः।

राजा यदा पोर्तुगीसकेन्द्रे वासम् आरब्धवान् तदा मन्त्रिभिः बोधिता राज्ञी संस्थानरक्षणाय स्वयं शासनसूत्रं गृहीतवती, राजानं देशद्रोहित्वेन उद्घोषितवती च।

पोर्तुगीसजनाः राज्ञा दत्तं पत्रंगृहीत्वा उल्लालसंस्थानम् आगताः। अभयादेवी तैः आनीतं पत्रं दृष्ट्वा क्रुद्धा सती तत् पत्रं विच्छिद्य क्षिप्तवती। ''व्यं युद्धं सम्मुखीर्तुं सज्जाः। किन्तु देशम् अन्याधीनं न करिष्यामः एव'' इति धैर्येण अवदत् सा।

एतस्मात् क्रुद्धाः पोर्तुगीसाः ससैन्यं युद्धाय आगताः। अभयादेवी प्रतिवेशिराज्यानां साहाय्यं याचितवती। केचन राजानः साहाय्यार्थम् आगताः। पोर्तुगीसाः उल्लालराजं पुरतः संस्थाप्य युद्धम् अकुर्वन्। एतस्मिन् युद्धे पोर्तुगीसानां पराजयः जातः। ते पलायनम् अकुर्वन्। उल्लालराजः अति पलायनं कुर्वन् बाणेन आहत् सन् रणरङ्गे अपतत्। पोर्तुगीसाः तं परित्यज्य धावितवन्तः।

एकाकितया भूमौ पतितं राजानम् अभयादेवी राजभवनम् आनीतवती। वैद्याः तस्य विशेषोपचार कृतवन्तः। किन्तु ततः प्रयोजनं किमपि न सिद्धम्। स्वदोषार्थं राज्ञीं क्षमां याचन् प्राणवियोगं प्राप्तवान्।

राज्ञी तस्य अन्त्यसंस्कारं निर्वर्तितवती। ततः तया धर्मेण शासनं कृतम्। स्वदेशस्य रक्षणार्थं धैर्येण युद्धं कृतवत्याः स्वातन्त्र्यप्रियायाः अभयादेव्याः चरितं निश्चयेनास्ति प्रेरणादायकं ननु?

**98.** स्वप्राणवियोगात् पूर्वं राजा किं कृतवान्?

(A) राज्यवासिनः सम्बोधितवान्

(B) पोर्तुगीसविरुद्धं युद्धं कृतवान्

(C) राज्ञीम् अभ्यादेवी क्षमां याचितवान्

(D) सुरापानं कृतवान्

**99.** ''वयं युद्धं सम्मुखीकर्तुं सज्जाः । किन्तु देशम् अन्याधीन् न करिष्यामः एव'' इत्युक्तिः कस्याः आसीत्?

(A) राज्ञः (B) रारयाः
(C) वैदेशिकानाम् (D) मन्त्रिणः

**100.** जीवन्ति स्म इति पदद्वयस्य मिलित्वा अर्थः—

(A) अजीवम् (B) अजीवत्
(C) अजीवत (D) अजीवन्

**101.** संस्थानरक्षणाय स्वयं शासनसूत्रं गृहीतुम् अभयादेवी केन उपदिष्टा?

(A) मन्त्रिभिः (B) स्वयम्
(C) वैदेशिकैः (D) राज्ञा

**102.** सम्पत्तिकारणतः राजा विलासप्रियः जातः इति वाक्ये सम्पत्तिकारणः इति पदे प्रयुक्तः तद्धितप्रत्ययः कस्यः विभक्त्याः अर्थे अस्ति?

(A) तृतीया (B) चतुर्थी
(C) पञ्चमी (D) द्वितीया

**103.** एलालवङ्गमरीचादीनाम् उत्पत्तिः कुत्र अधिका जायते स्म ?

(A) उत्तरभारते (B) उल्लालप्रान्ते
(C) उत्कलराज्ये (D) बङ्गदेशे

**104.** उल्लालराजस्य मद्यपानप्रवृत्तिः केषां कारणेन वर्धिता ?

(A) पोर्तुगीसानाम् (B) स्वराज्यजनानाम्
(C) आङ्गलजनानाम् (D) अभयादेव्याः

**105.** पोर्तुगीसैः सह युद्धं कुर्तम् अभयादेवी केषां साहायं याचितवती ?

(A) आङ्गलशासकानाम्
(B) प्रतिविशिराज्यानाम्
(C) वाणिज्यिकानाम्
(D) उल्लालराजस्य

**106.** युद्धभूमौ एकाकितया कः पतितः आसीत्?

(A) उल्लालराजा (B) अभयादेवी
(C) विदेशीयाः (D) पोर्तुगीसराजा

**निर्देश (प्रश्न संख्या 107 से 115 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चित्वा लिखत।

बिन्ध्यपर्वतमालायाः मध्ये चित्रकूटं नाम तीर्थस्थलम् अस्ति। स्थानमिदं कोलाहलरहितं प्राकृतिकसौन्दर्य सम्पन्नमस्ति। अत्र आगमनेन दर्शनेन च आनन्दानुभूतिः। जायते। चित्रकूटे सघनानि वनानि सन्ति। अत्र बहवः निर्झराः सन्ति। सर्वत्रापि हरीतिमा राजते। चित्रकूटस्य धार्मिकं सांस्कृतिकं च महत्त्वं विद्यते। कथ्यते यत् सीतालक्ष्मणाभ्यां सह वनवासकाले श्रीरामः एकादशवर्षाणि यावत् चित्रकूटे एवं निवासं कृतवान्। महर्षिः अत्रिः साध वी अनसूया च अत्रैव तपस्यां कृत्वा आत्मज्ञानम् अलभेताम्। अत्र अनेकानि दर्शयानि स्थलानि सन्ति। रामघट्टः—मन्दाकिन्याः तटे रामघट्टः अस्ति। अत्र प्रायेण तीर्थयात्रिणां सम्मर्दः भवति। सायंकाले मन्दाकिन्याः नीराजनसमये मनोरमदृश्यं भवति। रामघट्टात् नातिदूरमेव जानकीकुण्डम् अस्ति। वनवासे सीता अत्रैव स्नानं करोति स्म। सघनवनमध्ये अनसूयाश्रमः विद्यते। अत्र पक्षिणां कलरवः निर्झरध्वनिः शीतलवायुश्च मनांसि रञ्जयन्ति। एतदेव मन्दाकिन्याः उद्गमस्थलम्।

जानकी कुण्डसमीपे एवं विशाला शिला दर्शनीया वर्तते। चित्रकूटतः पञ्चक्रोशदूरम् नयनाभिरामं सौन्दर्ययुक्तं गुप्तगोदावरीस्थलं वर्तते। अत्र निरन्तरं जलं प्रवहति। तत्रैव हनुमानधारास्थलं वर्तते। अत्र उच्चस्थलात् जलं पतति।

**107.** अन्नागमनेन दर्शनेन च किं भवति?

(A) आनन्दानुभूतिः (B) क्लेशानुभूतिः
(C) पीडानुभूतिः (D) ज्वरानुभूतिः

**108.** सीतालक्ष्मणभ्यां सह कः अत्र वासम् अकरोत्?

(A) वाल्मीकिः (B) व्यासः
(C) कालिदासः (D) श्रीरामः

**109.** अकरोत् इति पदस्य समानार्थकपदम् अनुच्छेदे —ऽस्मिन् प्रयुक्तः तच्चित्वा लिखत—

(A) लिखितवान् (B) पीतवान्
(C) कृतवान् (D) पूरितवान्

**110.** का नाम साध्वी तपस्यां कृत्वा आत्मज्ञानम् अलभत् ?

(A) शकुन्तला (B) अपाला
(C) प्रिया (D) अनसूया

**111.** 'करोति' इति पदे का धातुः वर्तते?

(A) कृ (B) पठ्
(C) लिख् (D) हस्

**112.** 'रञ्जयन्ति' इति पदस्य एकवचने किं पदं भवति?

(A) रञ्जयतः (B) रञ्जयति
(C) रञ्जयामि (D) रञ्यसि

**113.** अनसूयाश्रमः कस्याः नद्याः उद्गमस्थलम् अस्ति?

(A) गोदावर्याः (B) नर्मदायाः
(C) गङ्गायाः (D) मन्दाकिन्याः

**114.** चित्रकूटतः कियद्दूरं गुप्तगोदारीस्थलं वर्तते?

(A) पञ्चक्रोशमितम्
(B) सप्तक्रोशमितम्
(C) दशक्रोशमितम्
(D) पञ्चविंशतिक्रोशमितम्

**115.** चित्रकूटं नाम तीर्थस्थलम् कुत्रास्ति?

(A) आरावलीपर्वतमालामध्ये
(B) विन्ध्यपर्वतमालामध्ये
(C) पूर्वपर्वतमालामध्ये
(D) पश्चिमोत्तरपर्वतमालामध्ये

**निर्देश (प्रश्न संख्या 116 से 124 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

अस्ति हिमवान् नाम सर्वत्रभूमिर्नगेन्द्रः। तस्य सानोरुपरि विभाति काञ्चनपुरं नाम नगरम्। तत्र जीमूतकेतुरिति श्रीमान् विधाधरपतिः वसति स्म। तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः। सः राजा जीमूतकेतुः तं कल्पतरुम् आराध्य तत्प्रसादात् च बोधिसत्त्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्रोत्। स महान् दानवीरः सर्वभूतानुकम्पी च अभवत्। तस्य गुणैः प्रसन्नः स्वसचिवैश्च प्रेरितः राजा कालेन सम्प्रापतयौवनं तं यौवराज्येऽभिषिक्तवान्। यौवराज्ये स्थितः सः जीमूतवाहनः कदाचित् हितैषिभिः उक्तम्—''यौऽयं सर्वकामदः कल्पतरुः तवोद्याने तिष्ठति स एव सदा पूज्यः। अस्मिन् अनुकूले स्थिते शक्रोऽपि नास्मान्

बाधितुं शक्नुयात्'' इति।

आकर्ण्यैतत् जीमूतवाहनः अन्तरचिन्तयत्—'अहो बत। ईदृशममरपादपं प्राप्यापि पूर्वैः पुरुषैरस्माकं तादृशं फलं किमपि नासादितं किन्तु केवलं कैश्चिचदेव कृपणैः कश्चिचदपि अर्थोऽर्थितः। तदहमस्मात् मनोरथमभीष्टं साधयामि'' इति।

एवमालोच्य स पितुरन्तिकमागच्छत्। आगत्य च सुखमासीनं पितरमेकान्ते न्यवेदयत्—''तात ! त्वं तु जानासि एव यदस्मिन् संसारसागरे आशरीरमिदं सर्वं धनं वीचिवच्चञ्चलम्। एकः परोपकार एवाऽस्मिन् संसारेऽनश्वरः यो युगान्तपर्यन्तं यशः प्रसूते। तदस्माभिरीदृशः कल्पतरुः किमर्थं रक्ष्यते? यैश्च पूर्वैरयं 'मम मम' इति आग्रहेण रक्षितः, ते इदानीं कुत्र गताः? तेषां कस्यायाम्? अस्य वा के ते? तस्मात् परोपकारैकफलसिद्धये त्वदाज्ञया इमं कल्पपादपम् आराधयामि।

**116.** जीमूतकेतुः कम् आराध्य पुत्रं प्राप्नोत्?

(A) कल्पतरुम् (B) बोधिसत्त्वम्
(C) हिमवन्तम् (D) काञ्चनपुरम्

**117.** 'संसारेऽनटवरः 'इत्यत्र सन्धिः कः ?

(A) वृद्धिः (B) गुणः
(C) प्रकृतिभावः (D) पूर्वरूपः

**118.** 'नासादितम्' इत्यस्य पदस्य पर्यायः क?

(A) न उपविष्टम् (B) असाधितं न
(C) न प्राप्तम् (D) न सन्निविष्टम्

**119.** 'सर्वकामदः' इति समस्तपदस्य विग्रहो भवति—

(A) सर्वं कामं दर्शयति
(B) सर्वं कामं दधाति
(C) सर्वं कामं दुनोति
(D) सर्वं कामं ददाति

**120.** बोधिसत्त्वांशसम्भवः कः?

(A) जीमूतवाहनः (B) हिमवान्
(C) जीमूतकेतुः (D) कल्पतरुः

**121.** 'शक्र'—शब्दस्य पर्यायः भवति—

(A) शुक्रः (B) प्रजापतिः
(C) इन्द्रः (D) चन्द्रः

**122.** 'प्रसन्नः' इति पदस्य विलोमपदं भवति—

(A) स्तब्धः (B) चकितः
(C) निमग्नः (D) विषण्णः

**123.** गद्यांशेऽस्मिन् 'नित्यम्' इति पदस्य पर्यायः प्रयुक्त—

(A) हिमवान् (B) स्थितः
(C) अनश्वरः (D) सर्वकामदः

**124.** सर्वकामदः कल्पतरुः कुत्र तिष्ठति?
(A) पुरे (B) उद्याने
(C) नगरे (D) नगेन्द्रे

**निर्देश (प्रश्न संख्या 125 से 133 तक)**

अधोलिखित गद्यांश पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेषु समुचितम् उत्तरं चित्वा लिखत।

अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्य–फलैः शिवीनां राजा बभूव। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत्। जनकल्याण–कर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य–औदार्यादिसद्गुणोपेतः सः नगरस्य समन्ततः धनधान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न–पान–वसन–रजत–सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म। अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसङ्ख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि आपि याचन्ते। एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्ति विज्ञाय सकलं ब्रह्माण्डं व्याकुल सञ्जातम्।

राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं
धारयित्वा तत्पुरतः अवदत्–हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि–शशि–तारा–मण्डलभूषितं जगत् एतत् कथमिव पश्येयं चक्षुर्हीनः। राजा उवाच–भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम्, किं करवाणि? विप्रः उवाच–यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्, ''लोके चक्षुर्दानं दुष्करमेव। नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात्। अथवा भवतु नाम। किं बहु चिन्तनेन।'' इति विचार्य राजा अभाषत–भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षर्द्वयमेव प्रयच्छामि इति।

समुचितम् उत्तरम् चिनुत–

**125.** विसर्गसन्धेः उदाहरणम् अस्ति–
(A) दुष्करमेव (B) गात्रेष्वपि
(C) आशान्वितः (D) चक्षुर्दानम्

**126.** 'असौ पुत्रवत् प्रजाः पालयति स्म' वाक्ये 'असौ' सर्वनामपदं कस्मै प्रयुक्तम्?
(A) याचकाय (B) बोधिसत्त्वाय
(C) शक्राय (D) जनाय

**127.** अभीष्टानि वस्तूनि प्राप्य के सन्तुष्टाः भवन्ति स्म?
(A) बोधिसत्त्वः (B) अर्थिनः
(C) राजानः (D) सर्वे जनाः

**128.** कस्य दानशीलताम् आकर्ण्य जनाः तं देशम् आयान्ति स्म?
(A) याचकस्य (B) इन्द्रस्य
(C) शक्रस्य (D) बोधिसत्त्वस्य

**129.** विप्रः किम् इच्छति स्म?
(A) अन्नम् (B) पानम्
(C) चक्षुर्दानम् (D) धनम्

**130.** शक्रः किं परीक्षितुम् इच्छति स्म?
(A) दानशीलताम् (B) वृद्धसेवाम्
(C) विनयम् (D) औदार्यम्

**131.** कः आत्मानम् अनुगृहीतं कर्तुम् इच्छति?
(A) शिवीनां राजा (B) रविः
(C) याचकः (D) इन्द्रः

**132.** 'भ्रमन्' इत्यर्थे अनुच्छेदे कः शब्दः प्रयुक्तः?
(A) विनयशीलः (B) विचारयति सति
(C) इच्छन् (D) विचरन

**133.** 'ल्यप्' विज्ञाय कस्मिन् पदे प्रयुक्तः?
(A) बाल्यात् (B) विज्ञाय
(C) स्यात् (D) द्वयम्

**निर्देश (प्रश्न संख्या 134 से 142 तक)**

अधोलिखित गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रमागच्छन्तंदृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद–''कथमेकैकशा व्याघ्रभक्षणाय कलहं कुरुथः अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते'' इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रोमधाकुलचित्तो नष्टः।

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमॉल्लोके मुच्यते महतो भयात्।।

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह–
''भवान् कुतः भयात् पलायति'' ?

व्याघ्रः–गच्छ, गच्छ जम्बुक! त्वमपि किंचिद्
गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते
तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्ट शीघ्रं तदग्रतः।

शृंगालः–व्याघ्र त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः–प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहाय मानौ चपेटया प्रहरन्ती दृष्टा। जम्बुकः– स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्।

व्याघ्र! तव पूनः तत्र गतस्य सा सम्मुखमपरीक्षते यदि, तर्हि त्वचा अहं हन्तव्यः इति।

व्याघ्रः शृगाल! यदि त्वं मां मुक्त्वा यासि तदा वेताप्यवेला स्यात्।

जम्बुकः–
यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। स व्याघ्रः तथाकृत्वा काननं ययौ।
शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा
बुद्धिमती चिन्तितवती–जम्बुककृतोत्साहाद्
व्याघात कथं मुच्यताम्? परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच–
रे रे धूर्त त्वचा दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्याद्यैककमानीय कथं चासि वदाधुना।।

**134.** 'राजपुत्रः' इति समस्तपदस्य विग्रहो भवति
(A) राजा च पुत्रः च (B) राज्ञः पुत्रः
(C) राजानं पुत्रः (D) राजा प्रत्रः

**135.** अनुच्छेदेऽस्मिन् 'वनम्' इति पदस्य पर्यायः प्रयुक्तः
(A) आननम् (B) दर्पणम्
(C) पत्रकम् (D) काननम्

**136.** भयाकुलं व्याघ्रं दृष्ट्वा धूर्तः शृगालः कथमाह?
(A) मांसं खादन् (B) हसन्
(C) चीत्कुर्वन् (D) जलं पिबन्

**137.** अनुच्छेदानुसारेण शास्त्रे का श्रूयते
(A) व्याघ्रमारी (B) वानरमारी
(C) गजमारी (D) हंसिनी

**138.** 'नष्टः' इति पदं कस्मिन् अर्थे अत्र प्रयुक्तः?
(A) पलायितः (B) दिवंगतः
(C) अस्तंगतः (D) मृतः

**139.** 'शीघ्रम्' इति पदस्य विलोमपदं भवति?
(A) सायम् (B) मन्दम्
(C) रात्रिः (D) प्रातः

**140.** 'विवादम्' इति पदस्य कः पर्यायः अनुच्छेदेऽस्मिन् प्रयुक्तः–
(A) कलहः (B) सत्कारः
(C) अर्चना (D) मैत्री

**141.** शृगालं गले बद्ध्वा कः काननं ययौ?
(A) मण्डूकराजः (B) पक्षिराजः
(C) मत्स्यः (D) व्याघ्रः

**142.** केन प्रेरितः बुद्धिमत्याः सम्मुखं पुनरागतः?
(A) मृगेण (B) शृगालेन
(C) कुक्कुटेन (D) सर्पेण

**निर्देश (प्रश्न संख्या 143 से 151 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

कृष्णमूर्त्तिः श्रीकण्ठश्च मित्रे आस्ताम्। श्रीकण्ठस्य पिता समृद्ध आसीत्। अतः तस्य भवने सर्वविधानि सुख–साधनानि ऑसन्। तस्मिन् विशाले भवने चत्वारिंशत् स्तम्भाः आसन्। तस्य अष्टादशप्रकोष्ठेषु पञ्चाशत् गवाक्षाः चतुश्चत्वारिंशत् द्वाराणि षट्त्रिंशत् विद्युत्व्यजनानि आसन्। तत्र दश सेवकाः निरन्तरं कार्यं कुर्वन्ति स्म। परं कृष्णमूर्तेः माता पिता च निर्धनौ कृषकदम्पती। तस्य गृहम् आडम्बरविहीनं साधारणञ्च आसीत्।

एकदा श्रीकण्ठः मिश्रेण सह प्रातः नववादने तस्य गृहम् अगच्छत्। तत्र कृष्णमूर्त्तिः तस्य माता पिता च स्वशक्त्या श्रीकण्ठस्य आतिथ्यम् अकुर्वन्। एतद्दृष्ट्वा श्रीकण्ठः अकथयत्, मित्र! अहं भवतां सत्कोरण सन्तुष्टोऽस्मि। केवलम् इदमेव मम दुःखं यत् तव गृहे एकोऽपि भृत्यः नास्ति। मम सत्काराय भवतां बहुकष्टं जातम्। मम गृहे तु बहु कर्मकराः सन्ति।' तदा कृष्णमूर्तिः अवदत् 'मित्र ! ममापि अष्टौ कर्मकराः सन्ति।' श्रीकण्ठः अकथत् 'मित्र किन्तु ते न दृश्यन्ते'। भवान् भवतां माता–पिता व एवम् अत्र कार्यं कुर्वन्ति। कृष्णमूर्त्तिः अकथयत् मित्र! भवान् सम्यक् चिन्तयति। अहं स्वकर्मकराणां परिचयं वच्मि। श्रीकण्ठः अकथयत् कारयतु। कृष्णमूर्त्तिः अकथयत् मम कर्मकराः सन्ति–

द्वौ पादौ, द्वौ हस्तौ, द्वे नेत्रे, द्वे श्रोत्रे च इति। एते प्रतिक्षणं मम सहायकत्वेन कार्यं कुर्वन्ति किन्तु तव भृत्याः सदैव सर्वत्र च उपस्थिताः न भवन्ति। यतोऽहि भृत्यानां कृते एतत् सम्भवमेव नास्ति।

त्वं तु स्वकार्याय सर्वदा भृत्याधीनः। यदा यदा ते अनुपस्थिताः तदा तदा त्वं कष्टमनुभवसि। स्वावलम्बने तु सर्वदा सुखमेव। न कदापि कष्टं भवति।

श्रीकण्ठः अवदत् मित्र! तव वचनानि श्रुत्वा मम मनसि महती प्रसन्नता जाता। अधुना अहमपि स्वकार्याणि स्वयमेव कर्तुम् इच्छामि। भवतु सार्धद्वादशवादनमिदम्। साम्प्रतं गृहं चलामि।

**143.** सर्वदा सुखं कुत्रास्ति?
(A) स्वावलम्बने (B) आकाशे
(C) वृक्षे (D) पाताले

**144.** 'क्त्वा' प्रत्ययान्तशब्दः कः ?
(A) चलामि (B) श्रुत्वा
(C) स्वयम् (D) कर्तुम्

**145.** 'साम्प्रतम्' इति पदस्य पर्यायो भवति—
(A) अधुना (B) तदा
(C) श्वः (D) अद्य

**146.** कस्य भवने सर्वविधानि सुखसाधनानि आसन्?
(A) श्रीकण्ठस्य (B) रामकण्ठस्य
(C) रमेशस्य (D) सुरेशस्य

**147.** तस्य भवने कति द्वाराणि आसन्?
(A) षड्त्रिंशत् (B) दश
(C) पञ्चाशत् (D) चतुश्चत्वारिंशत्

**148.** कृष्णमूर्तेः माता–पिता कथम् आस्ताम्?
(A) अधिकारिणौ (B) सभापती
(C) धनवन्तौ (D) निर्धनौ

**149.** कस्य गृहम् आडम्बरविहीनम् आसीत्?
(A) कृष्णमूर्तेः (B) दक्षिणामूर्तेः
(C) अकण्ठस्य (D) श्रीकण्ठस्य

**150.** 'सह' इति योगेन कतमं वाक्यं समीचीनम्—
(A) श्रीकण्ठः तस्म सह गृहम् अगच्छत्
(B) श्रीकण्ठः तस्मिन् सह गृहम् अगच्छत्
(C) श्रीकण्ठः तेन सह गृहम् अगच्छत्
(D) श्रीकण्ठः तस्मै सह गृहम् अगच्छत्

**151.** कृष्णमूर्तेः कति कर्मकराः आसन्?
(A) सप्त (B) दश
(C) द्वौ (D) अष्टौ

**निर्देश (प्रश्न संख्या 152 से 160 तक)**

अधोलिखितं गद्यांशं पठित्वा तदनन्तरं प्रदत्तप्रश्नानां विकल्पात्मकोत्तरेभ्यः समुचितम् उत्तरं चित्वा लिखत।

इह खलु पञ्चेन्द्रियाणि, पञ्चेन्द्रियद्रव्याणि, पञ्चेन्द्रियार्थाः च भवन्ति। तत्र चक्षुः श्रोत्रं घ्राणं जिह्वा त्वक् च इति पञ्चेन्द्रियाणि। पञ्चेन्द्रियद्रव्याणि खं वायुः ज्योतिः आपो भूः इति। पञ्चेन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः। मनः पुरः सराणि च इन्द्रियणि अर्थसंग्रहसमर्थानि भवन्ति। न इन्द्रियवशगः स्यात्। न चञ्चलं मनः अनुभ्रामयेत्।
गुरु–वृद्ध–आचार्यान् अर्चयेता मूर्ध–श्रोत्र–घ्राण–पाद–तैलनित्यः स्यात्। अतिथीनां पूजकः स्यात्। काले हित–मित– मधुरार्थवादी स्यात्। वश्यात्मा, महोत्साहः, विनयबुद्धिः निर्भीकः, क्षमावान्, सर्वप्राणिषु बन्धुभूतः स्यात्।
न अनृतं ब्रूयात्। न अतिब्रूयात्। न अन्यस्वम् आहरेत्। न वैरं रोचयेत्। न कुर्यात् पापम्। न पापेऽपि पापी स्यात्। न अन्यदोषान् ब्रूयात्। न अन्यरहस्यम् आगमयेत्। अधार्मिकैः न दुष्टैः सह आसीत्। न नासिकां कुष्णीयात्। न दन्तान् विघट्टयेत्। न भूमिं विलिखेत्। न नखान् वादयेत्। न छिन्द्यात् तृणम्। न दुष्टयानानि आरोहेत्। न द्रुमम् आरोहेत्। न जलोग्रवेगम् अवगाहेत्।
न अदेशे, न अकाले, न कुत्सयन्, प्रतिकूलोपहितम्, न पर्युषितम् अन्नम् खादेत्। न नक्तं दधि भुञ्जीत। न कञ्चिद् अवजानीयात्। न वेगान् धारयेत्। न अहंमानी स्यात्। न अभृतभृत्यो, नैकः सुखी, न सर्वविश्रम्भी न सर्वाभिशंकी स्यात्। न नियमं भिन्द्यात्।
न कार्यकालम् अतिपातयेत्। न अपरीक्षितम् अभिनिविशेत्। न च अतिदीर्घसूत्री स्यात्। न सिद्धौ उत्सेकं गच्छेत् न असिद्धौ दैन्यम्।

**152.** 'असत्यम्' इत्यर्थे किं पदमत्र प्रयुक्तम्?
(A) अनृतम् (B) अन्यरहस्यम्
(C) अपरीक्षितम् (D) चञ्चलम्

**153.** कदा दधि न भोक्तव्यम्?
(A) सायम् (B) दिवि
(C) रात्रौ (D) मध्याह्ने

**154.** जनः केषां पूजकः स्यात्?
(A) दुष्टानाम् (B) अतिथीनाम्
(C) वश्यात्मनाम् (D) निर्भीकाणाम्

**155.** इन्द्रियाणि कति भवन्ति?
(A) पञ्च (B) त्रीणि
(C) षट् (D) चत्वारि

**156.** कं न आरोहेत्?
(A) अश्वम् (B) नौकाम्
(C) गजम् (D) द्रुमम्

**157.** केन युक्तेन इन्द्रियाणि अर्थसंग्रहसमर्थानि भवन्ति?
(A) शरीरेण (B) वाचा
(C) कर्मणा (D) मनसा

**158.** 'अहङ्कारवान्' इत्यर्थे किं पदमत्र प्रयुक्तम्?
(A) अहंमानी (B) वश्यात्मा
(C) महोत्साहः (D) सर्वाभिशङ्की

**159.** 'गुरुवृद्धाचार्यान्' इति पदे कः समासः?
(A) अव्ययीभावः (B) द्वन्द्वः
(C) तत्पुरुष (D) बहुव्रीहिः

**160.** 'क्षमावान्' इत्यत्र कः प्रत्ययः?
(A) तुमुन् (B) क्त
(C) मतुप् (D) क्तवतु

**निर्देश (प्रश्न संख्या 161 से 170 तक)**

अधोलिखितं गद्यांशं पठित्वा तदनन्तरं प्रदत्तप्रश्नानां विकल्पोत्तरेषु समुचितम् उत्तरं चिनुत।

अत्रान्तरे आन्ध्रनगरादागच्छन्नग्रजः कश्चिदैक्ष्यत। तेन चेयं कथा कथिता– यथा किल जयसिंहेनानेकनिकारदत्तसंघर्षेण जिघांसितः स कर्दनः कनकलेखादर्शनैधितेन रागेण ारक्ष्यत। सा च दारिका यक्षेण केनचिदधिष्ठिता न तिष्ठत्यग्रे नरान्तरस्य नरेन्द्रस्य च। आयस्यति च नरेन्द्रसार्थसंग्रहणेन तन्निराकरिष्यन् नरेन्द्रो न चास्ति सिद्धिः इति। तेन चाहं दर्शिताशः शंकरनृत्तदेशजातस्य जरत्सालस्य स्कन्धरन्ध्रान्तर्जटाजालं निष्कृष्य तेन जटिलतां गतः कन्थाचीरसंचयान्तरितसकलगात्रः कांश्चित् शिष्यान् अग्रहीषम। तांश्च नाना श्चर्यक्रियातिसंहिताज्जनात्आकृष्टान्नचे–
लादित्यागान्नित्यहृष्टानकार्षम्। अयासिषं च दिनैः कैश्चित् आन्ध्रनगरम्। तस्य नात्यासन्ने सलिलराशिसदृशस्य कलहंसगणदलित–नलिनदलसंहतिगलितकिञ्जल्कशकलशारस्य सारसश्रेणिशेखरस्य सरसस्तीरकानने कृतनिकेतनः स्थितः। शिष्यजनकथित–
चित्रचेष्टाकृष्टसकलनागरजनाभिसंधानदक्षः सन् दिशि दिशीत्यकीर्त्ये जनने–य एष जरदरण्यस्थली सरस्तीरे यतिस्तस्य सकलानि सरहस्यानि सषडङ्गानि च च्छन्दांसि रसनाग्रे संनिहितानि अन्यानि च शास्त्राणि। येन यानि न ज्ञायन्ते स तेषां तत्सकाशादर्थनिण र्यिं करिष्यति।
असत्येनास्य नास्यं संसृज्यते। सशरीरश्चैष दयाराशिः। एतत्संग्रहेणाद्य चिरं चरितार्था दीक्षा। तदङ्घ्रिक्षालनसलिलसेकः निष्कलङ्कशिरसां नश्यन्ति क्षणेनैकेनाखिलनरेन्द्रयन्त्र–
लङ्.घिनश्चण्डताराग्रहाः। न तस्य शक्यं शक्तेरियत्ताज्ञानम्। न चास्याहंकारकणिका इति।

**161.** इयं कथा केन कथिता?
(A) राज्ञा (B) मित्रेण
(C) जयसिंहेन (D) अग्रजेन

**162.** कनकलेखा केनाधिष्ठिता?

(A) राक्षसेन (B) यक्षेण
(C) जनकेन (D) पुरुषेण

**163.** शङ्करनृत्तदेशजातः कः?
(A) नरेन्द्रः (B) शिष्यः
(C) जरत्सालः (D) यक्षः

**164.** कथां वदन् क्वायासीत्?
(A) अरण्यम् (B) आन्ध्रनगरम्
(C) समुद्रम् (D) स्वर्गम्

**165.** सलिलराशिसदृशः कः?
(A) सरः (B) नगरम्
(C) कलहंसः (D) आकाशः

**166.** असत्येन किं न संसृज्यते?
(A) मानसम् (B) जलम्
(C) आस्यम् (D) दयाराशिः

**167.** 'नरेन्द्र' पदस्य पर्यायपदम्—
(A) राजा (B) मन्त्री
(C) मित्रम् (D) शक्रः

**168.** 'अग्रे' इत्यस्य विरुद्धार्थपदम्—
(A) समीपे (B) पश्चात्
(C) दूरे (D) पार्श्वे

**169.** 'अग्रहीषम्' इति क्रियापदं वर्तते—
(A) भूतकालबोधकम्
(B) भविष्यत्कालबोधकम्
(C) वर्तमानकालबोधकम्
(D) स्त्रीलिङ्गबोधकम्

**170.** 'क्षणेनैकेन' इत्यत्र कः सन्धिः?
(A) सवर्णदीर्घसन्धिः (B) वृद्धिसन्धिः
(C) पूर्वरूपसन्धिः (D) गुणसन्धिः

**निर्देश (प्रश्न संख्या 171 से 179 तक)**
अधोलिखितं गद्यांशं पठित्वा तदनन्तरं प्रदत्तप्रश्नानां विकल्पात्मकोत्तरेषु समुचितम् उत्तरं चित्वा लिखत।

पुरा गुजरातप्रदेशे एकस्मिन् ग्रामे एकं गुरुकुलम् आसीत्। तत्र द्विशतं छात्राः गुरुभ्यः अनेकान् विषयान् पठन्ति स्म। तेषां भोजनादिव्यवस्थाम् एका नगरस्थिता संस्था अकरोत्। एकदा संस्थाधि–

कारिणः छात्रेभ्यः एकं वैद्यं प्रेषितवन्तः। सः त्रीन् मासान् तत्र अवसत्, किन्तु कोऽपि रुग्णः तस्य समीपे चिकित्सायै न आगच्छत्। वैद्यराजः प्रधानाचार्यम् अपृच्छत्–किम् अत्र कोऽपि रोगी न भवति? प्रधानाचार्यः विहस्य अवदत्–वैद्यराज! अस्य एकं रहस्यम् अस्ति। अत्र सर्वे तदा भोजनं कुर्वन्ति, यदा ते तीव्रक्षुधाम् अनुभवन्ति। यदा तेषां भोजनेन तृप्तिः भवति, ततः पूर्वम् एवं ते भोजनं त्यजन्ति। एतत् एव एतेषां स्वास्थ्यस्य रहस्यम्। भवान् जानाति एवं यत् स्वस्थाः नराः औषधं न सेवन्ते। तद्वचनं श्रुत्वा वैद्यः हसित्वा अवदत्–अत्र मम उपयोगः न अस्ति। अहं गच्छामि। नमस्कारः। यत्र रोगः तत्र वैद्यः।

**171.** कति छात्राः गुरुकुले पठन्ति स्म?
(A) 200 (B) 202
(C) 102 (D) 002

**172.** वैद्यराजः कं पृष्टवान्?
(A) प्रधानाचार्यम् (B) संस्थाधिकारिणः
(C) अभिभावकान् (D) छात्रान्

**173.** 'विहस्य' इति पदे प्रत्ययः अस्ति?
(A) ल्यप् (B) य
(C) क्त्वा (D) क्यप्

**174.** 'त्यजन्ति' इति पदे धातुः अस्ति?
(A) तर्ज् (B) त्यज
(C) त्यज् (D) त्यक्त

**175.** 'नगरस्थिता' इति पदे समासः अस्ति?
(A) अव्ययीभावः (B) द्वन्द्वः
(C) कर्मधारयः (D) तत्पुरुषः

**176.** 'भोजनादिव्यवस्थाम्' पदे विभक्तिः अस्ति?
(A) षष्ठी (B) सप्तमी
(C) तृतीया (D) द्वितीया

**177.** अस्मिन् अनुच्छेदे 'सेवन्ते' इति क्रियापदस्य कर्तृपदं किम्?
(A) भवान् (B) स्वस्थाः
(C) नराः (D) संस्थाधिकारिणः

**178.** 'कोऽपि' पदे सन्धिः अस्ति?
(A) व्यञ्जनसन्धिः (B) यण्सन्धिः
(C) विसर्गसन्धिः (D) श्चुत्वसन्धिः

**179.** 'अत्र मम उपयोगः न अस्ति।' इति वाक्ये 'मम' सर्वनामपदं कस्मै प्रयुक्तम्?
(A) वैद्यराजाय (B) छात्रेभ्यः
(C) प्रधानाचार्याय (D) रुग्णेभ्यः

**निर्देश (प्रश्न संख्या 180 से 187 तक)**
आधोलिखित गद्यांशं पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेषु उचिततम् उत्तरं चित्वा लिखत–

ग्रामे आसीत् कथन दुर्बलकायः । शरीरशक्तिहीनता–कारणतः सः भृतिकार्य न प्राप्नोति स्म। सः देवं प्रार्थितवान्– ''भगवान् ! मम उदरपूरणाय काथित् व्यवस्थां परिकल्पयतु कृपया'' इति। तस्यां रात्रों तस्य स्वप्ने प्रत्यक्षीभूय भगवान् अवदत्–'शिलानोदनं कुरु'' इति।

तस्य गृहस्य समीपे काचित् महाशिला आसीत्। सः निर्धनः तस्याः नोदनम् आरब्धवान्। शिला तु महाकारा आसीत्। अतः सः तां कम्पयितुसु अपि न शक्तवान् तथापि भगवतः आदेशं पालयितुम् इच्छन् सः स्वस्य प्रयत्नं न परित्यक्तवान्।

एवमेव कानिचन दिनानि गतानि। जनाः तस्य प्रयत्नं दृष्ट्वा उपहासवचनानि उक्तवन्तः तां महाशिलां कम्पयितुम् अपि न शक्नोति भवान्। एतस्याः नोदने प्रवृत्तः भवान् मूर्खः एव' इति

एतत् श्रुत्वा अपि निर्धनः स्वस्य प्रयत्नं तु न परित्यक्तवान्। एवमेव मासत्रयम् अतीतम्। तदीयः शिलानोदनप्रयत्नः तु व्यर्थः एव असीत्। अतः सः नितरां खिन्नः । स्वस्य दौर्भाग्य स्मरन् एकदा सः निद्राम् अकरोत्। तस्य स्वप्ने देवः पुनः प्रत्यक्षः अभवत्। तं दृष्ट्वा सः निर्धनः–''देव! व्यर्थकार्ये भवता अहं योजितः। तत् कृतवता मया उपहासपात्रता प्राप्ताः इति अवदत्।

तदा देवः उक्तवान् –''भोः! भवतः परिश्रमः व्यर्थः नं अतः अलं चिन्तयाः।''

तदा क्रुद्धः निर्धनः अवदत्–''मया द्वित्रान् मासान् यावत् शिलानोदनं कृतम्। किन्तु शिला न अकम्पत अपि। तां नोत्तुं मया कृतः प्रयासः किं व्यर्थः न ?'' इति।

''सा महाशिला भवता कम्पयितुं न शक्या इति अहं जानामि एव। नोदनात् शिला लवमात्रेणापि न अकम्पत इति तु सत्यम्। किन्तु मासत्रयं यावत् भवता यः नोदनप्रयासः कृतः ततः भवतः हस्तौ, पादौ, स्नायवक्ष शक्तियुक्ताः जाताः। भवता दृढ़कायता प्राप्ता। अतः यत्किमपि कार्य कृर्तं समर्थः भवान्। मया एतदेव इष्टं,, न तु शिलायाः अपसारणम्'' इति अवदत् भगवान्।

**180.** दुर्बलकायः मनुष्य कथम् आसीत्?
(A) निर्धनः (B) बुद्धिमान्
(C) गुणी (D) धनिकः

**181.** भगवतः आदेशेन दुर्बलकायः मनुष्यः कतिदिनानि शिलानोदनम् अकरोत्?
(A) मासद्वयं यावत्
(B) मासत्रयं यावत्
(C) सप्ताहं यावत्
(D) मासं यावत्

**182.** दुर्बलजनेन शिलानोदनकार्यं कारयता भगवता किम् अभीष्टम् आसीत्?
(A) शिलायाः अपसारणं भवेत् इति
(B) शिलाकम्पनं भवेत् इति
(C) दुर्बलः शक्तियुक्तः स्यात् इति
(D) दुर्बलजनस्य धनागमः भवेत् इति

**183.** शक्तिहीनताकारणतः सः दुर्बलः किं न प्राप्नोति स्म?
(A) भृतिकार्यम् (B) आशीर्वादम्
(C) जनापवादम् (D) धनम्

**184.** निर्धनः इति पदस्य विग्रहः कथम् स्यात्?
(A) निः शेषेण धनम् यस्य सः
(B) निर्गतं धनं यस्य सः
(C) निरस्तं धनम्
(D) नास्ति धनम्

**185.** शिलानोदनं कुरु इति कस्य कृते निर्देशः आसीत्?
(A) दुर्बलकायपुरुषस्य कृते
(B) ग्रामवासिनां कृते
(C) शिलायाः कृते
(D) भगवतः कृते

**186.** सः नितरां खिन्नः इति वाक्ये नितराम् इति अव्ययस्य कः अर्थः?

(A) कदाचित् (B) अत्यन्तम्
(C) सहसा (D) सर्वदा

**187.** अलं चिन्तया इति वाक्यस्य अभिप्रायः............
(A) चिन्तां कुरु
(B) व्यर्थचिन्तां कुरु
(C) चिन्ता अलङ्कारसदृशी अस्ति
(D) चिन्तां न कुरु

**निर्देश (प्रश्न संख्या 188 से 194 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारिता–प्रश्नानां विकल्पात्मकोत्तरेभ्य उचिततमम् उत्तरं चित्वा लिखत–

सः कश्चन लघुकुटुम्बः । तस्मिन् पितरौ, पुत्रः, पुत्री च आसन। एकस्मिन् दिने मध्याह्ने पुत्रः भोजनार्थं गृहम् आगतः । माता जलचषकं स्थालिकां च संस्थाप्य अन्नं सारं च पर्यवेषयत्। पुत्रः कवलमात्रं खादित्वा जननीम् अगर्हयत्–''अम्ब! किमिदम् ? सारः सम्पूर्णः लवणमयः । एतत् खादितुं कथं शक्येत? मह्यं भोजनं मास्तु.............''

मातरं भर्त्स्यमानः एव सः कोपेन गृहात् बहिः गतवान्।

सायं दीपज्वालनसमयः अभवत्। तथापि सः युवा पुत्रः गृहं न आगतः। रात्रौ अष्टवादनसमये आगतः सः हस्तपादं प्रक्षाल्य दूरदर्शनस्य पुरतः आसन्दे उपाविशत्, हस्तेन नियंत्रकं (रिमोट्) गृहीत्वा।

निमेषाभयन्तरे पिता पुत्रस्य समीपम्आगतः। तं दृष्ट्वा पुत्रः चिन्तितवान्–'किमिदं पिता मम समीपे एव आगच्छति! एतावत्पर्यन्तम् एकवारमपि जल्पनादिकं तेन न कृतं मया सह। इदानीं मां गर्हयितुम् एव आगच्छन् स्यात् प्रायः सः।

परन्तु अवनतवदनस्य पुत्रस्य पार्श्वे उपविशन् पिता प्रावोचत् चतृन भलानू मध्याह्ने कृतवान् ननु? "

''वत्स ! भवन्तम् एव अहं पृच्छामि । भवान् मध्याह्ने भोजनं कृतवान किम?''

''आम्!'' –किश्चत रूक्षतया अवदन पुत्रः।

''कुत्र ?'' मृदुस्वरेण एव अपृच्छत् पिता।

''मम सुहृदः माम् उपाहारमन्दिरं नीत्वा भोजनं कारितवन्तः '' किञ्चिदपि अविचलितः सन् पुत्रः उक्तवान्।

''सुष्ठु, पुत्र! सुष्ठु। भवान् भोजनं कर्तुम् इच्छति चेत् भवता समग्रे अपि विश्वे गृहाणि प्राप्येरन्। तत्र ते तुभ्यं स्वादु भोजनमपि दद्युः। परन्तु भवतः मात्रे अस्माकं गृहमेव प्रपस्चः। तस्याः लोके अहं, भवान्, भवतः अनुजा च एव वसामः। अस्माकं त्रयाणां हितमेव तस्या लक्ष्यम्। भवता भोजनं न कृतम् इत्यतः सा एतावत्पर्यन्तं बिन्दुमात्रं जलम् अपि न स्वीकृतवती। इतोऽपि तस्याः मनः परितपत् अस्ति–'अद्य मया किं कृतम् ! पाकसमये मम अवधानं कुत्र अगच्छत् ? मम अजागरूकताकारणतः सारः लवणमयः जातः। तदर्थं पुत्रः कञ्चियदपि न भुक्तवान्। सः कुत्र गतवान् स्यात्? क्षुत्पिपासानिवारणार्थं सः कीदृशं कष्टम् अनुभूतवान् स्यात् इति न ज्ञायते ''इति'' इति उक्तवान् पिता।

पितुः हृदयस्पर्शिनी वाणीं श्रुत्वा पुत्रः आत्मावलोकनम् अकरोत्। सावधानतया उत्थाय शनैः शनैः जनयित्र्य समीपम् अगच्छत्। सा म्लानवदना खिन्ना च भूत्वा उपविष्टवती आसीत् तत्र।

पुत्रः विनयेन ताम् उपसर्प्य मृमधुरेण मन्द्रस्वरेण अकथयत्–''अम्ब! महती वुभुक्षा मम। किं न परिवेषयसि अविलम्बेन?'' इति।

**188.** पुत्रं बोधयितुं पितुः वाणी कीदृशी आसीत्?
(A) सान्त्वनाप्रदा (B) कोपकारका
(C) हृदयस्पर्शिका (D) उत्साहवर्धका

**189.** अद्य मया किं कृतम् इति कस्य मनसि विचारः प्राचलत् ?
(A) पुत्रस्य (B) पितुः
(C) अनुजायाः (D) मातुः

**190.** भोक्तुम् इच्छा इत्यर्थे किं पदम् अत्र प्रयुक्तम्?
(A) पिपासा (B) क्षुत्
(C) बुभुक्षा (D) भोजनेच्छा

**191.** जल्पनादिकं तेन न कृतं मया सह इति वाक्यं कस्मिन् वाच्ये लिखितम्?
(A) भाववाच्ये (B) कर्मवाच्ये
(C) कर्मकर्तृवाच्ये (D) कर्तृवाच्ये

**192.** गृहे भोजनं न खादित्वा कः बहिः अगच्छत्?
(A) पुत्रः (B) पुत्री
(C) माता (D) पिता

**193.** यदा पिता पुत्रस्य पार्श्वे उपाविशत् तदा पुत्रः कीदृशः आसीत् ?
(A) ऊर्ध्वमुखः (B) हर्षितः
(C) दुःखितः (D) अधोमुखः

**194.** पुत्रः भोजनं न कृतवान् इत्यतः माता कीदृशी आसीत्?
(A) जलमपि न पीत्वा आसीत्
(B) दूरदर्शनं पश्यन्ती आसीत्
(C) पुत्री पतिं च तर्जयन्ती आसीत्
(D) सन्तुष्टा सती स्वकार्ये निमग्ना आसीत्

**निर्देश (प्रश्न संख्या 195 से 202 तक)**

अधोलिखितं गद्यांशं पठित्वा तदनन्तरं प्रदत्तप्रश्नानां विकल्पात्मकोत्तरेषु उचिततम् उत्तरं चित्वा लिखत।

वृद्धः पिता स्वपुत्रान् कृषिकर्मणः सञ्चालनाय भूयोभूयः प्रेरयति। किन्तु सर्वेऽपि अलसाः पुत्राः न शृण्वन्ति। एकदा स वार्धक्यजनितेन रोगेण ग्रस्तः शय्यासीनो जातः। सः कलहायमानेषु पुत्रेषु सङ्घबद्धतायाः महत्त्वं बोधनाय उपायमचिन्तयत्। सर्वानपि पुत्रान् आहूय स एकस्मै सुबद्धं दण्डचतुष्टयं दत्त्वा अवदत्–त्वमेनं भञ्जय। स कथमपि भङ्क्तुं नाशक्नोत्। तदा अपरः पुत्रः तथैव आदिष्टः। सोऽपि तद्दण्डचतुष्टयं भङ्क्तुं समर्थो न जातः।

इयमेव दशा अपरद्वयोः पुत्रयोः अपि अभवत्। तदा वृद्धः पिता सुबद्धं दण्डचतुष्टयं निर्बध्य एकैकं दण्डं पुत्रेभ्यः दत्तवान्। तं दण्डं त्रोटयितुं स सर्वानपि आदिष्टवान्। सर्वे पुत्राः स्वस्वहस्तस्थितं दण्डं भङ्क्तुं समर्थाः अभवन्। तदा पिता कथितवान् यदि यूयं पृथक् पृथक् तिष्ठथ तदा कश्चित् शत्रुः युष्मान् एकैकान् विनाशयिष्यति। यदि यूयं सर्वे मिलित्वा सुबद्धाः तिष्ठथ तदा कोऽपि बाह्यजनः युष्मान् विनाशयितुं समर्थः न भविष्यति। तस्मात् दिवसात् सर्वेऽपि चत्वारः पुत्राः स्वस्वविचारान् त्यक्त्वा परस्परं मिलित्वा गृहेऽवसन्। पितरं च सेवया स्वस्थम् अकुर्वन्।

**195.** सुबद्धं दण्डचतुष्टयं कथं कृत्वा एकैकं दण्डं पिता पुत्रेभ्यः अयच्छत्?
(A) जलेन अभिसिञ्चय
(B) नीराजनं कृत्वा
(C) निर्बन्ध्य
(D) त्वगपवार्य

**196.** 'यूयम्' इति पदम् कस्मिन् पुरुषे अस्ति?
(A) उत्तमपुरुषे (B) वृद्धपुरुषे
(C) प्रथमपुरुषे (D) मध्यमपुरुषे

**197.** 'गृहीत्वा' इति पदस्य विपरीतार्थकपदम् अनुच्छेदेऽस्मिन् प्रयुक्तः। तच्चित्वा लिखत
(A) संहृत्य (B) आदाय
(C) त्यक्त्वा (D) दृष्ट्वा

**198.** स्वपुत्रान् भूयोभूयः कः प्रेरयति?
(A) भ्राता (B) मित्रम्
(C) माता (D) वृद्धः पिता

**199.** 'आह्वानं कृत्वा' इत्यर्थे कः शब्द अनुच्छेदेऽस्मिन् प्रयुक्तः?
(A) आज्ञापयत् (B) अधावत्
(C) आदिशत् (D) आहूय

**200.** अधोलिखितेषु पदेषु तुमुन् प्रत्ययान्तपदं चिनुत–
(A) भङ्क्तुम् (B) लिखित्वा
(C) भुक्त्वा (D) पीत्वा

**201.** अधोलिखितेषु पदेषु क्त्वा प्रत्ययान्तपदं चिनुत–
(A) दत्त्वा (B) अनुशासनम्
(C) आदाय (D) द्रष्टुम्

**202.** पुत्रेभ्यः इति पदे अनुच्छेदानुसारेण का विभक्तिः?
(A) तृतीया (B) चतुर्थी
(C) प्रथमा (D) द्वितीया

**निर्देश (प्रश्न संख्या 203 से 209 तक)**

अधोलिखित गद्यांशं पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत–

एकदा दरिद्रेभ्यः दातुं कम्बलाः नृपेण चाणक्याय समर्पिताः। चाणक्यस्य उटजं नगराद् बहिः आसीत्। केचन चौराः कम्बलान् अपहर्तुं चिन्तितवन्तः ते रात्रौ चाणक्यस्य उटजं प्राविशन्। तत्र अतीव शैत्यम् आसीत्। चाणक्यः कटे सुप्तः आसीत्। पार्श्वे कम्बलानां राशिः आसीत्। चौराणाम् आश्चर्यम्। चाणक्यः कम्बलं बिना निद्रां करोति। चौराः चौरकर्म न अकुर्वन्। ते चाणक्यं प्रबोधितवन्तः चौराः–चाणक्य महोदय! पार्श्वे कम्बलानां राशिः। शीतकालोऽपि वर्तते। तथापि त्वं किमर्थं भूमौ शयनं करोषि? चाणक्यः उक्वान–कम्बलाः दरिद्रेभ्यः दानाय नृपेण दत्ताः। श्वः प्रभाते वितरणं करिष्यामि। तेषां उपयोगाय नास्ति ममाधिकारः। अहं विरक्तः सदा तृप्तः।

इति श्रुत्वा चौराणां लज्जा उत्पन्ना। अन्येषां वस्तुनाम् उपयोगेन अधर्मः भवति।

**203.** 'दरिद्रेभ्यः' इत्यस्मिन् पदे का विभक्तिः अनुच्छेद–माधृत्य लिखत–
(A) सप्तमी (B) चतुर्थी
(C) प्रथमा (D) द्वितीया

**204.** 'सायंकाले' इति पदस्य विलोमशब्दः अनुच्छेदेऽ–स्मिन् प्रयुक्तः तच्चित्वा लिखत–
(A) प्रभाते (B) रात्रिकाले
(C) मध्याह्नकाले (D) अपराह्णकाले

**205.** चाणक्याय कम्बलाः केन दत्ताः?
(A) भृत्येन (B) चौरेण
(C) मनोहरेण (D) नृपेण

**206.** 'प्रवेशमकुर्वन्' इति पदस्य कृते किं पदम् अनुच्छेदेऽस्मिन् प्रयुक्तः?
(A) अशिक्षयन् (B) अपश्यन्
(C) आदिशन् (D) प्राविशन्

**207.** 'सुप्तः' इति पदे कः प्रत्ययः प्रयुक्तः?
(A) क्त (B) घञ्
(C) क्त्वा (D) तुमुन्

**208.** 'समीपे' इति पदस्य समानार्थकशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः। तच्चित्वा लिखत–
(A) पार्श्वे (B) अन्यस्मिन् ग्रामे
(C) दूरे (D) अतिदूरे

**209.** चाणक्यः कुत्र शयनं करोति स्म?
(A) जले (B) भूमौ
(C) पर्यङ्के (D) वृक्षे

## निर्देश (प्रश्न संख्या 210 से 217 तक)

अधोलिखितं गद्यांशं पठित्वा तदाधारित प्रश्नानां विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चित्वा लिखत।

कस्मिंश्चिन्नगरे मन्थरको नाम तन्तुवायः प्रतिवसति स्म। कदाचित् तस्य सर्वाणि उपकराणि भग्नानि। ततः कुठारमादाय सः काष्ठार्थं वनं गतः। वने एकं शिंशपापादपम् अपश्यत्। सः चिन्तितवान्–महानयं वृक्षः दृश्यते। तदनेन कर्तितेन प्रभूतानि पटकर्मोपकरणानि भविष्यन्ति।

इति विचार्य सः तस्योपरि कुठारम् उत्क्षिप्तवान्।

तस्मिन् वृक्षे कश्चित् यक्षः समाश्रित आसीत्। सः तं तन्तुवायम् उक्तवान्–भोः ! अयं पादपः मम आश्रयः भवति। तस्मादयं सर्वथा रक्षणीयः। यतोऽहमत्र सौख्येन तिष्ठामि। तदाकर्ण्य तन्तुवायः आह–भोः ! अहं किं करोमि। काष्ठसामग्री बिना मे कुटुम्बः बुभुक्षया पीड्यते। तस्मात्त्वम् अन्यत्र गम्यताम्। अहम् एनं कर्तिष्यामि। यक्ष आह–भोः ! अहं तुष्टोऽस्मि। तत्प्रार्थ्यतामभीष्टम् एनं पादपं च रक्ष। तदा तन्तुवायः अवदम्–इदानीं स्वगृहं गत्वा स्वमित्रं स्वभार्याम् च पृष्ट्वा आगमिष्यामि। यक्षः अनुमतिं दत्तवान्।

**210.** रक्षायाः योग्यः इत्यर्थे कः पदः अनुच्छेदे प्रयुक्तः तच्चित्वा लिखत–
(A) रक्षणीयः (B) सेचनीयः
(C) पठनीयः (D) दर्शनीयः

**211.** 'परिवारः' इति शब्दस्य समानार्थकः शब्दः अनुच्छेदे प्रयुक्तः। तच्चित्वा लिखत
(A) कुटुम्बः (B) जलराशिः
(C) ग्रामः (D) देशः

**212.** भोः ! अहं तुष्टोऽस्मि इति कः अवदत्?
(A) यक्षमित्रम् (B) यक्षपत्नी
(C) तन्तुवायः (D) यक्षः

**213.** तन्तुवायस्य नाम किम् आसीत्?
(A) मुद्रिलः (B) आतपः
(C) यक्षः (D) मन्थरकः

**214.** कुठारमादाय सः वनं किमर्थं गतः?
(A) काष्ठार्थम् (B) भ्रमणार्थम्
(C) धनार्थम् (D) बलार्थम्

**215.** 'अचिन्तयत्' इति पदस्य समानार्थकः शब्दः अनुच्छेदेऽस्मिन् प्रयुक्त। तच्चित्वा लिखत
(A) लिखितवान् (B) दृष्टवान्
(C) चिन्तितवान् (D) पठितवान्

**216.** 'तरुः' इति पदस्य पर्यायः भवति
(A) जम्बीरम् (B) भ्रमरः
(C) वृक्षः (D) नदी

**217.** 'अल्पानि' इति पदस्य विलोमशब्दः अनुच्छेदे प्रयुक्तः तच्चित्वा लिखत–
(A) कूष्माण्डम् (B) भर्तृहरिः
(C) प्रभूतानि (D) नारिकेलम्

## निर्देश (प्रश्न संख्या 218 से 224 तक)

अधोलिखितं गद्यांशं पठित्वा तदाधारित प्रश्नानां विकल्पात्मकोत्तरेभ्य उचिततमम् उत्तरं चित्वा लिखत।

उदयनः नाम कोऽपि भूपः आसीत्। एकदाः सः निजभवने सुखं सुप्तः। तदा सः स्वप्ने त्रीन् मूषकान् अपश्यत्। तेषु एकः पुष्टाङ्गः, अपरः कृशतनुः तृतीयस्तु सर्वथा अन्धः एव आसीत् प्रातः प्रतिबुध्य उदयनः विख्यातं शकुनज्ञम् आहूय तम् अपृच्छत् 'भद्र अद्य प्रत्यूषे मया एकः स्वप्नः दृष्टः। अहं त्रीन् मूषकानपश्यम्। तेषु एकः पुष्टाङ्गः, अपरः कृशतनुः तृतीयः तु सर्वथा अन्धः एव आसीत्। अस्य स्वप्नस्य कः अर्थः इति कथय।

शकुनज्ञः प्रत्युत्पन्नमतिः आसीत् सः नृपम् अवदत् हे राजन् ! यः पुष्टाङ्गः मूषकः तं त्वं स्वसचिवम् अवगच्छ। यः कृशतनुः मूषकः तम् आत्मनः प्रजाजनं मन्यस्व। यः सर्वथा अन्धः तं तु आत्मानमेव अवगच्छ।

**218.** 'अल्पज्ञातः' इति पदस्य विलोमशब्दः अनुच्छेदेऽ–स्मिन् प्रयुक्तः तच्चित्वा लिखत
(A) अज्ञातः (B) हरिः
(C) विख्यातः (D) न ख्यातः

**219.** स्वीकुरुष्व इति पदस्य समानार्थकः शब्द अनुच्छेदेऽस्मिन् प्रयुक्तः तच्चित्वा लिखत।
(A) धावतु (B) पठतु
(C) मन्यस्व (D) न मन्यस्व

**220.** भूपस्य नाम किम् आसीत्?
(A) जाबालिः (B) कपोतः
(C) चत्वरः (D) उदयनः

**221.** तृतीयः मूषकः कथमासीत्?
(A) सर्वथा अन्धः (B) सर्वथा अजः
(C) पुष्टाङ्गः (D) कृशाङ्गः

**222.** 'शकुनं जानाति' इत्यस्य कृते कः शब्दः भवति?
(A) रोगज्ञः (B) मित्रज्ञः
(C) शंकुनज्ञः (D) मन्त्रज्ञः

**223.** 'सर्वप्रकारेण' इत्यस्य कृते कः शब्दः अनुच्छेदे प्रयुक्तः तच्चित्वा लिखत–
(A) सर्वथा (B) यथा तथा
(C) अन्यथा (D) यथा

**224.** 'जानीहि' इत्यस्य पदस्य कृते कः शब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः। तल्लिखत–
(A) अनुचर (B) अनुधाव
(C) अवगच्छ (D) अनुगच्छ

## निर्देश (प्रश्न संख्या 225 से 250 तक)

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

उत्सवे, व्यसने, दुर्भिक्षे, राष्ट्रविप्लवे, दैनन्दिनव्यवहारे च यः सहायता करोति सः बन्धुः भवतिः यदि विश्वे सर्वत्र एतादृशः भावः भवेत् तदा विश्वबन्धुत्वं सम्भवति।

परन्तु अधुना निखिले संसारे कलहस्य अशान्तेः च वातावरणम् अस्तिः मानवाः परस्परं न विश्वसन्ति। ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति। अपि च समर्थाः देशाः असमर्थान् देशान् प्रति उपेक्षाभावं प्रदर्शयन्ति, तेषाम् उपरि स्वकीयं प्रभुत्वं स्थापयन्ति। संसारे सर्वत्र विद्वेषस्य, शत्रुतायाः, हिंसायाः च भावना दृश्यते। देशानां विकासः अपि अवरुद्धः भवति।

इयं महती आवश्यकता वर्तते यत् एकः देशः अपरेण देशेन सह निर्मलेन हृदयेन बन्धुतायाः व्यवहारं कुर्यात्। विश्वस्य जनेषु इयं भावना आवश्यकी। ततः विकासिताविकासितदेशयोः मध्ये स्वस्था स्पर्धा भविष्यति। सर्वे देशाः ज्ञानविज्ञानयोः क्षेत्रे मैत्रीभावनया सहयोगेन व समृद्धि प्राप्तुं समर्थाः भविष्यन्ति।

**225.** विश्व सर्वत्र कीदृशः यावः भवेत्
(A) विश्वबन्धुत्वभावः (B) उपेक्षाभावः
(C) हिंसाभावः (D) विकासभावः

**226.** निखिले संसारे कलहस्य अशान्तेः वा वातावरणस्य कारणम्–
(A) सहायता–अभावः (B) विश्वासाभावः
(C) विकासाभावः (D) व्यवहाराभावः

**227.** बहुविषयेषु यः सहायतां करोति, सः भवति–
(A) मित्रम् (B) शत्रुः

(C) बन्धुः (D) सेवकः

**228.** ज्ञानविज्ञानयोः क्षेत्रे समृद्धिं प्राप्तुं का भावना अपेक्षिता भवति ?
(A) स्पर्धाभावना
(B) प्रभुत्वभावना
(C) विश्वबन्धुत्वभावना
(D) मैत्रीभावना

**229.** एतादृशः' इति पदं कस्मिन् गणे अन्तर्भवति ?
(A) नामवाचके (B) सर्वनाम्नि
(C) क्रियाविशेषणे (D) क्रियायाम्

**230.** 'कुर्यात्' कि पदं कस्मिन् लकारे प्रयुक्तम् ?
(A) लट् (B) लिङ्
(C) लोट् (D) लङ्

**231.** 'सहयोग' शब्दस्य पर्यायः अस्तिः
(A) योगाभ्यासः (B) सहकारः
(C) आविष्कारः (D) गणनम्

**232.** संसारे सर्वत्र किं दृश्यते ?
(A) विद्वेषः (B) शत्रुता
(C) हिंसा (D) उपर्युक्तं सर्वमपि

**निर्देश (प्रश्न संख्या 233 से 239 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

विश्वस्य उपलब्धासु भाषासु संस्कृतभाषा प्राचीनतमा भाषास्ति। भाषेयम् अनेकानां भाषाणां जननी मता। प्रचीनयोः ज्ञानविज्ञानयोः निधिः अस्यां सुरक्षितः संस्कृतस्य महत्त्वविषये केनापि कथितम्—''भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा''।

इयं भाषा अतीव वैज्ञानिकी। केचन कथयन्ति यत् संस्कृतमेव सङ्गणस्य कृते सर्वोत्तमा भाषा। अस्याः वाङ्मयं वेदैः पुराणैः नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदासादीनां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। कौटिल्यरचितम् अर्थाशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमम् आर्यभट्टः अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। संस्कृते यानि अन्यानि शास्त्राणि विद्यन्ते तेषु वास्तुशास्त्रं, रसायनशास्त्रं, खगोलविज्ञानं, ज्योतिषशास्त्रं, विमानशास्त्रम् इत्यादीनि उल्लेखनीयनि।

संस्कृते विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति। यथा—

सत्यमेव जयते। वसुधैव कुटुम्बकम् विद्ययाऽमृतमश्नुते, योगः कर्मसु कौशलम् इत्यादयः। सर्वभूतेषु आत्मवत् व्यवहारं कर्तुं संस्कृतभाषा सम्यक् शिक्षयति।

**233.** 'प्रतिष्ठे' इति पदं कस्यां विभक्तौ अस्ति ?
(A) सम्बोधन–एकवचने
(B) प्रथमाद्विवचने
(C) सप्तमी–एकवचने
(D) सप्तमीद्विवचने

**234.** ज्ञानविज्ञानयोः निधिः कस्यां सुरक्षितः ?
(A) संस्कृतभाषायाम् (B) प्रतिष्ठायाम्
(C) संस्कृतौ (D) चिकित्सायाम्

**235.** 'सूक्ति' शब्दस्य कोऽर्थः ?
(A) मन्त्रः (B) पद्यम्
(C) सुभाषितम् (D) ऋक्

**236.** कस्मिन् शास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम् ?
(A) गणितशास्त्रे (B) वास्तुशास्त्रे
(C) विमानशास्त्रे (D) चिकित्साशास्त्रे

**237.** ''भारतस्य प्रतिष्ठे द्वे संस्कृत संस्कृतिस्तथा' — इति केनोक्तम् ?
(A) कालिदासेन (B) केनापि
(C) विश्वनाथेन (D) दण्डिना

**238.** सर्वभूतेषु आत्मवत् व्यवहारं कर्तुं संस्कृतभाषा शिक्षयति चेत् तेन किं प्राप्यते ?
(A) आत्मज्ञानम् (B) व्यवहारज्ञानम्
(C) भाषाज्ञानम् (D) समानता

**239.** 'सङ्गणक' शब्दस्य कोऽर्थः ?
(A) केल्क्युलेटर (Calculator)
(B) कम्प्यूटर (Computer)
(C) गणितम् (Mathematics)
(D) अबाकस् (Abacus)

**निर्देश (प्रश्न संख्या 240 से 246 तक)**

अधोलिखितं गद्यांश पठित्वा प्रश्नानां विकल्पात्मकोत्तेरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

एकस्मिन्नगरे धनधान्यसम्पन्न आसीत् एकः कृषीवलः। तस्य प्राङ्गणे सुपुष्टा बहुदुग्धदा कपिला नाम धेनुः बद्धा आसीत्। एकदा विभावर्यां या धेनुः केनापि चौरेण हृता। अथ स कृषकः अन्यां धेनुं क्रेतुं हट्टदिवसे सुदूरवर्ति किमपि नगरम् अगच्छत्। तत्र तु विक्रयार्थमानीतासु धेनुषु स्वकीया धेनुः अनेन दृष्टवैवाभिज्ञाता। ततः सपदि एव धेनोः समीपं गत्वा उच्चैः अभाषतः—भोः जनाः मदीया इयं धेनुः अत्र तिष्ठति। चत्वारि दिनान्यतीतानि मम गृहात् अस्याः मुषितायाः।

ततः तस्याः धेनोः मिथ्यास्वामी सः पाटच्चरः दाक्षिण्यगर्भया वाण्या अब्रवीत्—''भद्रमुख, मोहमापादिता ते दृष्टिः। इदानीं संवत्सराप्यधिकं कालम् एषा धेनुः तत्सकाशे वर्तते। कदाचित् आकारसदृशेन त्वदीयधेनोः अनुकुर्यात्। परं मदीया एव इयं गौरित्यत्र नास्ति संदेहः'' इति।

एतदाकर्ण्य सः कृषीवलः सत्वरं तस्याः धेन्वाः अक्षिणी पाणिभ्यां पिधाय तं मिथ्यास्वामिनमभाषत—'यदि इयतः दिवसान् धेनुरियं तव गृहे तिष्ठति तर्हि त्वया परीक्षिता स्यात्। तत् वद कतरेण नेत्रेण काणा इयम् ? इति। अपि च केन नाम्ना आहूता सा सत्वरमागच्छति ?'' इति। स अपि प्रत्यग्रमुषितायास्तस्या धेनोः अवयवविशेषान् नावगच्छति। सम्भ्रान्तः सः किमपि वक्तव्यमित्यतः ''वामेन लोचनेन काणा'' इति अगदत्।

कृषीवलः तं वञ्चयितुं पुनः प्राह, ''सखे, सम्यक् विमृश्य एव वद'' इति। ततः अधिकमेव सम्मोहितः सः स्तेनः प्रत्यवदत्—''आं, विस्मृतं खलु मया। न वामेन परं दक्षिणेन एव नेत्रेण काणा ममैषा धेनुः। मया प्रमादात् प्रथमं विपरीतमेवाभिहितम्। वस्तुतः तु दक्षिणम् एव अस्याः चक्षुः विकलम्'' इति। तदनन्तरं सः स्वामी धेनुनयनाभ्यां पाणी अपनीय प्रोच्चैः अगर्जत्, ''पश्यत भोः जनाः पश्यत। अयं पुरुषः चौर्यनिपुणः अनृतवादी च इति।

सिद्धम् एव इदानीम्। मम धेनोः केनापि नयनेन न काणा। केवलं दुरात्मानं अस्य चौर्यशीलं मिथ्यावादीं च व्यक्तीकर्तुं मया अयं प्रश्नः कृतः भवन्तः अधुना पश्यन्तु'' इति।

''अयि कपिले, आगच्छ, आगच्छ'' इति तेन परमस्नेहेमाहूता सा गले रज्जुबद्धापि तं कृषीवलं प्रति आगन्तुं प्रायतत। सर्वे समीपवर्तिनः जनाः ''सम्यक् गृहीतः चौरः'' इति निनादमकुर्वन्। स तस्करोऽपि राजपुरुषैः निरुध्य न्यायाध्यक्षस्य पुरतः नीतः। कृषीवलः स्वकीयां धेनुमविन्दत आनन्दितः च अभवत्। सर्वे जनाः कृषकस्य चातुर्यं प्राशंसन्।

**240.** 'कृषक' इति पदस्य पर्यायो भवति
(A) लिपिकः (B) धनपालः
(C) द्वारपालः (D) कृषीवलः

**241.** अनुच्छेदेऽस्मिन् 'गौः' इति पदस्य कृते किं पदं प्रयुक्तम् ?
(A) धेनुः (B) रासभी
(C) घोटकः (D) महिषी

**242.** ''मोहमापदिता ते दृष्टिः' इति कः अवदत् ?
(A) आपणिकः (B) पन्थाः
(C) कृषीवलः (D) मिथ्यास्वामी

**243.** ''कतरेण नेत्रेण काणा इयम्'' इति कोऽवदत् ?
(A) वृक्षस्वामी (B) वस्त्रस्वामी
(C) मिथ्यास्वामी (D) कृषीवलः

**244.** 'प्राह' इति पदस्य पर्यायो भवति :
(A) अगच्छत् (B) अधावत्
(C) अवदत् (D) अशृणोत्

**245.** धेनोः नाम किम् आसीत् ?
(A) कपिला (B) प्रियंवदा
(C) नन्दिनी (D) शंखिनी

**246.** सर्वे जनाः कृषकस्य किं प्राशंसन् ?
(A) स्वरूपम् (B) गोत्रम्
(C) धनम् (D) चातुर्यम्

**निर्देश (प्रश्न संख्या 247 से 254 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

अस्मांक संरक्षणाय सम्वर्धनाय च प्रकृतिः सदैव यत्नं करोति। सागराः, पर्वताः, वनानि, नद्यः, सरांसि सर्वाणि जगतः सुखानि सम्वर्धयन्ति। प्रसन्नाः तरवः वायोः विकारान् स्वयं पिबन्ति, अस्मभ्यं स्वास्थ्यप्रदं वायुमण्डलं च प्रयच्छन्ति। पत्राणि, पुष्पाणि, वनानि, फलानि प्रदाय इमे अस्मान् बहु उपकुर्वन्ति।

वातावरणस्य वायोश्च परिशोधनं कुर्वन्ति। वनानि एव

वन्यप्राणिनः सागरजन्तवश्चापि पर्यावरणस्य सन्तुलनं स्थापयन्ति।

सम्प्रति तैलचालितानि यानानि यन्त्राणि च स्वकीयैः धूमैः स्वस्थं वायुमण्डलं भृशं प्रदूषयन्ति। वायुप्रदूषणं प्रतिक्षणं वर्धते। शिलाखण्डान्विदार्य वनानि च विच्छिद्य निर्मितेषु गिरिमार्गेषु यानानि धावन्ति। अस्त्राणांपरीक्षणैः समुद्रस्य वातावरणं प्रदूष्यते।

यथा यथा प्रवर्धते प्रस्तरमयाणां मार्गाणां संख्या तथा तथा वर्धन्ते प्रदूषणप्रस्तरकाणि यानानि यन्त्राणि च। एतद् विपरीतं तथा न वर्धन्तेवायुमण्डलस्य परिशोधन–साधनानि। स्वल्पतराय लाभाय लोभात् अज्ञानात्वा जनाः स्वकीयं बहु विनाशयन्ति। वन्यप्राणिनः मनोविनोदाय हिंसन्ति।

कतिपयप्राणीनां लोभेन वनानि छिन्दन्ति। प्रदूषितैः जलैः गङ्गाकावेरी प्रभृति नदीनां नीराणि परिदूषयन्ति समुद्र–प्राणिनां हिंसनं यत्नेन कुर्वन्ति अनेन जले स्थले गगने च सर्वत्र प्रदूषणं वर्धते। अतः वनानि यत्नतः रक्षणीयानि। ग्रामेषु नगरेषु स्थाने स्थाने उद्यानानि समारोपणीयानि। शाकवाटिकानां सम्वर्धनं करणीयम्। वन्यप्राणिनां संरक्षणाय अरण्यानां संख्या वर्धनीया। वृक्षाणाम् उच्छेदः रोधनीयः, येन सागराः निर्बाधं समुल्लसन्तु, गगनमण्डलं स्वच्छं भवतु। पर्वतेषु ओषधयः नदीस्रोतांसि च सम्वर्धन्ताम्।

**247.** 'सदैव' इति अस्य पर्यायो भवति–

(A) ह्यः (B) रात्रिः
(C) अधुना (D) सर्वदा

**248.** सामान्यतया प्रकृतिः जगतः किं वर्धयति ?

(A) कष्टम् (B) खेदम्
(C) दुःखम् (D) सुखम्

**249.** प्रसन्नाः तरवः किं दूरीकुर्वन्ति ?

(A) पत्राणां सौन्दर्यम् (B) फलानां माधुर्यम्
(C) वायोः विकारान् (D) वृक्षस्य पत्राणि

**250.** तैलचालितयानानि वायुमण्डलं कथं दूषयन्ति ?

(A) स्थितिभिः (B) यन्त्रैः
(C) धूमैः (D) गतिभिः

**251.** जनाः वन्यप्राणिनः किमर्थं हिंसन्ति ?

(A) शिक्षार्जनाय (B) सेतुहेतवे
(C) जनकल्याणाय (D) मनोविनोदाय

**252.** 'स्वस्थम्' इति पदस्य विलोमपदं भवति–

(A) आराधनम् (B) अध्ययनम्
(C) अस्वस्थम् (D) आस्वाद्यम्

**253.** अनुच्छेदेऽस्मिन् कः संकल्पः ?

(A) वृक्षाणां विनाशः करणीयः
(B) वृक्षाणां कृते किमपि न करणीयः
(C) वृक्षाणाम् उच्छेदः सर्वदा करणीयः
(D) वृक्षाणाम् उच्छेदः रोधनीयः

**254.** पर्वतेषु केषां वृद्धिः भवेत् ?

(A) यानानाम् (B) प्रदूषणानाम्
(C) ओषधीनाम् (D) यन्त्राणाम्

## निर्देश (प्रश्न संख्या 255 से 262 तक)

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

एकस्मिन्नगरे धनधान्यसम्पन्न आसीत् एकः कृषकः। तस्य प्राङ्गणे सुपुष्टा बहुदुग्धदा कपिला नाम धेनुः बद्धा आसीत्। एकदा विभावर्यां सा धेनुः केनापि चौरेण हृता। अथ सः कृषकः अन्यां धेनुं क्रेतुं हट्टदिवसे सुदूरवर्ति किमपि नगरम् अगच्छत्। तत्र तु विक्रयार्थमानीतासु धेनुषु स्वकीया धेनुः अनेन दुष्ट्वैवाभिज्ञाता। ततः सपदि एव धेनोः समीपं गत्वा उच्चैः अभाषत–''भोः जनाः मदीया इयं धेनुः अत्र तिष्ठति। चत्वारि दिनान्यतीतानि मम गृहात् अस्याः मुषितायाः।''

ततः तस्याः धेनोः मिथ्यास्वामी पाटच्चरः दाक्षिण्यगर्भया वाण्या अब्रवीत्–''भद्रमुख, मोहमापादिता ते दृष्टिः। इदानीं संवत्सराप्यधिकं कालं एषा धेनुः मत्सकाशे वर्तते। कदाचित् आकारसदृशेन त्वदीयधेनोः अनुकुर्यात्। परं मदीया एव इयं गौरित्यत्र नास्ति संदेहः'' इति।

एतदाकर्ण्य सः कृषकः सत्वरं तस्याः धेन्वाः अक्षिणी पाणिभ्यां पिधाय तं मिथ्यास्वामिनमभाषत–''यदि इयतः दिवसान् धेनुरियं तव गृहे तिष्ठति तर्हि त्वया परीक्षिता स्यात्। तत् वद कतरेण नेत्रेण काणा इयम् ? इति। अपि च केन नाम्ना आहूता सा सत्वरमागच्छति'' ? इति। स अपि प्रत्यग्रमुषितायास्तस्या धेनोः अवयवविशेषान् नावगच्छति। सम्भ्रान्तः सः किमपि वक्तव्यमित्यतः ''वामेन् लोचनेन काणा'' इति अगदत्।

कृषकः तं वञ्चयितुं पुनः प्राह, ''सखे, सम्यक् विमृश्य एव वद'' इति। ततः अधिकमेव संमोहितः सः स्तेनः प्रत्यवदत्–''आं, विस्मृतं खलु मया। न वामेन परं दक्षिणेन एव नेत्रेण काणा ममैषा धेनुः। मया प्रमादात् प्रथमं विपरीतमेवाभिहितम्। वस्तुतः तु दक्षिणम् एव अस्याः चक्षुः विकलम्'' इति।

तदनन्तरं सः स्वामी धेनुनयनाभ्यां पाणी अपनीय प्रोच्चैः अगर्जत्, ''पश्यत भोः जनाः, पश्यत। अयं पुरुषः चौर्यनिपुणः अनृतवादी च इति सिद्धम् एवं इदानीम्। मम धेनुः केनापि नयनेन न काणा। केवलं दुरात्मनः अस्य चौर्यशीलं मिथ्यावादं च व्यक्तीकर्तुं मया अयं प्रश्नः कृतः। भवन्तः अधुना पश्यन्तु'' इति।

''अयि कपिले, आगच्छ, आगच्छ'' इति तेन परमस्नेहेनाहूता सा गले रज्जुबद्धापि तं कृषकं प्रति आगन्तुं प्रायतत। सर्वे समीपवर्तिनः जनाः ''सम्यक् गृहीतः चौरः'' इति निनादमकुर्वन्। स तस्करोऽपि राजपुरुषैः निरुध्य न्यायाध्यक्षस्य पुरतः नीतः। कृषकः स्वीयां धेनुमविन्दत आनन्दितः च अभवत्। सर्वे जनाः कृषकस्य चातुर्यं प्राशंसन्।

**255.** धनधान्यसम्पन्नः कः आसीत् ?

(A) कृषकः (B) पत्रवाहकः
(C) पत्रलेखकः (D) पत्रवाचकः

**256.** तस्य धेनोः किं नाम ?

(A) अजातशत्रुः (B) मालती
(C) कपिला (D) नन्दिनी

**257.** 'समीपम्' इति पदस्य कृते को शब्दः प्रयुज्यते ?

(A) सुदूरम् (B) निकटम्
(C) दूरम् (D) अतिदूरम्

**258.** 'अवदत्' इति पदस्य कृते प्रथमेऽनुच्छेदे कः शब्दः प्रयुक्तः ?

(A) अलभत् (B) अगायत्
(C) अहसत् (D) अभाषत

**259.** 'एतदाकर्ण्य' इति शब्दस्य स्थाने कोऽन्यः शब्दः प्रयोक्तुं शक्यते ?

(A) इत्थं विचार्य (B) एतदुक्त्वा
(C) एतत् श्रुत्वा (D) एतदवलोक्य

**260.** 'स्तेनः' इति पदस्य कः पर्यायः ?

(A) धर्मरक्षकः (B) चौरः
(C) सत्यवादी (D) धर्मात्मा

**261.** राजपुरुषैः निरुध्य न्यायाध्यक्षस्य पुरतः कः नीतः?

(A) धेनुः (B) तस्करः
(C) निर्मलः (D) वस्त्रम्

**262.** सर्वे कस्य चातुर्यं प्राशंसन् ?

(A) ग्रामवासिनाम् (B) बालस्य
(C) कृषकस्य (D) अधिवक्तुः

## निर्देश (प्रश्न संख्या 263 से 269 तक)

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

कस्मिंश्चिद्वने द्वौ वृषभौ आस्ताम्। हरितानि शष्पाणि भक्षयन्तौ तौ परां पुष्टिमगच्छताम्। तौ परस्परं सुहृदावास्तां सहैव चातिष्ठताम्। तस्मिन्नेव वने एकः सिंहोऽप्यासीत्। सः सदैवैतौ वृषभौ दृष्ट्वा चिन्तयति स्म ''यद्यहमेतयोः मांसं लभेय, तर्हि सुखं भवेत्। सानन्दं च मम कालः गच्छेत्''।

परं सिंहः एकमपि वृषभं मारयितुं समर्थः नासीत्। यतः तौ सदैव सहैवातिष्ठताम्। यदि कदाचित् सिंहः एकं प्रहर्तुं कामयेत्, तर्हि द्वितीयः सिंहमेव स्वश्रृंगेण विदारयितुं सिद्धः भवेत्। अतः सः तौ प्रहर्तुमसमर्थ आसीत्।

एकदा सिंहेन मनसि चिन्तितम्–''यद्यहमेतयोः भेदमुत्पादयामि तर्ह्यवश्यमहं सफलो भविष्यामि''। इति विचिन्तयन् स एकदा तौ वृषभौ शृंभाग्यां परस्परं स्नेहेन क्रीडन्ता व पश्यत्। यथाकालं सः तयोः समीपमगच्छत् एकं वृषभं चावदत्–''मूर्ख! अतीव दुर्बलोऽसि त्वं, यद् द्वितीयस्त्वां पश्चादपसारयति''।

सिंहस्य वाक्यं श्रुत्वा प्रथमः वृषभः द्वितीयं बलेन अपाकरोत्। तदा सिंहस्तमवतद.....''मूर्ख! त्वन्तु अतीव दुर्बलः। एकेनैव प्रहारेण पश्चात् गतोऽसि''।

एवं सिंहः तौ यदा प्रोदसाहयत्, तदा तौ परस्परं सत्यमेव योद्धुमारभेताम्। तदैको वृषभो द्वितीयेन तथा प्रहृतः यथा तस्य वक्षसः रुधिरं अस्रवत्। पीडया च सः दूरमधावत्।

एवं तयोर्भेदः उत्पन्नोऽभवत्। कोऽपि द्वितीयेन सह नातिष्ठत् न चावदत्। सदैव च दूरेऽतिष्ठताम्। एकदा सिंह एकं वृषभमेकाकिनं चरन्तमपश्यत्। दृष्ट्वैव च सः तं प्राहरत्, नखैः विदार्य चाभक्षयत्।

तदनन्तरं सः द्वितीयमपि वृषभं तथैव हत्वाऽभक्षयत्। एवं द्वावेव सुहृदौ भेदेन नष्टौ। सत्यमेव कथ्यते–

"संघे शक्तिः, भेदे नाशः।"

**263.** कस्मिंश्चिद्वने द्वौ कौ आस्ताम् ?
(A) गजौ (B) शृगालौ
(C) वृषभौ (D) चक्षुषी

**264.** 'विलोक्य' इति परदस्य कृते प्रथम अनुच्छेदे किं पदं प्रयुक्तम् ?
(A) शयनं कृत्वा (B) धावनं कृत्वा
(C) गर्जनं कृत्वा (D) दृष्ट्वा

**265.** 'मारयितुम्' इति पदस्य कः पर्यायः ?
(A) जेतुम् (B) हन्तुम्
(C) भोक्तुम् (D) पातुम्

**266.** 'त्वं तु अतीव दुर्बलः' इति कः अवदत् ?
(A) सूकरः (B) घोटकः
(C) कर्मचारी (D) सिंहः

**267.** कस्य वचोभिः वृषभयोः भेदः उत्पन्नोऽभवत् ?
(A) सिंहवचोभिः (B) मार्जारी वचोभिः
(C) धेनुवचोभिः (D) मातृवचोभिः

**268.** एकदा सिंहः कीदृशं वृषभम् अपश्यत् ?
(A) मानवैः सह चरन्तम्
(B) एकाकिनं चरन्तम्
(C) घोटकेन सह चरन्तम्
(D) मृगेण सह चरन्तम्

**269.** संघे किं भवति ?
(A) शक्तिः (B) हानिः
(C) रोगः (D) शक्तिहीनता

**निर्देश (प्रश्न संख्या 270 से 275 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेभ्यः समुचितम् उत्तरं चित्वा लिखत।

सूर्यः अचलः पृथिवी च चला। पृथिवी स्वकीये अक्षे घूर्णति इति सुस्थापितः सिद्धान्तः वर्तते। अयं सिद्धान्तः महता गणितज्ञेन ज्योतिर्विदा आर्यभटेन प्रवर्तितः। तेनोदाहृतं यद् गतिशीलायां नौकायाम् उपविष्टः जनः नौकां स्थिरामनुभवति, अन्यान् च पदार्थान् गतिशीलानवगच्छति। एवमेव गतिशीलायां पृथिव्याम् अवस्थितः मानवः पृथिवीं स्थिरामनुभवति सूर्यादिग्रहान् च गतिशीलान् वेत्ति। आर्यभटेन 'पृथिवी स्थिरा वर्तते' इति प्रचलिता रूढिः प्रत्यादिष्टा।

आर्यभटेन विरचिते 'आर्यभटीयम्' इति ग्रन्थे उल्लिखितमस्ति यत्तस्य जन्म **476** तमे खीष्टाब्दे अभवत्। ऐतिहासिक-स्रोतोभिः ज्ञायते यत् पाटलिपुत्रं निकषा आर्यभटस्य वेधशाला आसीत्। अतः अनुमीयते यत्तस्य कर्मभूमिः पाटलिपुत्रम् आसीत्।

आर्यभटस्य योगदानं गणितज्योतिषा सम्बद्धं वर्तते, यत्र संख्यानाम् आकलनं महत्त्वम् आदधाति। तेन गणित-पद्धत्या कृतम् आकलनमाधृत्य एव प्रतिपादितं यद्ग्रहणे राहु-केतुनामकौ दानवौ कारणं नास्ति। तत्र सूर्य-चन्द्र पृथिवीति त्रीणि एव कारणानि सन्ति। सूर्यं परितः भ्रमन्त्याः पृथिव्याः यदा चन्द्रस्य परिक्रमापथेन संयोगः भवति तदा ग्रहणं जायते। यदा पृथिव्याः छायापातेन चन्द्रस्य प्रकाशः अवरुध्यते तदा चन्द्रग्रहणं भवति। तथैव पृथिवीसूर्ययोः मध्ये समागतस्य चन्द्रस्य छायापातेन सूर्यग्रहणं दृश्यते। अनेन भारतीयज्योतिःशास्त्रे आर्यभटस्य महान् विरोधः अभवत्। यतः समाजे नूतनविचाराणां स्वीकारे सामान्यजनाः काठिन्यमनुभवन्ति। पुनः आधुनिकैः वैज्ञानिकैः आर्यभटे तस्य सिद्धान्ते च विचारः पारितः। अस्मात् कारणादेव अस्माकं प्रथमोपग्रहस्य नाम 'आर्यभट' इति कृतम्।

**270.** आर्यभटेन कः सिद्धान्तः प्रतिपादितः?
(A) सूर्यः चलः पृथिवी अचला
(B) पृथिवी स्थिरा सूर्यः अचलः
(C) सूर्यः अचलः पृथिवी च चला
(D) पृथिवी चला सूर्यश्च चलः

**271.** तेन प्रतिपादितं यद्ग्रहणे
(A) पृथिव्याः छायया चन्द्रस्य प्रकाशावरोधः कारणम्
(B) राहुकेतुनामकौ दानवौ कारणम्
(C) सूर्य-चन्द्र पृथिवीति त्रीणि कारणम्
(D) चन्द्रस्य परिक्रमापथेन पृथिव्याः संयोगः कारणम्

**272.** आर्यभटेन प्रचलिता रूढिः प्रत्यादिष्टा
(A) पृथिवी स्थिरा वर्तते
(B) पृथिवी चला वर्तते
(C) गतिशीला नौका स्थिरा वर्तते
(D) सूर्यादिग्रहाः गतिशीलाः

**273.** आर्यभटस्य वेधशाला आसीत्
(A) जयपुरनगरं निकषा
(B) दिल्लीनगरं निकषा
(C) तिरुअनन्तपुरं निकषा
(D) पाटलिपुत्रनगरं निकषा

**274.** 'घूर्णति' इति पदस्य कोऽर्थः ?
(A) स्थापयति (B) परिरक्षति
(C) परिभ्रमति (D) प्रविशति

**275.** 'परितः' इति पदस्य योगेन किं रूपं भवति?
(A) सूर्येण परितः (B) सूर्यम् परितः
(C) सूर्य परितः (D) सूर्यस्य परितः

**निर्देश (प्रश्न संख्या 276 से 284 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेभ्यः समुचितम् उत्तरं चित्वा लिखत।

विगते वर्षे सर्वे विद्यार्थिनः पर्यटनार्थं कञ्चनवनप्रदेशं गतवन्तः। तत्र तेषां रात्रिनिवासस्य योजना परिकल्पिता आसीत्। अपराह्णे ते तत्रत्यपथिकनिवासं प्राप्तवन्तः। शिक्षकः तान् निरदिशत् "अद्य वयं अस्मिन्नेव पथिकनिवासे वासं करिष्यामहे। इदानीं पर्याप्तसमयः वर्तते। भवन्तः परितः अवलोकयन्तु। परिवेशः अतीवरमणीयः वर्तते। सर्वत्र बहुविधाः तरवः शोभन्ते। पवनेन लताः कम्पन्ते, पक्षिणः इतस्ततः डयन्ते। कपयः एकस्मात् वृक्षात् वृक्षान्तरं प्रति कूर्दन्ते।" इति।

वस्तुतः अरण्यस्य परिवेशः न केवलं पशूनां पक्षिणां च कृते किन्तु वृक्षाणां, लतानां, सस्यानां च कृते अपि स्वास्थ्यकरः वर्तते। तत्रत्यां शान्तिं भङ्क्तुम् कस्यापि अधिकारः नास्ति। अरण्ये पशवः पक्षिणश्च स्वेच्छया विहरन्ते। स्वच्छन्दविहारेण तेषां मनांसि रमन्ते। बहुविधाः वृक्षाः, लताः च अरण्ये स्वयमेव उत्पद्यन्ते, वर्धन्ते च। अनेकविधानि अमूल्यानि सस्यानि तत्र वर्तन्ते। अरण्यवासिनः तानि सस्यानि सङ्गृह्य स्वजीविकां निर्वहन्ति।

अग्रिमे दिवसे विद्यार्थिनः अभयारण्यं द्रष्टुं शिक्षकेण सह गतवन्तः। तत्र व्याघ्राः, सिंहाः, हरिणाः, भल्लूकादयः निवसन्ति। हंसादयः सरांसि गाहन्ते। तान् सर्वानालोक्य ते आनन्दं प्राप्तवन्तः।

किञ्चित् कालानन्तरं रात्रिः अजायत। पाचकः पाकं समाप्य भोजनाय सर्वान् आहूतवान्। भोजनं कृत्वा तेषु केचन बहिरेव उपविश्य नभोदृश्यं रात्रेः रमणीयं दृश्यं च दृष्ट्वा आनन्दोल्लसिताः अभवन्। वनप्रवासोऽयं सर्वेभ्यः भृशम् अरोचत।

**276.** विद्यार्थिनः किमर्थं वनप्रदेशं गतवन्तः?
(A) अध्ययनार्थम्
(B) वन्यपशववलोकनार्थम्
(C) पर्यटनार्थम्
(D) वृक्षावलोकनार्थम्

**277.** तैः वन्यप्रदेशे रात्रिनिवासः कृतः
(A) कुटीषु (B) वृक्षाणाम् अधः
(C) पथिकनिवासे (D) मुक्ताकाशे

**278.** गद्यांशे कपीनां कस्य स्वभावस्य वर्णनमस्ति?
(A) वृक्षेषु फलान्वेषणस्य
(B) वृक्षेभ्यः फलत्रोटनस्य
(C) जनान् प्रति आक्रोशस्य
(D) वृक्षान् प्रति कूर्दनस्य

**279.** 'अरण्य' शब्दस्य समानार्थकशब्दः नास्ति–
(A) तरवः (B) वनानि
(C) अरण्यानी (D) पशवः

**280.** अरण्यवासिनः स्वजीविकां कथं निर्वहन्ते?
(A) वनोत्पन्नसस्यानि संगृह्य
(B) वनोत्पन्नफलानि संगृह्य

(C) वनोत्पन्नेन्धनानि संगृह्य
(D) ग्रामोत्पन्नसस्यानि संगृह्य

**281.** तत्र सरांसि के गाहन्ते?
(A) पशवः (B) मत्स्याः
(C) हंसा (D) पक्षिणः

**282.** विद्यार्थिनां कृते वनप्रदेशे भोजनस्य का व्यवस्था आसीत्?
(A) ते तत्र अभुक्ता एवासन्
(B) ते तत्र फलान्यखादन्
(C) ते सहैव भोजनं नीत्वा गतवन्तः
(D) तैः सह पाकार्थं पाचकः आसीत्

**283.** पर्यटनेन कः लाभः?
(A) जलपानलाभः (B) निद्रालाभः
(C) क्रोधप्राप्तिः (D) ज्ञानलाभः

**284.** गद्यांशे 'क्त्वा' प्रत्ययान्तशब्दः अस्ति
(A) कृत्वा (B) गतवन्तः
(C) भङ्क्तुम् (D) विगते

**निर्देश (प्रश्न संख्या 285 से 293 तक)**
अधोलिखित गद्यांशं पठित्वा तदनन्तरं प्रदत्तप्रश्नानां विकल्पात्मकोत्तरेभ्यः समुचितम् उत्तरं चित्वा लिखत।

इह खलु पञ्चेन्द्रियाणि, पञ्चेन्द्रियद्रव्याणि, पञ्चेन्द्रियार्थाः च भवन्ति। तत्र चक्षुः श्रोत्रं घ्राणं जिह्वा त्वक् च इति पञ्चेन्द्रियाणि। पञ्चेन्द्रियद्रव्याणि खं वायुः ज्योतिः आपो भूः इति। पञ्चेन्द्रियार्थाः शब्दस्पर्शरूपरसगन्धाः मनःपुनः सराणि च इन्द्रियाणि अर्थसंग्रहसमर्थानि भवन्ति। न इन्द्रियवशगः स्यात्। न चञ्चलं मनः अनुभ्रामयेत्।

गुरु–वृद्ध आचार्यान् अर्चयेत्। मूर्ध–श्रोत्र–घ्राण–पाद–तैलनित्यः स्यात्। अतिथीनां पूजकः स्यात्। काले हित–मित–मधुरार्थवादी स्यात्। वश्यात्मा, महोत्साहः, विनयबुद्धिः निर्भीक, क्षमावान्, सर्वप्राणिषु बन्धुभूतः स्यात्।

न अनृतं ब्रूयात्। न अतिब्रूयात्। न अन्यस्वम्, अन्यस्वम् आहरेत्। न वैरं रोचयेत्। न कुर्यात् पापम्। न पापेऽपि पापी स्यात्। न अन्यदोपान् ब्रूयात्। न अन्यरहस्यम् आगमयेत्। अधार्मिकैः न दुष्टैः सह आसीत्। न नासिकां कुष्णीयात्। न दन्तान् विघट्टयेत्। न भूमि विलिखेत्। न नखान् वादयेत्। न छिन्द्यात्–तृणम्। न दुष्टयानानि आरोहेतु। न द्रुमम् आरोहेत्। न जलोग्रवेगम् अवगाहेत्।

न अदेशे, न अकाले, न कुत्सयन, न प्रतिकूलोपहितम्, न पर्युषितम् अन्नम् खादेत्। न नक्तं दधि भुञ्जीत। न कञ्चिद् अवजानीयात् । न वेगान् धारयेत्। न अहंमानी स्यात्। न नियमं भिन्द्यात्।

न कार्यकालम् अतिपातयेत्। न अपरीक्षितम् अभिनिविशेत्। न च अतिदीर्घसूत्री स्यात्। न सिद्धौ उत्सेकं गच्छेत् न असिद्धौ दैन्यम्।

**285.** 'असत्यम्' इत्यर्थे किं पदमत्र प्रयुक्तम् ?
(A) अनृतम् (B) अन्यरहस्यम्
(C) अपरीक्षितम् (D) चञ्चलम्

**286.** कदा दधि न भोक्तव्यम् ?
(A) सायम् (B) दिवि
(C) रात्रौ (D) मध्याह्ने

**287.** जनः केषां पूजकः स्यात् ?
(A) दुष्टानाम् (B) अतिथीनाम्
(C) वश्यात्मनाम् (D) निर्भीकाणाम्

**288.** इन्द्रियाणि कति भवन्ति?
(A) पञ्च (B) त्रीणि
(C) षट् (D) चत्वा

**289.** कं न आरोहेत्?
(A) अश्वम् (B) नौकाम्
(C) गजम् (D) द्रुमम्

**290.** केन युक्तेन इन्द्रियाणि अर्थसंग्रहसमर्थानि भवन्ति?
(A) शरीरेण (B) वाचा
(C) कर्मणा (D) मनसा

**291.** 'अहङ्कारवान्' त्यर्थे किं पदमत्र प्रयुक्तम् ?
**(A)** अहंमानी (B) वश्यात्मा
(C) कर्मणा (D) मनसा

**292.** 'गुरुवृद्धाचार्यान्' इति पदे कः समासः?
(A) अव्ययीभावः (B) द्वन्द्वः
(C) तत्पुरुषः (D) बहुव्रीहिः

**293.** 'क्षमावान् 'इत्यत्र कः प्रत्ययः ?
(A) तुमुन् (B) क्त
(C) मतुप् (D) क्तवतु

**निर्देश (प्रश्न संख्या 294 से 299 तक)**
अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां प्रदत्तेषु समुचितम् उत्तरं चित्वा लिखत।

महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्।

द्वादशवर्षीय तं पुत्रं पिता आरुणिः उवाच—हे श्वेतकेतो! गुरुं प्रति गच्छ अध्ययनार्थं यतः सौम्य! अस्मत्कुलीनः अनधीत्य न भवति इति। सः पुत्रः आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्षीयः अभवत् तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। सः च 'सर्वश्रेष्ठः अहम्' इति मन्यमानः उद्धतस्वभावः अभवत्। एवंभूतं पुत्रं दृष्ट्वा पिता उवाच—हे श्वेतकेतो ! कः ते उपाध्यायात् अतिशयः प्राप्तः येन त्वं कुलाननुरूपम् उद्धतः असि ? जानासि किं तत् येन श्रुतेन अन्यत् अश्रुतम् अपि श्रुतं भवति, अमतं मतं, अविज्ञातं च विज्ञातं भवति इति। एतद् अद्भुतं प्रश्नं श्रुत्वा पृच्छति–कथम् इति!

**294.** उद्धतस्वभावः कः अभवत् ?
(A) उपाध्यायः (B) पिता
(C) आरुणिः महर्षिः (D) श्वेतकेतुः

**295.** 'मन्यमानः' इति पदे प्रत्ययः अस्ति—
(A) शतृ (B) अनीयर्
(C) शानच् (D) क्तवतु

**296.** 'उवाच' इति क्रियापदस्य कर्तृपदम् अस्ति—
(A) श्वेतकेतुः (B) पिता
(C) त्वम् (D) गुरुः

**297.** 'पितुः' इति पदे विभक्तिः अस्ति—
(A) पञ्चमी (B) चतुर्थी
(C) षष्ठी (D) द्वितीया

**298.** 'गच्छ' इति क्रियापदे लकारः अस्ति—
(A) लोट् (B) लृट्
(C) लट् (D) विधिलिङ्

**299.** 'उद्धतस्वभावः' पदे समासः अस्ति—
(A) तत्पुरुषः (B) बहुव्रीहिः
(C) द्वन्द्वः (D) अव्ययीभावः

**निर्देश (प्रश्न संख्या 300 से 308 तक)**
अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां प्रदत्तेषु समुचितम् उत्तरं चित्वा लिखत।

सम्प्रति शिक्षासंस्थासु प्रचलितस्य संस्कृत-शिक्षणविधेः अयः परिणामः दृश्यते यत् बहूनि वर्षाणि संस्कृतम् अधीत्य अपि संस्कृतच्छात्राः संस्कृतभाषया एव स्वविचारान् प्रकटयितुम् असमर्थाः। लेखने अपि तेषां नैपुण्यं न दृश्यते। कारणं किम् ? स्पष्टमेव यत् प्रचलितविधिषु संस्कृतं संस्कृतेन न पाठ्यते, अपितु अन्यभाषया। 'संस्कृतपाठ्यपुस्तकगतपाठानाम् अनुवादः' एव संस्कृतशिक्षणस्य उद्देशः इति स्वीकृतः। छात्राः संस्कृतेन सम्भाषणस्य संस्कृतश्रवणस्य वा अवसरान् एव न प्राप्नुवन्ति। कुत्र तदा संस्कृतशिक्षणम् ? स्पष्टमेव यत् इदं संस्कृतशिक्षणम् न। महान् चिन्तायाः विषयः एषः। 'संस्कृतपाठनविधौ एषः दोषः दूरीकरणीयः एव' इति अस्माकम् एकं महत्त्वपूर्णं कर्तव्यम्।

**300.** संस्कृतशिक्षणाय किम् आवश्यकम् ?
(A) सम्भाषणम् (B) नियमस्मरणम्
(C) अनुवादकार्यम् (D) शब्दार्थलेखनम्

**301.** 'अधुना' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
(A) एव (B) यत्
(C) इति (D) सम्प्रति

**302.** अद्यत्वे संस्कृतपाठनार्थं प्रायः कस्याः भाषायाः प्रयोगः माध्यमरूपेण न क्रियते ?
(A) आङ्गलभाषायाः (B) क्षेत्रीयभाषायाः
(C) संस्कृतभाषायाः (D) हिन्दी–भाषायाः

**303.** 'अधीत्य' इति पदे कः उपसर्गः ?
(A) य (B) ई
(C) अधि (D) ल्यप्

**304.** अस्मिन् अनुच्छेदे 'दृश्यते' इति क्रियापदस्य किं कर्मपदं प्रयुक्तम् ?
(A) लेखने (B) नैपुण्यम्
(C) छात्राः (D) तेषां

**305.** 'कर्त्तव्यम्' इति पदे कः प्रत्ययः ?

(A) क्त (B) क्तवतु

(C) तव्यत् (D) अनीयर्

**306.** अत्र 'क्त' प्रत्ययः कस्मिन् पदे प्रयुक्तः ?

(A) स्वीकृतः (B) अधीत्य

(C) महत्त्वम् (D) अपितु

**307.** अत्र सन्धियुक्तं पदं किम् ?

(A) संस्कृतपाठ्यपुस्तकगतपाठानाम्

(B) अन्यभाषया

(C) पाठनविधौ

(D) संस्कृतच्छात्राः

**308.** 'संस्कृतशिक्षणम्' इति पदे कः समासः ?

(A) तत्पुरुषः (B) बहुव्रीहिः

(C) द्विगुः (D) अव्ययीभावः

**निर्देश (प्रश्न संख्या 309 से 318 तक)**

अधोलिखितं गद्यांशं पठित्वा तदनन्तरं प्रदत्तप्रश्नानां विकल्पोत्तरेषु समुचितम् उत्तरं चित्वा लिखत।

पूर्वं निषधदेशे नलनामा कश्चन राजा आसीत्। सः अत्यन्त सुन्दरः, अश्वविद्याचतुरः च। समर्थः राजा, शूरः, सत्यसन्धः उदारः इत्यादिभिः विशेषणैः सः ख्यातः अपि। विदर्भदेशे भीमः इति कश्चन राजा राज्यं पालयति स्म। तस्य दमः, दान्तेः, दमनः इति त्रयः पुत्राः, दमयन्ती इति पुत्री च। दमयन्ती रूपेण तेजसा शरीरकान्त्या सौन्दर्येण च अत्यन्तं प्रसिद्धा।

विशेषः नाम नलस्य समीपम् आगत्य तत्परिचिताः दमयन्त्याः सौन्दर्यं श्लाघन्ते स्म। तथैव दमयन्त्याः परिचिताः अपि नलस्य विशेषगुणान् व्यक्तित्वं च श्लाघन्ते स्म। एवं परस्परं मुखदर्शनाभावेऽपि मिथः प्रीतिः उत्पन्ना आसीत् तयोः।

अथ कदाचित् वनविहारार्थं गतः नलः हंससमूहं दृष्ट्वा धावन्–तान् अनुसृतवान्, कञ्चनहंसं गृहीतवान् च। तदा सः हंसः मनुष्यवत् सम्भाषणम् आरब्धवान्—''हे, राजन् ! मां न मारय। अहं दमयन्त्याः समीपं गत्वा भवतः गुणगानं करिष्यामि। सा भवति यथा अनुरागवती स्यात् तथा करिष्यामि'' इति। एतत् श्रुत्वा नलः तं हंसं त्यक्तवान्।

उक्तं वचनं परिपालयम् सः हंसः सखीभिः सह क्रीडन्त्याः दमयन्त्याः समीपं गतवान्। नलस्य परतया तेन हंसेन प्रेमनिवेदनं कृतम्। ततः पूर्वमेव नलस्य विषये विशिष्टां प्रीतिं वहन्ती दमयन्ती मनसा नलस्य विषये विद्यमानं प्रेम निवेदितवती। सः हंसः तं सन्देशम् आनीय नलाय दत्तवान्।

एवं सति कदाचित् राजा भीमः पुत्र्याः निमित्तं दमयन्त्याः स्वयंवरम् आयोजितवान्। दमयन्त्याः प्रेमसन्देशेन उत्साहं प्राप्य नलः स्वयंवरं प्रति प्रस्थितः।

दमयन्त्याः स्वयंवरवार्ता स्वर्गपर्यन्तं गता। एतां

वार्तां तत्र प्रसारितवान् नारदः यदा तस्याः

सौन्दर्यवर्णनं कृतवान् तदा देवताप्रमुखाः अपि दमयन्त्याः स्वयंवरे भागं ग्रहीतुम् उत्साहं प्रकटितवन्तः। तैः सम्भूय भूलोकं प्रति प्रस्थितम्। मार्गे नलं दृष्टवन्तः ते। दमयन्ती नलं मनसा इच्छति इति तैः नारदसकाशात् पूर्वमेव ज्ञातम् आसीत्। अतस्ते नलम् उक्तवन्तः—''राजन्! भवता दमयन्त्यै अस्मत्परतया सन्देशः प्रदातव्यः यत् वयं चत्वारः इन्द्राग्नियमवरुणाः दमयन्तीं वोढुम् उत्साहेन आगच्छन्तः स्मः इति। सा अस्मासु चतुर्षु कञ्चित् चिनोतु'' इति। तदा नलेन उक्तम्—''देवाः! दमयन्त्याः विवाहेच्छया एव अहमपि प्रस्थितः। एवं स्थिते एतं सन्देशं कथम् अहं प्रापयेयम् ?'' इति।

तदा देवैः उक्तं—''भवान् यथा अदृश्यः भवेत् तथा अस्माभिः वरः प्रदीयते। तत्साहाय्येन भवान् अस्माकं सन्देशं प्रापयतु। सा अस्मासु यं कञ्चित् वृणुयात् चेदपि अस्मासु अन्यस्य न खेदः'' इति।

एतादृशस्य वरस्य साहाय्येन नलः दमयन्त्याः समीपम् आगतः। प्रथमवारं परस्परदर्शनेन तौ पुलकितौ जातौ। तथैव प्रीतिः अपात्रनिहिता न इत्यपि अवगतवन्तौ, सन्तुष्टौ च। तदनन्तरं नलेन सन्देशः प्रदत्तः। तत् श्रुत्वा दमयन्त्या उक्तम्—''राजन्! अहं भवति एव अनुरक्ता अस्मि। देवाः मम आशयस्य बाधकाः मा भवन्तु'' इति।

नलः ततः प्रत्यागत्य एतं प्रतिसन्देशं देवताभ्यः प्रदत्तवान्। तत् श्रुत्वा इन्द्रः हसन् उक्तवान्—''अस्तु, दमयन्ती स्वयंवरे कं चिनुयात् इति पश्याम'' इति।

स्वयंवरदिने सभाङ्गणे पंक्तिशः उपविष्टा राज्ञः काटक्षेण अपि अपश्यन्ती दमयन्ती नलं तेषु अन्विष्टवती। किन्तु अहो आश्चर्यम्। नलः यत्र उपविष्टः आसीत्, तत्पार्श्वे नलसदृशाः एव अन्ये चत्वारः उपविष्टाः दृश्यन्ते। तदा सा चिन्ताक्रान्ता अभवत्—'एतेषु नलस्य अभिज्ञानं कथम्?' इति।

तावता तथा ज्येष्ठैः सूचितानि देवताचिह्नानि स्मृतानि। देवतानां पादाः भूमौ न्यस्ताः न भवन्ति, तेषां पक्ष्म न कम्पते हत्यादिकं तया स्मृतम्। किन्तु आश्चर्यम्! तत्र सर्वेषां पादौ भूमिं स्मृशतः स्मः। तेषु असाधारणानि चिन्हानि कानि अपि न लक्षितानि।

तदा दमयन्ती ताः एव देवताः प्रार्थितवती—''धर्मदेवताः! अहं मनसा नलं पतिं मतवती अस्मि। एतत् यदि सत्यमिति भवन्तः चिन्तयेयुः तर्हि भवद्भ्यः नलं कृपया पृथक्कुर्वन्तु'' इति।

तदा देवाः स्वरूपं प्रकाशितवन्तः। सन्तुष्टा दमयन्ती नलं वृतवती।

**309.** नलः कस्य देशस्य राजा ?

(A) मिथिलायाः (B) निषधस्य

(C) विदर्भस्य (D) कान्यकुब्जस्य

**310.** दमयन्ती कस्य पुत्री ?

(A) भीमस्य (B) नलस्य

(C) दशरथस्य (D) रामस्य

**311.** मनुष्यवत्सम्भाषणं कः आरब्धवान् ?

(A) नलः (B) हंसः

(C) श्वा (D) गजः

**312.** दमयन्ती नलं मनसा इच्छति इति देवप्रमुखैः कस्मात् ज्ञातम् ?

(A) नलात् (B) दमयन्त्याः

(C) नारदात् (D) भीमात्

**313.** दमयन्ती स्वयंवरे कं वृतवती ?

(A) इन्द्रम् (B) भीमम्

(C) नलम् (D) नारदम्

**314.** देवता–चिह्नानि कया स्मृतानि ?

(A) देवतया (B) भीमपत्न्या

(C) सीतया (D) दमयन्त्या

**315.** स्वर्गः इत्यस्य पर्यायपदम्—

(A) भूमिः (B) नरकः

(C) नाकः (D) नगरम्

**316.** ''समीपम्' इत्यस्य विरुद्धार्थकं पदम्—

(A) अन्तिकम् (B) पार्श्वे

(C) दूरम् (D) पुरस्तात्

**317.** 'श्रुत्वा' इति पदम्—

(A) क्रियापदम् (B) ल्यबन्ताव्ययम्

(C) क्त्वान्ताव्ययम् (D) नामपदम्

**318.** 'करिष्यामि' इति पदे लकारः—

(A) लट् (B) लिट्

(C) लृट् (D) लोट्

**निर्देश (प्रश्न संख्या 319 से 326 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तरेभ्यः उचिततमम् उत्तरं चिनुत—

कदाचित् कश्चन् महात्मा प्रयाणावसरे पिपासाम् अनुभूतवान्। समीपे एव तेन एकः कुटीरः दृष्टः। सः कुटीरः कस्यचित् चर्म–कारस्य। महात्मा तम् उपसर्प्य अपृच्छत्—''आर्य! किम् अत्र पानाय जलं लभ्येत?'' इति। महात्मानम् उपस्थितं दृष्टा सः चर्मकारः नितरां सन्तुष्टः। सः उत्थाय अन्तः गत्वा जलम् आनीय महात्मने दातुम् उद्यतः। तावता तेन स्वस्य चर्मकारकुलत्वं स्मृतम्। अतः सः अग्रे प्रसारितं हस्तं पृष्ठतः कृतवान् । ''किं महोदय! किमर्थं जलदाने एवं सङ्कोचः ?''—सः महात्मा पृष्टवान। तदा चर्मकारः अवदत्—''श्रीमान्! अहम् अस्मि निम्नकुलीयः। मया भवते जलं यत् दीयेत तत् भवेत् पापाय'' इति। ''पापपुण्यादिविषये भवतः महती चिन्ता!'' इति हसन् उक्तवान् सः महात्मा। ततः द्वित्राणि पदानि अग्रे निक्षिप्य सः चर्मकारस्य स्कन्धे हस्तं संस्थाप्य अवदत्—''महोदय! इदानी मया भवान् स्पृष्ट; न तु भवता। तस्मात् यदि पापं प्राप्येत तर्हि तत् तु मया प्राप्येत। अतः इदानीं जलदाने न कापि आपत्तिः। कृपया जलं दीयताम्'' इति। चर्मकारः तस्मै जलं दत्तवान्। जलं पीत्वा सः महात्मा उक्तवान ''भ्रातः ! भगवतः दृष्ट्या सर्वे समानाः । ये तारतम्यम् आचरेयुः ते तु अज्ञानिनः। स्पृश्यास्पृश्यभेदः मानवेन कल्पितः । तत्र श्रद्धा न करणीया । अहम् इदानीं बुभुक्षितः अस्मि अपि। यदि अद्य भवद्गृहे भोजनं प्राप्येत तार्हि वरं स्यात्'' इति ।

''भवान् मम गृहे भोजनं कर्तुं सज्जः यत् तत् तु मम सौभाग्याय एव'' इति सहर्षम् उक्त्वा पाकसज्जी–

करणाय पत्नीं सूचयितुः सः चर्मकारः अन्तः गतवान्

**319.** महात्मनः उक्तयनुसारम्—

(A) स्पृश्यास्पृश्यभेदः मनुष्येण कल्पितः । तत्र श्रद्धा न करणीया।

(B) स्पृश्यास्पश्यभेदः न केनापि कल्पितः। अतः यथास्थिति पालनीयम्।

(C) स्पृश्यास्पृश्यभेदः मनुष्येण कल्पितः। अतः श्रद्धा करणीया।

(D) स्पृश्यास्पृश्यभेदः ईश्वरेण निर्मितः। तत्र श्रद्धा करणीया।

**320.** 'स्पश्यास्पृश्यभेदः मानवेन कल्पितः' इति वाक्यस्य वाच्यपरिवर्तनेन भवेत्...........

(A) स्पृश्यास्पृश्यभेदं मानवः कल्पितवान्

(B) स्पृश्यास्पृश्यभेदेन मानवः कल्पितः

(C) स्पृश्यास्पृश्यभेदाय मानवा कल्पिताः

(D) स्पृश्यास्पृश्यभेदं मानवाः कल्पितवन्तः

**321.** 'अतः सः अग्रे प्रसारितं हस्तं पृष्ठतः कृतवान्' इति वाक्ये विशेषणपदं किम ?

(A) प्रसारितम् (B) हस्तम्

(C) सः (D) अतः

**322.** ''महोदय्! इदानीं' मया भवान् स्पृष्टः, न तु भवता अहम्'' इति कः कस्मै उक्तवान् ?

(A) चर्मकारः स्वपत्न्यै

(B) महात्मा चर्मकाराय

(C) महात्मा चर्मकारपत्न्यै

(D) चर्मकारः महात्मने

**323.** चर्मकारः पाकसज्जीकरणाय पत्नीं सूचयितुं गमनसमये कीदृशः आसीत्?

(A) भ्रमितः (B) दुःखित

(C) उदासीनः (D) आनन्दितः

**324.** आर्य! किमत्र पानाय जलं लभ्येत ? इति प्रश्नः केन पृष्ट?

(A) महात्मना (B) ग्राम्यजनैः

(C) चर्मकारकुलेन (D) चर्मकारेण

**325.** किमर्थः जलदाने चर्मकारस्य सङ्कोचः आसीत् ?

(A) पापपुण्यादिविषये तस्य चिन्ता नासीत् इति

(B) जलम् अशुद्धं स्यात् इति

(C) महात्मनः जलस्य आवश्यकता नासीत् इति

(D) सः निम्नकुलीयः आसीत् इति मत्वा

**326.** हसता महत्मना किम् उक्तम्?

(A) किमर्थं जलदाने सङ्कोचः ?

(B) पापपुण्यादिविषये भवतः महती चिन्ता!

(C) इदानीं जलदाने न कापि आपत्तिः

(D) किम् अन्न पानाय जलम् लभ्येत?

## निर्देश (प्रश्न संख्या 327 से 333 तक)

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तोभ्यः उचिततमम् उत्तरं चिनुत—

भवन्ति वहवः भारतीयाः अपि तादृशाः, ये भारतं सततं निन्दन्ति, भारते लब्धजन्मानं स्वमपि निन्दन्ति। अतः एव ते भारतं परित्यज्य अमेरिकादिदेशेषु स्थातुकामाः भवन्ति। एवं माननेन ते स्वं प्रगतं मन्यन्ते। इम भारतीयाः तृच्छाः मलिनाः असभ्याः अप्रगताः कूपमण्डूकबुद्धयः च सन्ति इति अन्ये विदेशीयाः मन्येरन् चेत् ते क्षन्तव्याः स्युः। परं भारतीयाः एव स्वदेशं निन्देयुः चेत् ये कथं क्षमार्हाः भवेयुः?

अस्ति काचित् पोलण्डवास्तव्या करोलिनाख्या महिला। भारतीयेन अनुरागगोस्वामिना सा उदूढा। अतः अधुना सा स्वम् 'करोलिनागोस्वामी' इति परिचाययति। सा भारतम् अधिकृत्य इत्थम् अभिदधाति—''भारतस्य जनजीवनपद्धतिं वीक्ष्य अहं भारते अतीव स्निह्यामि। विश्वस्य सर्वासां समस्यानां समाधानं भारतात् प्राप्तु शक्यते। इत्यत्र अहं विश्वसिमि। एवं सत्यपि भारतं एवं परिचाययितुं कथं न शक्तम्? कथं न अन्ये देशाः भारते रूचिं वहन्ति? मनागपि उपद्रवम् अकुर्वाणाः शान्ताः इमे भारतीयाः सर्वस्मिन् अपि जगति शिक्षणे वाणिज्ये च कौशलेन व्याप्ति गताः सन्ति चेदपि विदेशीयेषु भारतम् अधिकृत्य कथं विप्रतिपत्तिः अस्ति?''

''अधुनाऽपि अहं यदा यदा यूरोपादिदेशेषु प्रवासं करोमि तदा तदा ते भारते निवसन्तीं मां समुपलक्ष्य आश्चर्य व्यञ्जयन्तः वदन्ति—''करोलिने। इतोऽपि किं त्वं भारते निवससि! मलिनैः असभ्यैः तै भारतीयेः सह निवसन्ती त्वं मनागपि किं न उद्विग्नाग्रा? अहो ते सहिष्णुता ! तत्र तव का सुरक्षा? इतोऽपि त्वयि बालात्कारः किं न जातः?''

इत्थं ब्रुवाणैः तैः विदेशीयैः कदापि भारतं दृष्टमेव न, केवलं ते यूरोपीयलेखकैः लिखितं वृत्तपत्रादिषु प्रकाशितं च पठित्वां इत्थम् अभिप्रयन्ति। बहुधा ते एवं मन्यन्ते यत् भारते कापि सभ्यता संस्कृतिः वा नास्ति एव, केवलं तत्र असभ्यजनानां साम्राज्यं वरीवर्तते इति। बाढम् उद्वेजिता अहम् एतस्य श्रवणात्।

मया यूरोपदेशाः दृष्टाः । अमेरिकादेशोऽपि दृष्टः। भारतस्य वैशाल्यं वीक्ष्य अहम् आश्चर्यमग्ना अस्मि। यूरोपस्य ये देशाः सन्ति पोलण्डादयः ने भारतस्य राज्यतुल्यपरिमाणाः एव। अतः भारते वैविध्यमस्ति।

मया प्रतिज्ञातम् अस्ति वत् भारतविषयिणीम् इमां विप्रतिपतिं निराकर्तुं जगते भारतस्य सम्यक् परिचयः देयः इति।

**327.** मनागपि उपद्रवम् अकुर्वाणाः शान्ताः इमे भारतीयाः इति वाक्ये 'मनागपि' इत्यस्य आशयः—

(A) बद्धपि (B) किमपि न

(C) बहु किमपि (D) किञ्चिदपि

**328.** यूरोपदेशान् आमेरिकादेशं च दृष्टवा पुनः भारतस्य वैशाल्यं वीक्ष्य करोलिनायाः मनसि किम् उद्भूतम्?

(A) खेदम् (B) हर्षम्

(C) नैराश्यम् (D) आश्चर्यम्

**329.** करोलिनायाः विवाहः केन सह अभवत्?

(A) अनुरागगोस्वामिना सह

(B) रामानुजेन सह

(C) चन्द्रस्वामिना सह

(D) विवेकानन्देन सह

**330.** करोलिने! इतोऽपि किं त्वं भारते निवससि ? इति के पृच्छन्ति करोलिनाम्?

(A) भारतदेशीयाः

(B) करोलिनायाः पतिः

(C) करोलिनायाः पिता

(D) यूरोपदेशीयाः

**331.** लब्धजन्मानम् इति समस्तपदस्य विग्रहः स्यात्—

(A) लब्धः जन्मः यस्य सः, तम्

(B) लब्धानां जन्म, तम्

(C) लब्धस्य जन्म, तम्

(D) लब्धं जन्म येन सः, तम्

**332.** करोलिना इति नामधेया महिला कस्मात् देशात् आगता?

(A) होलण्डदेशात् (B) पोलण्डदेशात्

(C) जापानदेशात् (D) चीनदेशात्

**333.** अधोलिखितवाक्येषु किं व्याकरणदृष्ट्या उचितम्?

(A) अहं भारते अतीव स्निह्यमि

(B) अहं भारताय अतीव स्निाह्यमि

(C) अहं भारतात् अतीव स्निाह्यमि

(D) अहं भारतात् अतीव स्निह्यामि

## निर्देश (प्रश्न संख्या 334 से 341 तक)

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चित्वा लिखत—

साम्प्रतिकं युगं वैज्ञानिकं युगं वर्तते। अद्य मानवः तथैव नास्ति यथा शतं वर्षाणि पूर्वमासीत्। सर्वेषां जीवने विज्ञानोपकरणानि प्रविष्टानि। नगरेषु ग्रामेषु व सर्वे जनाः स्व स्व कार्येषु विज्ञानस्य साधनानां प्रयोगं कुर्वन्ति। रेलयानं दूरं गन्तुं लोकप्रियं वाहनम् अस्ति। दूरस्थाः शब्दाः अपि रेडियो माध्यमेन गृह्यन्तें। अधुना टेलीविजनयन्त्रं महदुपकारकं वर्तते। तेन गृहे स्थिताः वयं चित्राणि पश्यामः। चित्रस्थपात्राणां वंचनिनि शृणुमः। कम्प्यूटरयन्त्रम् लघुकायमपि महदुपकारकं वर्तते। यद्यपि सहस्त्राधिकानां विज्ञानोपकरणानां प्रयोगः अहर्निशं भवति तथापि जनानां सुविधार्वनार्थं

नवीनानि उपकरणानि आविष्क्रियन्ते। आयुर्विज्ञानस्य आविष्कारैः रोगाः दूरीक्रियन्ते। जनानां जीवने सुखं च वर्धते।

**334.** दूरं गन्तुं लोकप्रिय वाहनं किमस्ति?

(A) अश्वयानम् (B) रेलयानम्

(C) नौकायानम् (D) वृषभयानम्

**335.** 'अधुना' इति पदं कीदृशं पदमस्ति?

(A) अव्ययपदम् (B) कर्तृपदम्

(C) क्रियापदम् (D) विशेषणपदम्

**336.** 'रात्रिन्दिवं' इति पदस्य पर्यायशब्दः अनुच्छेदेऽस्मिन्

प्रयुक्तः तच्चित्वा लिखत—

(A) दिनम् (B) रात्रिः
(C) उभे सन्ध्ये (D) अहर्निशम्

**337.** 'आविष्काराः क्रियन्ते' इत्यस्य कृते कः शब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः। तच्चित्वा लिखित—

(A) मोदकाणां भक्षणम्
(B) चित्राणां निर्माणम्
(C) पशूनां धावनम्
(D) आविष्क्रियन्ते

**338.** 'दु:खं' पदस्य विलोमशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः तच्चित्वा लिखत—

(A) मधुरम् (B) पुष्पम्
(C) फलम् (D) सुखम्

**339.** साम्प्रतिकं युगं कीदृशं युगं वर्तते?

(A) जलयुगम् (B) वैज्ञानिक युगम्
(C) पाषाणयुगम् (D) द्वापरयुगम्

**340.** केषां जीवने विज्ञानोपकरणानि प्रविष्टानि?

(A) केवलं जलचराणाम्
(B) केवलं रात्रिचराणाम्
(C) केवलं पलाण्डुभक्षकाणाम्
(D) सर्वेषाम्

**341.** 'प्रवेशं प्राप्तानि' इत्यस्य पर्यायशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः। तच्चित्वा लिखत—

(A) प्रविष्टानि (B) हसितानि
(C) पीतानि (D) निर्गतानि

**निर्देश (प्रश्न संख्या 342 से 348 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चित्वा लिखत—

भारतदेशस्य उत्तरस्यां दिशि हिमालयो नाम पर्वतराजः वर्तते। अस्य तुङ्गानि शिखराणि सर्वदा हिमेनाच्छादितानि भवन्ति। अयं पर्वतः पूर्वसागरात् पश्चिमसागरपर्यन्तं विस्तृतः। अस्य मेखलासु नानाविधाः ओषधयः प्ररोहन्ति। तासु काचन रात्रौ दीपा इव प्रकाशन्ते। अत्रत्येषु वृक्षेषु शालाः, देवदारवः सुतरामुपयोगिनः। अत्र व्याघ्राः, ऋक्षाः, वृकाः स्वच्छन्दं विहरन्ति। अस्मिन्नेव क्षेत्रे कस्तूरीमृगाः विहरन्ति। अस्यैव नाभिमण्डलात् कस्तूरिका जायते। इयं वैद्यैः विविधानां रोगाणां चिकित्सायै प्रयुज्यते। अत्रैव मानसं सरः (मानसरोवरः) अस्ति यत्र हंसाः विहरन्ति। अस्य सरोवरस्य तटे ऋषीणाम् आश्रमाः सन्ति।

**342.** 'परतन्त्रम्' इति पदस्य विलोमशब्दः अनुच्छेदेऽ–स्मिन् प्रयुक्तः। तच्चित्वा लिखत—

(A) स्वच्छन्दम्
(B) अर्गलासहितम्
(C) जीमूतवाहनः
(D) परातन्त्रम्

**343.** 'उत्पन्ना भवति' इत्यस्य पर्यायशब्दः अनुच्छेदेऽस्मिन् प्रयुक्तः तच्चित्वा लिखत—

(A) स्वपिति (B) जायते
(C) क्रोधः (D) म्रियते

**344.** सरोवरस्य तटे केषाम् आश्रमाः सन्ति?

(A) जम्बुकानाम् (B) ऋषीणाम्
(C) धावितानाम् (D) भल्लूकानाम्

**345.** 'विस्तारं प्राप्तः' इति पदस्य कृते कः शब्द अनुच्छेदेऽस्मिन् प्रयुक्तः तच्चित्वा लिखत—

(A) अविस्तृतः (B) न विस्तृतः
(C) बहु कोमलम् (D) विस्तृतः

**346.** कस्य उत्तरस्यां दिशि पर्वतराजः वर्तते?

(A) चीनदेशस्य (B) अफ्रीकादेशस्य
(C) ईरानदेशस्य (D) भारतदेशस्य

**347.** अस्य शिखराणि केन आच्छादितानि भवन्ति?

(A) फलेनाच्छादितानि
(B) हिमेनाच्छादितानि
(C) अग्निनाच्छादितानि
(D) दुग्धेनाच्छादितानि

**348.** 'विहारं कुर्वन्ति' इत्यस्य कृतेन अनुच्छेदेऽस्मिन् कः शब्दः प्रयुक्तः?

(A) उदाहरन्ति (B) विहरन्ति
(C) विरहिताः (D) हरन्ति

**निर्देश (प्रश्न संख्या 349 से 356 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारित प्रश्नानां विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चित्वा लिखत—

विश्वविद्यालय कश्चित् प्राध्यापकः जलविहाराय नावम् आरूढः नौकया जलविहारस्य तस्य प्रथमः अवसरः आसीत्। तत्र मनोरमान् दृश्यान् दृष्ट्वा सः नाविकम् अपृच्छत्–भो नाविक! किं भवता कदापि गणितं पठितम्? नाविकः—न पठितम् महोदय। प्राध्यापकः—किं गणितं पठितुं विद्यालयं न गतवान्। नूनं भवतः जीवनस्य चतुर्थांशः व्यर्थः अभवत्। किं भवता रसायनशास्त्रं भौतिकशास्त्रं वा पठितम्? नाविकः अवदत्–ईदृशं में भाग्यं कुतः? यदहं भौतिकशास्त्रं रयायनशास्त्रं वा पठेयम्। प्राध्यापकः—नूनं भवतः जीवनस्य अर्धांशः व्यर्थः अभवत्। वद वद त्वचा आंग्लभाषा तु पठिता एव। नाविकः (ग्लानिम् अनुभवन्) —महाशय! नाहं मात्रा पित्रा वा विद्यालयं प्रेषितः। तर्हि कुतः पठेयम्? प्राध्यापकः तर्हि तव जीवनस्य त्रयो भागाः व्यर्था अभवत्?

अत्रान्तरे नदे जलवर्तनं समायातम्। तदा लहरीणां वेगेन नौः अकम्पत्। तयोः पश्यत् एव नौका जलेन पूरिता जाता। नाविकः प्राध्यापकम् अपृच्छत्–महोदय! किं भवान् तर्तुं जानाति? नौकां जलपूरितां दृष्ट्वा भीतः प्राध्यापकः अवदत्–अहं तु तर्तुं न जानामि। नाविकः अवोचत्–यदि भवान् तर्तुं न जानाति तर्हि भवतः सर्वं जीवनं वृथा जातम्। अहं तु बाहुभ्यां नदं तीर्त्वा पारं गच्छामि।

**349.** 'जलविहाराय' इत्यस्मिन् पदे का विभक्तिः प्रयुक्त?

(A) प्रथमा (B) द्वितीया
(C) सप्तमी (D) चतुर्थी

**350.** 'ईदृशं में भाग्यं कुतः? इति वाक्यं कः अवदत्?

(A) प्राध्यापकः (B) नाविकः
(C) नौका (D) लहरी

**351.** 'पठितम्' इति पदे कः प्रत्ययः प्रयुक्तः?

(A) तुमुन् (B) क्त
(C) क्तवतु (D) क्त्वा

**352.** 'कदापि' इति पदस्य सन्धिविच्छेदः भवति—

(A) क + दापि (B) कद + आपि
(C) कदा + अपि (D) कदा + पि

**353.** 'तर्तुम्' इति पदे कः प्रत्ययः प्रयुक्तः?

(A) तुम् (B) तुमुन्
(C) मुन् (D) ल्यप्

**354.** नदे किं समायातम्?

(A) जलम् (B) वृक्षम्
(C) जलावर्तनम् (D) पुष्पाणि

**355.** नौका केन पूरिता जाता?

(A) पत्रेण (B) पुष्पेण
(C) फलेन (D) जलेन

**356.** जलविहाराय नावं कः आरूढ़ः?

(A) प्राध्यापकः (B) प्राध्यापिका
(C) प्राचार्यः (D) मुख्याध्यापकः

**निर्देश (प्रश्न संख्या 357 से 381 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारित– प्रश्नानां विकल्पात्मकोत्तरेषु उचिततमम् उत्तरं चित्वा लिखत—

पुरा वाल्मीकिः नाम एकः ऋषिः आसीत्। एकदा सः स्नातुं तमसातीरमगच्छत्। मार्गे सः व्याधेन विद्धम् एकं क्रौञ्चपक्षिणमपश्यत्। सहचरस्य वियोगेन व्याकुलितायाः क्रौञ्च्याः उच्चैः रोदनम् अशृणोत्। क्रौञ्च्याः विलापं श्रुत्वा ऋषिः द्रवितः अभवत्। क्रौञ्चीक्रन्दनात् जातः ऋषेः शोकः श्लोकरूपेण तस्य मुखात् एवं निरगच्छत्—

**मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**

अयमेव श्लोकः लौकिकसाहित्यस्य आदिकाव्य– रचना। ततः प्रभृति ऋषिरयं कविपदं प्राप्तवान्। ऋषे! कवित्यं विज्ञाय ब्रह्मा आकाशवाण्या आदिशत्–ऋषे! कुरु रामायण ां काव्यम्। तत्र रामचरितं वर्णय येन रामस्य पुण्यं चरित्रं विदित्वा जनाः सन्मार्गस्य अनुसरणं कुर्युः। अस्मिन् काव्ये (रामायणे) पितुः आज्ञापालनम्, भ्रातृस्नेहः,

परोपकारः, दया, दीनरक्षा इत्यादीनि मानवतायाः पोषकानि जीवनमूल्यानि वर्णितानि सन्ति।

**357.** कीदृशं क्रोञ्चपक्षिणं वाल्मीकिः मार्गे अपश्यत्?

(A) हसन् (B) व्याधेन विद्धम्
(C) देवैः पूजितम् (D) जले तरन्

**358.** ऋषेः शोकः केन रूपेण तस्य मुखात् निरगच्छत्?

(A) गीतरूपेण (B) गद्यरूपेण
(C) श्लोकरूपेण (D) स्नेहरूपेण

**359.** 'ज्ञात्वा' इति पदस्य समानार्थकशब्दः

अनुच्छेदेऽस्मिन् प्रयुक्तः। तच्चित्वा लिखत–

(A) श्रुत्वा (B) दृष्ट्वा
(C) विज्ञाय (D) विलोकनाय

**360.** 'आदिशत्' इति पदस्य कोऽर्थः भवति?

(A) उपदेशं कृतवान् (B) आदेशम् अकरोत्
(C) काव्यम् अपाठयत् (D) वंशीम् अवादयत्

**361.** 'भो ऋषे! कुरु रामायणं काव्यम्' इति कः अवदत्?

(A) तारणीशः (B) मार्कण्डेयः
(C) जाबालिः (D) ब्रह्मा

**362.** 'सन्ति' इति पदे को धातुः वर्तते?

(A) भू (B) पठ्
(C) गम् (D) अस्

**363.** वाल्मीकिः कः आसीत्?

(A) ऋषिः (B) ग्रामीणः
(C) नागरिकः (D) खेचरः

**निर्देश (प्रश्न संख्या 364 से 371 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिकपुत्रः। स च विभवक्षयाद्देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्–

यत्र देशेऽथवा स्थाने भोगा भुक्ताः स्ववीर्यतः।
तस्मिन विभवहीनो यो वसेत् स पुरुषाधमः।।

तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं काल देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वरपुरमागत्य तं श्रेष्ठिनमुवाच–''भोः श्रेष्ठिन्। दीयतां मे सा निक्षेपतुला।''

स आह–''भोः। नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता'', इति।

जीर्णधन आह–''भोः श्रेष्ठिन्! नास्ति दोषस्ते, यदि मूषकैर्भक्षितेति।

ईदृगेवायं संसारः। न किञ्चिदत्र शाश्वमस्ति। परमहं नद्यां स्नानार्थं गमिष्यामि। तत् त्वमात्मीयं शिशुमेनं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय'' इति। स श्रेष्ठी स्वपुत्रमुवाच–''वत्स! पितृव्योऽयं तव, स्नानार्थं यास्यति, तद् गम्यतामनेन सार्धम्'' इति।

अथासौ वणिक्शिशुः स्नानोपकरणमादाय प्रहृष्टमनाः तेन अभ्यागतेन सह प्रस्थितः। तथानुष्ठिते से वणिक् स्नात्वा तं शिशुं गिरिगुहायां प्रक्षिप्य, तद्वारं बृहच्छिलयाच्छाद्य सत्त्वरं गृहमागतः।

पृष्ठश्च में वणिजः ''भोः। अभ्यागत। कथ्यतां कुत्र में शिशुर्यस्त्वया सह नदीं गत;'' ? इति।

स आह– ''नदीतटात्स श्येनेन हृतः'' इति। श्रेष्ठ्याहमिथ्यावादिन्।

किं क्वचित् श्येनो बालं हर्तुं शक्नोति? तत् समर्पय मे सुतम् अन्यथा राजकुले निवेदयिष्यामि'' इति।

स आह– ''भोः सत्यवादिन्। यथा श्येनो बालं न नयति, तथा मूषका अपि लौहघटितां तुलां न भक्षयन्ति। तदर्पय मे तुलाम्, यदि दारकेण प्रयोजनम्'' इति। एवं विवदमानौ तौ द्वावपि राजकुलं गतौ।

**364.** जीर्णधनस्य गृहे किमासीत्?

(A) मूषकः (B) लौहघटिता तुला
(C) वणिक्शिशुः (D) श्येनः

**365.** सुचिरं कालं कः देशान्तरं भ्रमितवान्?

(A) जीर्णधनः (B) श्येनः
(C) श्रेष्ठी (D) वणिक्शिशुः

**366.** पितृव्यः कस्य?

(A) श्रेष्ठिनः (B) सत्यवादिनः
(C) जीर्णधनस्य (D) शिशोः

**367.** 'पुरुषाधमः' इति समस्तपदस्य विग्रहः?

(A) पुरुषः अधमः यस्य सः
(B) पुरुषात् अधमः
(C) पुरुषश्चासौ अधमश्च
(D) पुरुषस्य अधमः

**368.** 'मूषकैः' इति पदस्य पर्यायो भवति–

(A) कुक्कुरैः (B) चोरैः
(C) आखुभिः (D) वृषदंशैः

**369.** प्रहृष्टमनाः कः आसीत्?

(A) शिशुः (B) पितृव्यः
(C) वणिक् (D) जीर्णधनः

**370.** गद्यांशेऽस्मिन् 'संस्थाप्य' इत्यर्थे किं पदं प्रयुक्तम्?

(A) निविश्य (B) सन्दृश्य
(C) प्रक्षिप्य (D) आच्छाद्य

**371.** कौ राकुलं गतौ?

(A) पुत्र–पितृव्यौ
(B) जीर्णधन–वणिजौ
(C) विभवहीन–पुरुषाधमौ
(D) श्येन–मूषकौ

**निर्देश (प्रश्न संख्या 372 से 378 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

कश्चित् कृषतः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत् अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत्। तथापि वृषः नोत्थितः। भूमौ पतिते स्वपुत्रं दृष्ट्वा

सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्–''अयि शुभे ! किमेवं रोदिषि? उच्यताम्'' इति। सा च

विनिपातो न वः कश्चित् दृश्यते त्रिदशाधिपः।
अहं तु पुत्रं शोचामि, तेन रोदिमि कौशिक !।।

'भोः वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न?'' इति प्रत्यवोचत्।

''भद्रे ! नूनम्। सहस्त्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्? ''इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्–

यदि पुत्रसहस्त्रं में, सर्वत्र सममेव मे।
दीनस्य तु सुतः शक्र ! पुत्रस्याभ्यधिका कृपा।।

''बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव'' इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयद्रवत्। स च तामेवमसान्त्वयत्–''गच्छ वत्से ! सर्वं भद्रं जायेत''।

**372.** गद्यांशे प्रयुक्तं 'बलीवर्दः'–शब्दस्य कोऽर्थः?

(A) गर्दभः (B) बलवान्
(C) गौः (D) वृषः

**373.** सुराधिपः कः?

(A) वासवः (B) इन्द्रः
(C) शरीरेण (D) उपर्युक्ताः सर्वेऽपि

**374.** गद्यांशे 'वेगेन' इत्यर्थे प्रयुक्तं पदं किम्?

(A) जवेन (B) तेन
(C) शरीरेण (D) तोदनेन

**375.** 'दृष्ट्वा' इति प्रयोगस्य युक्तः कृतन्तप्रत्ययः अस्ति–

(A) क्त (B) शानच्
(C) क्त्वा (D) तुमुन्

**376.** मातुः अभ्यधिका कृपा कस्मिन् भवति?

(A) सुबले
(B) दुर्बले
(C) सहस्त्राधिकेषु पुत्रेषु
(D) बलीवर्दयोः

**377.** 'अपत्यानि' इति पदस्य पर्यायः अस्ति–

(A) सन्ततिः (B) कुटुम्बानि
(C) पिता (D) पुत्र्यः

**378.** 'कृच्छ्रेण' इति पदस्य विपरीतार्थकं पदं भवति–

(A) दुःखेन (B) सन्तोषेण
(C) कष्टेन (D) सुलभतया

**निर्देश (प्रश्न संख्या 379 से 388 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारित प्रश्नानां विकल्पात्मकोत्तरेषु समुचितम् उत्तरं चित्वा लिखत।

संस्कृतभाषा अतीव वैज्ञानिकी। केचन कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा। अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदासादीनां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। कौटिल्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं

सर्वप्रथमम् आर्यभटः अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। संस्कृते यानि अन्यानि शास्त्राणि विद्यन्ते तेषु वास्तुशास्त्र, बगालविज्ञानं रसायनशास्त्रं, खगोलशास्त्र ज्योतिशास्त्रं, विमानाशास्त्रम् इत्यादीनि उल्लेखनीयानि। संस्कृते विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति, यथा–सत्यमेव जयते, वसुधैव कुटुम्बकम्, विद्ययाऽमृतमश्नुते, योगः कर्मसु कौशलम् इत्यादयः। सर्वभूतेषु आत्मवत् व्यवहारं कर्तुं संस्कृतभाषा

सम्यक् शिक्षयति। केचन कथयन्ति यत् संस्कृतग्रन्थेषु मानवजीवनाय विविधाः विषयाः समाविष्टाः सन्ति। आम्, ते सत्यं कथयन्ति। महापुरुषाणां मतिः, उत्तमजनानां धृतिः सामान्यजनानां जीवनपद्धतिः च वर्णिताः सन्ति एतेषु ग्रन्थेषु। अतः अस्माभिः सस्कृतम् अवश्यमेव पठनीयम्। तेन मनुष्यस्य समाजस्य च परिष्कारः भवेत्। उक्तञ्च

अमृतं संस्कृतं मित्र!
सरसं सरलं वचः।
भाषासु महनींय यद्
ज्ञानविज्ञानपोषकम्।।

**379.** कस्मिन् पदे सप्तमी विभक्तिः अस्ति?
(A) ते (B) जगति
(C) विद्यन्ते (D) अश्नुते

**380.** द्वन्द्वसमासस्य उदाहरण् अस्ति—
(A) विमानशास्त्रम् (B) विश्वप्रसिद्धम्
(C) जीवनपद्धतिः (D) चरकसुश्रुतयोः

**381.** मनुष्यस्य समाजस्य परिष्कारः केन भविष्यति?
(A) सङ्गणकप्रयोगेण
(B) विज्ञानेन
(C) संस्कृतभाषापठनेन
(D) गणितशास्त्रेण

**382.** चरकसुश्रुतयोः योगदानं कस्मिन् शास्त्रे अस्ति?
(A) चिकित्साशास्त्रे
(B) सङ्गीतशास्त्रे
(C) काव्यशास्त्रे
(D) विमानशास्त्रे

**383.** आर्यभटस्य योगदानं कस्मिन् शास्त्रे अस्ति?
(A) समाजशास्त्रे
(B) वास्तुशास्त्रे
(C) गणितशास्त्रे
(D) चिकित्साशास्त्रे

**384.** अर्थशास्त्रस्य प्रतिपादकः अस्ति—
(A) चरकः (B) कौटिल्यः
(C) कालिदासः (D) सुश्रुतः

**385.** अद्यत्वे संस्कृतभाषा कस्य कृते समुपयुक्ता भाषा मन्यते?
(A) गणितस्य
(B) खलोविज्ञानस्य
(C) विमानशास्त्रस्य
(D) सङ्गणकस्य

**386.** 'कथितम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?
(A) उक्तम् (B) प्रसिद्धम्
(C) कथयन्ति (D) उल्लेखनीयानि

**387.** कस्मिन् पदे 'अनीयर्' प्रत्ययः प्रयुक्तः?
(A) इत्यादीनि (B) उल्लेखनीयानि
(C) अन्यानि (D) वैज्ञानिकी

**निर्देश (प्रश्न संख्या 388 से 393 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारित प्रश्नानां विकल्पात्मकोत्तरेषु समुचितम् उत्तरं चित्वा लिखत।

प्रकृतिः मनुष्यस्य उपकारिणी। मनुष्यैः सह तस्याः शाश्वत सम्बन्धः। सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति। पशवः पक्षिणः वनस्पतयः च तस्याः एव अङ्गानि। निराशाः असहायाः जनाः तस्याः एव आश्रयं प्राप्नुवन्ति। सा स्वमनोहरेण सौन्दर्येण नीरसं हृदयम् अपि सरसं करोति। सूर्यः चन्द्रः च तस्याः नेत्रे। शस्य–श्यामला एषा भूमिः। विविधाः ओषधयः सकलानि खनिजानि च प्रकृतेः एवं शोभा। सा तु नित्यम् एवं एतैः साधनैः सर्वेषाम् उपकारं करोति, परम् अधन्यः अयं जनः कृतज्ञतां विहाय असाधुसेवितं पन्थानं गच्छति, विविधानि च कष्टानि च अनुभवति। नरः शाश्वतं सुखं वाञ्छति चेत् तर्हि प्रकृतेः प्रतिकूलं कदापि न आचरेत् इति।

**388.** अत्र विधिलिङ्लकारस्य उदाहरणम् अस्ति—
(A) कृतज्ञताम् (B) वाञ्छति
(C) प्रकटयति (D) आचरेत्

**389.** अत्र कस्मिन् पदे द्वितीया विभक्तिः प्रयुक्ता?
(A) परम् (B) नित्यम्
(C) कृतज्ञताम् (D) शाश्वतम्

**390.** का आत्मानं विविधरूपेषु प्रकटयति?
(A) निराशा (B) प्रकृतिः
(C) शोभा (D) उपकारिणी

**391.** कः असाधुसेवितं पन्थानं गच्छति?
(A) मनुष्यः (B) चन्द्रः
(C) पशुः (D) वनस्पतिः

**392.** मनुष्यः कस्याः प्रतिकूलं न आचरेत्?
(A) शोभायाः (B) निराशायाः
(C) कष्टानि (D) कृतज्ञतायाः

**393.** 'खनिजानि' इति पदस्य अत्र विशेषपदं किम्?
(A) विविधानि (B) अङ्गानि
(C) कष्टानि (D) सकलानि

**निर्देश (प्रश्न संख्या 394 से 401 तक)**

अधोलिखितानां प्रश्नानां विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखित।

एकस्मिन् ग्रामे चत्वारः ब्राह्मणपुत्राः परस्परं मित्रभावेन वसन्ति स्म।

तेषु त्रयः शिक्षिताः पण्डिताः च आसन् परं चतुर्थः सुबुद्धिः नामकः तेषां मित्रं बुद्धिमान् किन्तु शास्त्रविमुखः आसीत्। अध्ययने तु तस्य रुचि एव नासीत्। धनस्य अभावे एकदा तैः विचारितं यत् किमर्थं न देशान्तरं गत्वा वयं धनोपार्जनं कुर्मः। एवं विचार्य ते पूर्वदेशं प्रति चलितुम् उत्सुकाः अभवन्।

सहसा एव वनस्य मार्गे गच्छन्तः ते कानिचित् अस्थीनि अपश्यन्। स्वशास्त्रज्ञानेन हर्षितः एकः अवदत् अहो! किमर्थं न वयं स्वविद्यायाः परीक्षां कुर्मः। एतं जीवं स्वविद्याप्रभावेण अहं जीवितं करोमि। एवम् उक्त्वा सः तस्य अस्थिसञ्चयम् अकरोत् तत्पश्चात् द्वितीयेन चर्म–मांस रुधिरं च संयोजितम्। तृतीयः अपि स्वज्ञानस्य परीक्षां कुर्वन् यावत् तस्मिन् जीवनं सञ्चारितम् उद्यतः तावदेत सुबुद्धिना निषिद्धः उक्तः च–भोः। एषः तु सिंहः प्रतीयते। यदि अस्मिन् प्राणान् सञ्चारयसि तदा जीवितः भूत्वा एष अस्मान् सर्वान् एव मारयिष्यति। इदं श्रुत्वा क्रोधितः तृतीयः अकथयत् रे मूर्ख! अहं विद्यायाः विफलतां न करिष्यामि। अहं तु एतस्मिन् प्राणान् सञ्चारयामि। सुबुद्धिः अवदत्क्षणं प्रतीक्षस्व, यावदहं वृक्षमारोहामि। इत्युक्त्वा सः वृक्षमारोहत्। तदा तृतीयेन

ब्राह्मणेन तस्मिन् यथा प्राणाः सञ्चारिताः तथैव सिंहः जीवितः भूत्वा तान् ब्राह्मणान् आक्रम्य तेषां नाशमकरोत् तत्पश्चात् सुबुद्धिः वृक्षादवतीर्य स्वगृहं गतः।

**394.** ग्रामे ब्राह्मणपुत्राः कथं वसन्ति स्म?
(A) हीनभावेन (B) मित्रभावेन
(C) दीनभावेन (D) शत्रुभावेन

**395.** शास्त्रविमुखस्य मित्रस्य किं नाम?
(A) दुर्बुद्धिः (B) अल्पबुद्धिः
(C) राष्ट्रबुद्धिः (D) सुबुद्धिः

**396.** मार्गे गच्छतः ते किम् अपश्चन्?
(A) दुग्धपात्रम् (B) पुष्पभाजनम्
(C) अस्थीनि (D) रक्तबिन्दून्

**397.** 'विचार्य' इति पदस्य अर्थः भवति—
(A) विचारं कृत्वा (B) भोजनं कृत्वा
(C) स्नानं कृत्वा (D) हासं कृत्वा

**398.** सुबुद्धिः कुत्र आरोहत्?
(A) वृक्षम् (B) भवनम्
(C) यानम् (D) पर्यङ्कम्

**399.** गद्यांशेऽस्मिन् 'आरुह्य' पदस्य विपरीतार्थकं किं पदं प्रयुक्तम्?
(A) प्रदाय (B) विहाय
(C) विहस्य (D) अवतीर्य

**400.** ते कं देशं प्रति चलितुम् उत्सुकाः अभवन्?
(A) पूर्वदेशम् (B) उत्तरदेशम्
(C) दक्षिणदेशम् (D) पश्चिमदेशम्

**401.** अस्थिसमूहे चर्म–मांस–रुधिरं केन संयोजितम्?
(A) द्वितीयेन (B) तृतीयेन
(C) चतुर्थेन (D) प्रथमेन

**निर्देश (प्रश्न संख्या 402 से 408 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याश्चैका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान्निक्षिप्य पुत्रीमादिदेश–सूर्यातपे तण्डुलान् खगभ्या रक्ष। किञ्चित्कालादनन्तरम् एको विचित्रः काकः समुड्डीय तामुपाजगाम।

नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तं तण्डुलान् स्वादन्तं हसन्तश्च विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ती सा प्रार्थयत् तण्डुलान् मा भक्षय। मदीया माता अतीव निर्धना वर्तते। स्वर्णपक्षः काकः प्रोवाच, मा शुचः। सुर्योदयात्प्राग् ग्रामद्बहिः पिप्पलवृक्षमनु

त्वया गन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि। प्रहर्षिता बालिका निद्रामपि न लेभे।

सूर्योदयात्पूर्वमेव सा तत्रोपस्थिता। वृक्षस्योपरि विलोक्य सा चाश्चर्यचकिता सज्जता यत्तत्र स्वर्णमयः प्रासादो वर्तते। यदा काकः शयित्वा प्रबुद्धस्तदा तेन स्वर्णगवाक्षात्कथितं हंहो बाले। त्वमागता, तिष्ठ, अहं

त्वत्कृते सोपानमवतारयामि, तत्कथय स्वर्णमयं रजतमययुतं ताम्रमयं वा? कन्या प्रावोचत् अहं निर्धनमातुर्दुहिताऽस्मि। ताम्रसोपानेनैव आगमिष्यामि। परं स्वर्णसोपानेन सा स्वर्णभवनमाससाद।

चिरकालं भवने चित्रविचित्रवस्तूनि सज्जितानि दृष्ट्वा सा विस्मयं गता। श्रान्ता तां विलोक्य काकः प्राह—पूर्वं लघुप्रातराशः क्रियताम् वद त्वं स्वर्णस्थाल्या भोजनं करिष्यसि किं वा रजतस्याल्यामुत ताम्रस्थालयाम्? बालिका व्याजहार—ताम्रस्थाल्यामेवाहं निर्धना भोजनं करिष्यामि। तदा सा कन्या चाव्चर्यकिता सञ्चाता यदा स्वर्णकाकेन स्वर्णस्थाल्यां भोजनं परिवेषितम्। नैतादृक् स्वादु भोजनमद्यावधि बालिका खादितवती। काको ब्रूते—बालिके। अहमिच्छाम यत्त्वं सर्वदा चात्रैव तिष्ठ परं तव माता वर्तते चैकाकिनी। त्वं शीघ्रमेव स्वगृहं गच्छ। इत्युक्त्वा काक कक्षाभ्यन्तरात्तिस्त्रो मञ्जूषां निस्सार्य तां प्रत्यवदत् बालिके! यथेच्छं गृहाण मञ्जूषामेकाम्। लघुतमां मञ्जूषां प्रगृह्य बालिकया कथितमियदेव मदीयतण्डुलानां मूल्यम्, गृहमागत्य तया मञ्जूषा समुद्घाटिता, तस्यां महार्हाणि हीरकाणि विलोक्य सा प्रहर्षिता तद्दिनाद्धनिका च सञ्जाता।

**402.** 'पुरा' इति पदस्य पर्यायो भवति—
(A) प्राचीनकालः (B) साम्प्रतम्
(C) सायंकालः (D) मध्याह्नम्

**403.** तस्याः दुहिता कथमासीत्?
(A) विनम्रा मनोहरा च
(B) रूपिणी गर्विणी च
(C) लुब्धा मिथ्याभाषिणी च
(D) कठोरा कर्कशा च

**404.** 'खगाः' इति पदस्य पर्यायो भवति—
(A) वृक्षाः (B) मत्स्याः
(C) पक्षिणः (D) पशवः

**405.** सूर्योदयात् प्रक् कं वृक्षमनु तया गन्तव्यम्?
(A) वटवृक्षम् (B) आम्रवृक्षम्
(C) पिप्पलवृक्षम् (D) निम्बवृक्षम्

**406.** वृक्षस्योपरि स्थितः प्रासादः कीदृशः आसीत्?
(A) स्वर्णमयः (B) लौहमयः
(C) ताम्रमयः (D) मृण्मयः

**407.** ''अहं त्वत्कृते सोपानमवतारयामि'' इति कोऽवदत्?
(A) रजतपक्षः काकः (B) ताम्रपक्षः काकः
(C) कृष्णपक्षः काकः (D) स्वर्णपक्षः काकः

**408.** अनुच्छेदेऽस्मिन 'दृष्ट्वा' इति पदस्य स्थाने किं पदं प्रयुक्तम्?
(A) श्रुत्वा (B) विधाय
(C) कृत्वा (D) विलोक्य,

## निर्देश (प्रश्न संख्या 409 से 417 तक)

अधोलिखित गद्यांशं पठित्वा प्रश्नानां विकल्पात्म–कोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखित।

सुमहानयं अस्मांक भारतदेशः। अत्र बहवो महापुरुषाः अजायन्त। समाजे व्याप्तानां कुरीतीनां विनाशं कृतवन्तः। तेषु एव आसीत् स्वामी विवेकानन्दः येन भारतस्य अध्यात्मगौरवं विदेशेषु प्रतिष्ठापितम्।

विवेकानन्दस्य जन्म कोलकाता–नगरे **1863** तमे वर्षे अभवत्। अस्य जननी भुवनेश्वरी पिता च विश्वनाथ आसीत्। अस्य आरम्भिकं नाम नरेन्द्रः आसीत्।

नरेन्द्रः शैशवादेव कुशाग्रबुद्धिः स्वभावतः चञ्चलः मनसा च अशान्तः आसीत्। कदाचित् रामकृष्णपरमहंसानां स्पर्शमात्रेण अस्य चेतना जागृता। परतन्त्रभारतस्य दुर्दशां विचार्य रामकृष्णः देशस्य गौरवप्रतिष्ठार्थं नरेन्द्रम् आदिशत्। गुरोः आज्ञा स्वीकृत्य विवेकानन्दः समग्रे राष्ट्रे पर्यटनमकरोत्। मोहनिद्राप्रसुप्तान् जनान् यथाशक्ति प्रबोधितवान्।

**1893** तमे वर्षे विवेकानन्दः अमेरिकाराष्ट्रस्य शिकागो नाम्नि नगरे समायोजिते विश्वधर्मसम्मेलने भारतस्य प्रतिनिधित्वमकरोत्। तत्र असौ अमेरिककावासिनः बन्धवो भगिन्यश्च इति पदाभ्याम् सम्बोधितवान् तदा समग्रं सभाभवनं करतलध्वनिना गुञ्जायमानं जातम्। सप्ताहं यावत् महामेधावी विवेकानन्द्रः शून्यमवलम्ब्य स्वकीयम् विश्वं वशीकुर्वन् विवेकानन्दः घोषितवान् सर्वेऽपि जनाः प्राणिषु समत्वदृष्टिम् अवधारयन्तु चेत् तर्हि स्वधर्मविशेषं पालयन्तः अपि विश्वबन्धुत्वं स्थापयितुं शक्यते।

**409.** विवेकानन्दः कीदृशान् जनान् प्रबोधितवान्?
(A) मोहनिद्राप्रसुप्तान् जनान्
(B) वृक्षारूढ़ान् जनान्
(C) स्नानशीलान् जनान्
(D) दानशीलान् जनान्

**410.** शिकागोनगरे विश्वधर्मसम्मेलने कम् अवलम्ब्य विवेकानन्दः भाषणां कृतवान्?
(A) धरामलम्ब्य (B) शून्यमवलम्ब्य
(C) वृक्षमवलम्ब्य (D) नदीमवलम्ब्य

**411.** विश्वबन्धुत्वं कथं स्थापयितुं शक्यते?
(A) प्राणिषु भेददृष्टिद्वारा
(B) प्राणिषु समत्वदृष्टिद्वारा
(C) धनिकेभ्यः धनदानेन
(D) तृप्तेभ्यः जलदानेन

**412.** 'समग्रम' इति पदस्य पर्यायः अस्ति—
(A) सम्पूर्णम् (B) अल्पम्
(C) अर्धम् (D) अर्धार्धम्

**413.** महानयं अस्माकं देशः इति वाक्यं कस्य देशस्य कृषि अस्ति?
(A) तुर्कदेशस्य (B) अफ्रीकादेशस्य
(C) जापानदेशस्य (D) भारतदेशस्य

**414.** समाजे व्याप्तानां कुरीतीनां विनाशं के कृतवन्तः?
(A) महापुरुषा (B) सिंहाः
(C) काकाः (D) मण्डूकाः

**415.** भुवनेश्वरी देवी कस्य माता आसीत्?
(A) श्रवणकुमारस्य (B) विवेकानन्दस्य
(C) सुरेन्द्रस्य (D) गोकर्णस्य

**416.** विवेकानन्दस्य आरम्भिंक नाम किम् आसीत्?
(A) क्षमारावः (B) वाल्मीकिः
(C) सोहनलालः (D) नरेन्द्रः

**417.** देशस्य गौरवप्रतिष्ठार्थं विवेकानन्दं कः आदिशत्?
(A) रामकृष्णः (B) कृष्णबलरामः
(C) पोद्दारः (D) बालकृष्णः

## निर्देश (प्रश्न संख्या 418 से 423 तक)

अधोलिखित गद्यांशं पठित्वा तदाधारितप्रश्नानां विकल्पात्मकोत्तरेभ्यः समुचितम् उत्तरं चित्वा लिखत।

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम्। तत्र सर्वस्वामिगुणोपेतः सुदर्शनः नाम नरपतिः आसीत्। स भूपतिः एकदा पठ्यमानं श्लोकद्वयं शुश्राव।
अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ।। **1** ।।
यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।। **2** ।।

आत्मनः पुत्राणाम् अनधिगतशास्त्राणां नित्यमुन्मार्गगामिनाम् आचारहीनतया उद्विग्नमनाः स राजा चिन्तयामास—

स जातो येन जातेन याति वंशः समुन्नतिम्।
परिवर्तिनि संसारे मृतः को वा न जायते।। **3** ।।
तत् कथम् इदानीम् एते मम पुत्राः गुणवन्तः क्रियन्ताम् ?

यतः
माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा।। **4** ।।

अत्र तु दैवम् कारणमिति न उचितम्, अतः सर्वथा दैवम् आलस्यं च विहाय पुरुषार्थः विधेयः। एतत् चिन्तयित्वा राजा पण्डितसभां कारितवान्। राजा उवाच–'भोः भोः पण्डिताः! श्रूयतां मम वचनम्–अस्ति कश्चिद् एवम्भूतो विद्वान यो मम पुत्राणां नित्यम्
उन्मार्गगामिनाम् अनधिगतशास्त्राणाम् इदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः?

अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीति–शास्त्रतत्त्वज्ञः बृहस्पतिः इव अब्रवीत्–'देव! महाकुलसम्भूता एते राजपुत्राः, तत् मया नीतिं ग्राहयितुं शक्यन्ते।' अतोऽहं षण्मासाभ्यन्तरे भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् करिष्यामि। राजा सविनयं पुनरुवाच–कोऽत्र संदेहः?
कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः।
अश्मापि याति देवत्यं महद्भिः सुप्रतिष्ठितः।। **5** ।।

**418.** सर्वस्य लोचनं किम्?
(A) शास्त्रम् (B) यौवनम्
(C) धनसम्पत्तिः (D) वंशःपरू

**419.** 'संसारे' इत्यस्य विशेषणं किम्?
(A) हंसमध्ये (B) सभामध्ये
(C) परिवर्तिनि (D) सताम्

**420.** पाटलिपुत्रं कस्यास्तीरे वर्तते?
(A) ब्रह्मपुत्रस्य (B) भागीरथ्याः
(C) यमुनायाः (D) नर्मदायाः

**421.** 'विहाय' इत्यत्र कः प्रत्ययः?
(A) ण्यत् (B) क्यप्
(C) यत् (D) ल्यप्

**422.** उन्मार्गगामिनः के सन्ति?
(A) बकाः (B) विद्वांसः
(C) राजानः (D) राजपुत्राः

**423.** कीटः कस्य संगात् शिरः आरोहति?
(A) राजपुत्राणाम् (B) पण्डितानाम्
(C) पुष्पाणाम् (D) अश्मनः

**निर्देश (प्रश्न संख्या 424 से 432 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां समुचितम् उत्तरं चित्वा लिखत।

कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माऽहम्। कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूर्त वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः पुनः जायते विलीयते च परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयम्, 'कियती प्राचीना इयम् सृष्टिः!' नैव! तर्हि शृणुत ध्यानेन। 'कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति चत्वारि युगानि। चतुर्णां युनानां समूहः एव महायुगम्। एकसप्ततिमहायुगानाम् एकम् मन्वन्तरम्। चतुर्दशमन्वन्तराणां समूहः कल्पः। एकः कल्प एव ब्रह्मणः एकं दिनं मन्यते। ब्रह्मणः आयुः शतं वर्षाणि।'

अहो! श्रूयते शंखध्वनिः! युगादिपर्वणि कस्मिंश्चिद् गृहे नूतनसंवत्सरस्य अभिनन्दनसमारोह आयोज्यते। अद्य कलियुगं तु द्विपञ्चाशत्तमं शतकं प्रविशति। तदैव समारोहारम्भे कश्चन विद्वान सङ्कल्पवाचनं करोति ......
........

विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणः द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे यमुनातीरे दिल्लीमण्डले
'नन्दन' नाम संवत्सरे, सूर्योत्तरायणे, वसन्तर्तौ
चैत्रमासे, शुक्लपक्षे, प्रतिपदायां तिथौ
गुरुवासरे उत्तराभाद्रपदनक्षत्रे, शुक्लयोमे किंस्तुघ्नकरणे .............. नामाहं मङ्गलकार्यं करिष्ये।

अये! कथम् इमं सङ्कल्पं श्रुत्वा विस्मिताः यूयम्? अयं तु वर्तमानकालदेशपरिचायकः। प्राचीनतमा हि एषा गणना। अपि ज्ञायते मदीयायाः अस्या गणनाया आधारः?

मम कलनस्य तु आधारः सूर्य एव। सूर्यस्य द्वे गती उत्तरायणम् दक्षिणायनञ्च। प्रत्येकम् अयनस्य अवधिः षण्मायाः। भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि। पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति। यथा चैत्रे मासे पूर्णिमा चित्रानाक्षत्रयुता भवति, अतः तस्य मासस्य नाम 'चैत्रः' भवति।

संवत्सरस्य तु विषये इदमुच्येत–
षण्णाभेर्द्वादशाक्षस्य चतुर्विंशतिपर्वणः।
यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः।। 1।।

षड्ऋतव एव मे नाभयः। द्वादशमासा एव अक्षत्वेन गण्यन्ते। चतुर्विंशतिः पक्षा एव पर्वाणि। षष्ट्युत्तरत्रिशतानि दिनानि एव अराणि।

परमहम् अखाण्डः शाश्वतः विभुः च। नूतनसंवत्सरोत्सवदिवसे इदानीम् इयमेव मे शुभाशंसा ..........
सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु।
सर्वः कामानवाप्नोतु, सर्वः सर्वत्र नन्दतु।। 2।।

**424.** विश्ववस्य आत्मा कः?
(A) कालः (B) जगत्
(C) अवधिः (D) मन्वन्तरम्

**425.** कालः कस्य आयुः–प्रमाणं गणयति?
(A) पूर्णिमायाः (B) विकासस्य
(C) जगतः (D) उत्पत्तेः

**426.** कस्य ध्वनिः श्रूयते?
(A) वंश्याः (B) ढक्कायाः
(C) शंखस्य (D) भेर्याः

**427.** महायुगे कति युगानि भवन्ति?
(A) पञ्च (B) चत्वारि
(C) त्रीणि (D) द्वे

**428.** सूर्यस्य गति कतिविधा?
(A) चतुर्धा (B) बहुधा
(C) त्रिधा (D) द्विधा

**429.** प्रत्येकम् अयनस्य अवधिः कियान्?
(A) चतुर्मासाः (B) षण्मासाः
(C) पञ्चमासाः (D) सप्तमासाः

**430.** भारतीयमासानां नामानि कैः सम्बद्धानि?
(A) नक्षत्रनामभिः (B) देवैः
(C) ब्रह्मणा (D) देशैः

**431.** 'वीक्षमाणः' इत्यत्र कः प्रत्ययोऽस्ति?
(A) शानच् (B) शतृ
(C) क्त (D) मतुप्

**432.** 'शुभकामना' इत्यर्थे किं पर्यायपदमत्र प्रयुक्तम्?
(A) शोभनम् (B) शोभनीया
(C) शुभा (D) शुभाशंसा

**निर्देश (प्रश्न संख्या 433 से 442 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां प्रदत्तेषु समुचितम् उत्तरं चित्वा लिखित।

दिल्लीनगरे तानसेनो नाम प्रख्यातो गायको बभूव। तस्य समकालिकः कोऽपि सङ्गीतविद् तस्समोऽभ्यधिको वा नो श्रूयते स्म। आराद् राजानो धनिनो गायकाश्च दिल्लीमागत्य तस्य सङ्गीतसुधां श्रवणाञ्जलिभिः पायं पायं तुष्यन्ति स्म। धन्यः खलु कलाविलासिन्यः समुपासनेन सिद्धो जनः।

तानसेनस्योपरि जननेतृणां भूयानभिमानः। स एव राज्ञः अकबरस्य महामात्यो भवेदितिं तेषाम् आग्रहः। अतस्तं तदा तदा गायनचक्रवर्तिनो महात्म्यं राज्ञे निवेद्य तस्मै महामन्त्रिपदानुग्रहाय निर्बन्धुः। राजा तु तस्य कलाविशारदीमङ्गीकृत्यापि प्रधानसाचिव्ये तस्य योग्यतां व्यक्तवाचा निराचकार।

राज्ञाऽवमानितास्ते तानसेनस्य महत्त्वम् उपदर्शयितुं सङ्गीतसन्ध्याम् आयोजयामासुः। तदर्थं राजानं नागरांश्च प्रधानानामन्त्रयामासुः।

सर्वेषु सामोदं सम्मिलितेषु भगवान् सहस्रकिरणः स्वांशुजालमुपसंहरन्नरसिक इव प्रतीच्यां क्वापि लीनः। तदा तानसेन सर्वत्र गाढान्धकारं प्रसरन्तं लक्षयन्दीपकरागमरेभे, येन स्वयमेव दीपा दीपिताः। सर्वे विस्मिताश्चित्रवदुपविविशुः। किन्तु हन्तः ग्रीष्मकाले तस्मिन् जनसम्मर्दभूयिष्ठायां सभायां दीपेषु प्रज्वालितेषु सर्वे पायं स्विन्नगात्रास्तेपुः। इदमालक्ष्य महानुभावो गायको मल्हाराभिधं रागवशेषं जगौ। अहो! अचिरादेव शीतलाः शीकराः सर्वानाप्यायन्ति स्म।

कार्यक्रमस्यान्ते जननायकः कश्चित् तानसेनस्य सामर्थ्यं सभासदां समेषां हर्षध्वनिभिः सह प्रशशंस, तस्मात् एव महामन्त्रिपदप्रदानाय च राजानं प्रार्थयामास। राजा तस्य सङ्गीतकलायाम्
अद्वितीयतां असकृत् तुष्टाव। किन्तु प्रधानसचिवपदे सन्तं वीरबलं त्यक्तुं नास्ति कारणम् इत्युक्त्वा सभ्याशयानुरोधेन वीरबल–तानसेनयोः परीक्षां कारयिष्ये इत्युपसञ्जहार।

**433.** तानसेनः कः ?
(A) प्रसिद्धो राजा (B) जननायकः
(C) प्रख्यातो गायकः (D) सेनापतिः

**434.** कः अकबरस्य महामात्यो भवेदिति जनानाम् आग्रहः?
(A) तानसेनः (B) वीरबलः
(C) जहाङ्गीरः (D) अब्दुल्लः

**435.** सङ्गीतसन्ध्या किमर्थम् आयोजिता?
(A) अकबरं सम्मानयितुम्
(B) वीरबलम् अपहसितुम्
(C) जनानां संघटनां कर्तुम्
(D) तानसेनस्य माहात्म्यं दर्शयितुम्

**436.** कस्य रागस्य गानेन प्रदीपाः दीपिताः ?
(A) शङ्कराभरणरागस्य
(B) दीपकरागस्य
(C) अनुरागस्य
(D) विरागस्य

**437.** दीपेषु प्रज्वालितेषु किमभवत् ?
(A) जनाः भीत्या चकम्पिरे
(B) जनाः अनृत्यन्
(C) जनाः स्विद्यन्ति स्म
(D) मृगाः पत्तने आगताः

**438.** कयोः परीक्षां कर्तुम अकबरो निर्णयम् अकरोत्?
(A) मन्त्रिसेनानायकयोः
(B) वीरबलतानसेनयोः
(C) दीपकमल्हाररागयोः
(D) स्त्रीपुरुषयोः

**439.** सहस्रकिरणः कः ?
(A) सूर्यः (B) चन्द्रः
(C) सिंहः (D) राजा

**440.** अचिरात् शब्दस्य विरुद्धार्थकः शब्दः—
(A) शीतताः (B) सर्वान्
(C) चिरात् (D) आयान्ति

**441.** 'देशसञ्चारः' इतिपदे कः समासः?
(A) अव्ययीभावः (B) कर्मधारयः
(C) द्वन्द्वः (D) तत्पुरुषः

**442.** आरात् इति एतत्—
(A) नामपदम् (B) क्रियापदम्
(C) उपसर्गः (D) अव्ययम्

**नर्देश (प्रश्न संख्या 443 से 457 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां प्रदत्तेषु समुचितम् उत्तरं चित्वा लिखत।

**1.** तस्मिन्मार्गे आरक्षिणः गभीरपादाचार–ध्वनिः शनैः शनैः गुञ्जायते स्म। एतावदवधि न हि महान् विलम्बो जातः, रात्रेः दशवादनकालोऽपि न संवृत्त आसीत्, परं तत्स्थानं जनशून्यमेवावर्तत। शैत्य–परिपूर्णवायुः, वृष्टिबिन्दवश्च प्रायशः बहून् जनान् गृहाभ्यन्तरे एव स्थातुं विवशीकृतवन्तः।

**2.** अयम् आरक्षी स्वनिश्चितमत्या प्रचलन्, किमु गृहद्वाराणि समुचितरूपेण पिहितानि न वेति सुनिश्चेतु–यदा कदा अवरुद्धगतिको भवति स्म। सममेव च हस्तधृतं स्वकीयदण्डं दक्षतापूर्वकं भ्रामयतः सिंहावलोकनन्यायवत् शान्तमार्गस्योपरि तस्य दृष्टिः अपि निपतति स्म।

**3.** दण्डसंचालपूर्वकं तस्य गमनं शान्तमासीत्। तस्मिन्मार्गे बहवः आपणाः कार्यालयाश्चासन् ये किंचित्कालपूर्वमेव पिहितीभूताः। विद्युत्प्रकाशेन द्योतितस्थानेषु औषधापणः, धूम्रवर्तिका–विक्रयकेन्द्रम अनिशं च समुद्घाटितम् उष्णपेयहट्टम् आसन्।

**4.** अकस्मात् आरक्षिकर्मी असौ मन्थरगतिम् आपेदे। एकस्य अयस्कविक्रेतुः आपणस्य अन्धकारावृतद्वारपार्श्वे स कञ्चिज्जनम् अद्राक्षीत्। तन्मुखे अनग्निसम्पर्कवती सिगारवर्तिकासीत्। आरक्षी तं प्रति सम्प्राप्नोत्।

**5.** 'श्रीमन्! सर्वं कुशलं। वर्तते' शीघ्रतया स जमोऽवादीत्। 'अहं तु स्वमित्रं प्रतीक्षे। आवश्योश्च सम्मेलनस्थानमेतद्' इतः विंशतिवर्षपूर्वम् आवाभ्यां निर्धारितमासीत्। किमु भवते इदम् आश्चर्यजनकम् प्रतीयते? ननु आश्चर्यजनकम् एव।'

**(मूलम्–आफ्टर ट्वेण्टी ईयर्स, ओ. हेनरी)**

**443.** तस्मिन् मार्गे प्रायशः किमर्थं कोऽपि न आसीत्?
(A) रात्रौ दशवादनमितः कालः संजात आसीत्
(B) आरक्षी हस्तधृतं दण्डं दक्षतापूर्वकं संचालयति स्म
(C) वृष्टिबिन्दुभिः शीतलवायुना च प्रेरिताः लोकाः गृहाभ्यन्तरे आसन्
(D) आरक्षी तत्र प्रहरति स्म

**444.** आरक्षिणः गमनं कुतः शान्तम् आसीत्?
(A) तन्मार्गे सर्वाणि वस्तूनि निपुणं निरीक्षमाणस्य तस्य गमनं शान्तम् आसीत्
(B) द्वाराणि सम्यक्प्रकारेण पिहितानि न वेति? स सर्वाणि निरीक्षते स्म
(C) तत्र सर्वे आपणाः कार्यालयाश्च पिहिताः अवर्तन्त, न च तत्र कोऽपि आसीत्
(D) स्वकीयाम् उपस्थितिं द्यौतयितुं स दण्डं प्रचालयति स्म

**445.** तद्व्यक्तेरनुसारम् आश्चर्यकरं किम् आसीत्?
(A) तयोः मेलनं विंशतिवर्षपूर्वं निर्धारितम्
(B) आरक्षी तत्र तस्य उपस्थितिविषये तं पृच्छति स्म
(C) तस्मिन् विजने मार्गे एकमात्रम् असौ एव आसीत्
(D) स स्वमित्रं प्रतीक्षते स्म

**446.** प्रायशः बहवो जनाः गृहाभ्यन्तरे स्थिताः, कुतः
(A) अन्धकारभयात्
(B) तत्स्थानस्य निर्जनत्वात्
(C) शीतलवायु–वृष्टिबिन्दुभयात्
(D) आरक्षिभयात्

**447.** 'जनशून्यस्थानेऽस्मिन् एकाकिनः तव उपस्थितेः .......... ब्रूहि' इत्यारक्षी पृष्टवान्। अत्र समुचितं पदं पूरयत
(A) कारणम् (B) विशदीकरणम्
(C) मूलम् (D) व्याख्यानम्

**448.** 'अकस्मात् आरक्षिकर्मी' मन्थरगतिं कुतः आपेदे?' यतो हि
(A) असौ अन्धकारे कञ्चिज्जनम् अपश्यत्
(B) आरक्षी श्रान्तः सञ्जातः
(C) आरक्षी चायपानं कर्तुं समीहते स्म
(D) निर्जनत्वात् स भयभीतः संजातः

**449.** तस्मिन् मार्गे रात्रौ किं गुञ्जायते स्म?
(A) अनभिज्ञातस्य जनस्य ध्वनिः
(B) कुक्कुराणां ध्वनिः
(C) आरक्षिणः पादयोः ध्वनिः
(D) मण्डूकानां ध्वनि

**450.** 'शीघ्रतया वादीत्, अहं तु स्वमित्रं प्रतीक्षे' इति वाक्यस्य कर्मवाच्ये प्रयोगः—
(A) तेन जनः कथितः, मया तु स्वमित्रस्य प्रतीक्षा क्रियते
(B) जनेन कथितम्, अहं मित्रं प्रतीक्षे
(C) शीघ्रतया तेन जनेन उक्तम्। मया तु स्वमित्रं प्रतीक्ष्यते
(D) स जनं कथयति स्म, अहं स्वमित्रस्य प्रतीक्षां करोमि

**451.** 'अहं तु स्वमित्रं प्रतीक्षे'
इति वाक्ये 'प्रतीक्षे' इत्यस्य कर्तृपदं किम्?
(A) तु (B) अहम्
(C) न किमपि पदम् (D) स्वमित्रम्

**452.** प्रायशः बहवो जनाः गृहाभ्यन्तरे स्थिताः, कुतः
(A) अन्धकारभयात्
(B) तत्स्थानस्य निर्जनत्वात्
(C) शीतलवायु–वृष्टिबिन्दुभयात्
(D) आरक्षिभयात्

**453.** 'जनशून्यस्थानेऽस्मिन् एकाकिनः तव उपस्थितेः .......... ब्रूहि' इत्यारक्षी पृष्टवान्। अत्र समुचितं पदं पूरयत
(A) कारणम् (B) विशदीकरणम्
(C) मूलम् (D) व्याख्यानम्

**454.** 'अकस्मात् आरक्षिकर्मी' मन्थरगतिं कुतः आपेदे?' यतो हि
(A) असौ अन्धकारे कञ्चिज्जनम् अपश्यत्
(B) आरक्षी श्रान्तः सञ्जातः
(C) आरक्षी चायपानं कर्तुं समीहते स्म
(D) निर्जनत्वात् स भयभीतः संजातः

**455.** तस्मिन् मार्गे रात्रौ किं गुञ्जायते स्म?
(A) अनभिज्ञातस्य जनस्य ध्वनिः
(B) कुक्कुराणां ध्वनिः
(C) आरक्षिणः पादयोः ध्वनिः
(D) मण्डूकानां ध्वनि

**456.** 'शीघ्रतया वादीत्, अहं तु स्वमित्रं प्रतीक्षे' इति वाक्यस्य कर्मवाच्ये प्रयोगः—
(A) तेन जनः कथितः, मया तु स्वमित्रस्य प्रतीक्षा क्रियते
(B) जनेन कथितम्, अहं मित्रं प्रतीक्षे
(C) शीघ्रतया तेन जनेन उक्तम्। मया तु स्वमित्रं प्रतीक्ष्यते
(D) स जनं कथयति स्म, अहं स्वमित्रस्य प्रतीक्षां करोमि

**457.** 'अहं तु स्वमित्रं प्रतीक्षे'
इति वाक्ये 'प्रतीक्षे' इत्यस्य कर्तृपदं किम्?
(A) तु (B) अहम्
(C) न किमपि पदम् (D) स्वमित्रम्

**निर्देश (प्रश्न संख्या 458 से 460 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नानां प्रदत्तेषु समुचितम् उत्तरं चित्वा लिखत।

एकदा स्वातिनामकः मुनिः पिपासया पीडितोऽभवत्। जलमूलम् अन्विष्यता तेन कश्चन आह्लादकरः शब्दः

श्रुतः। तम् अनुसृत्य स अग्रे गतः। तत्र कुत्रचित् पर्वतात् पतन्तः जलबिन्दवः शुष्क–
पर्णानाम् उपरि पतित्वा मधुरं संगीतं जनयन्ति स्म। एतद् अवगत्य प्रेरितः स तृषाकुलतां विस्मृत्य वेगेन आश्रमम् आगतवान्। संगीतसाधनेषु
प्रतिध्वनेः उत्पादनार्थं यः सूक्ष्मक्रमः आवश्यकः तम् अन्विष्टवान् सः। एवं यत् सङ्गीतसाधनं निर्मितवान् तस्य नाम मृदङ्ग इति।

**458.** 'विस्मृत्य' पदे प्रत्ययः अस्ति?
(A) तल् (B) क्यप्
(C) ल्यप् (D) त्वा

**459.** 'अन्विष्यता' इति पदे विभक्तिः अस्ति?
(A) चतुर्थी (B) तृतीया
(C) प्रथमा (D) द्वितीया

**460.** 'सङ्गीतसाधनम्' पदे समासः अस्ति?
(A) तत्पुरुषः (B) बहुब्रीहिः
(C) द्वन्द्व (D) द्विगुः

**461.** 'जनयन्ति स्म' इति क्रियायाः कर्तृपदम् अस्ति?
(A) शब्दाः (B) मुनिः
(C) पतन्तः (D) जलबिन्दवः

**462.** 'क्तवतु' प्रत्ययः कस्मिन् पदे अस्ति?
(A) अभवत् (B) अन्विष्टवान्
(C) गतः (D) श्रुतः

**463.** 'पीडितोऽभवत्' पदस्य सन्धिच्छेदः अस्ति?
(A) पीड् + अभवत्
(B) पीडितः + अभवत्
(C) पीडित + अभवत्
(D) पीडा + अभवत्

**464.** 'प्रसन्नतादायकः' इति अर्थे अनुच्छेदे किं पदं प्रयुक्तम्?
(A) मृदङ्ग (B) मधुरं
(C) संगीतम् (D) आह्लादकरः

**465.** 'संगीतं' पदस्य विशेषणपदम् अस्ति?
(A) प्रेरितः (B) आह्लादकरः
(C) सूक्ष्मक्रमः (D) मधुरम्

**466.** मुनिः केन प्रेरितः अस्ति?
(A) सङ्गीतसाधनेन (B) जलेन
(C) पिपासया (D) सङ्गीतेन

**निर्देश (प्रश्न संख्या 467 से 475 तक)**

निम्नलिखितं गद्यांशं पठित्वा नवप्रश्नानां उत्तराणि समुचितं विकल्पं चित्वा देयानि—

कस्मिश्चित् समुद्रतीरैकदेशे टिट्टिभदम्पती प्रतिवसतः स्म। ततो गच्छति काले ऋतुसमयमासाद्य टिट्टिभी गर्भमाधत्त। अथ आसन्नप्रसवा सती सा टिट्टिभमूचे—"भोः कान्त! मम प्रसवसमयो वर्त्तते तद्विचिन्त्यतां किमपि निरुपद्रवं स्थानं येन तत्राहमण्डकविमोक्षणमं करोमि"। टिट्टिभः प्राह "भद्रे! रम्योऽयं समुद्रप्रदेशः। तदत्रैव कार्य्यः"। सा आह—"अत्र पूर्णिमादिने समुद्रवेला चरित। सा मत्तगजेन्द्रानपि समाकर्षति तद्दूरमन्यत्र किञ्चित् स्थानमन्विष्यताम्"। तच्छ्रुत्वा विहस्य टिट्टिभः आह—"भद्रे! युक्तमुक्तं भवत्या का मात्रा समुद्रस्य या मम दूषयिष्यति प्रसूतिम् ? किं न श्रुतं भवत्या ?

तन्मया अस्य प्रमाणं कुतूहलादपि द्रष्टव्यम्। किं मम एषोऽण्डापहारे कृते करिष्यति" इति चिन्तयित्वा स्थितः।

अथ प्रसवानन्तरं प्राणयात्रार्थं गतायाः टिट्टिभ्या समुद्रो वेलाव्याजेन अण्डानि अपजहार। अथ आयाता सा टिट्टिभी प्रसवस्थानं शून्यमवलोक्य प्रलपन्ती टिट्टिभमूचे—"भो मूर्ख! कथितमासीत् मया ते यत् समुद्रवेलया अण्डानां विनाशो भविष्यति, तद् दूरतरं व्रजावः परं मूढतया अहंकारमाश्रित्य मम वचनं न करोषि।

**467.** टिट्टिभदम्पती कुत्र प्रतिवसतः स्म—
I. समुद्रे
II. समुद्रतीरैकदेशे
III. समुद्रजले
IV. वृक्षमूले
(A) I (B) II
(C) III (D) IV

**468.** ऋतुकाले प्राप्ते टिट्टिभी किमकुर्वत्?
I. पुष्पेषु अभ्रमत्
II. वृक्षस्य मूले अरमत्
III. गर्भम् आधत्त
IV. प्रसवम् अकरोत्
(A) I (B) II
(C) III (D) IV

**469.** मत्तगजेन्द्रान् कः समाकर्षति ?
I. वायुवेगः II. समुद्रमध्ये जलम्
III. समुद्रवेला IV. सिंहसमूहः
(A) I (B) II
(C) III (D) IV

**470.** टिट्टिभ्याः अण्डानि कः अपाहरत् ?
I. समुद्रः II. सर्पः
III. श्येनः IV. वायसः
(A) I (B) II
(C) III (D) IV

**471.** टिट्टिभी टिट्टिभं किं कुर्वन्ती अकथयत् ?
I. व्रजन्ती II. हसन्ती
III. प्रलपन्ती IV. स्वपन्ती
(A) I (B) II
(C) III (D) IV

**472.** 'तन्मया अस्य प्रमाणं कुतूहलादपि द्रष्टव्यम्' कथनमिदं कस्य अस्ति ?
I. टिट्टिभस्य II. टिट्टिभ्याः
III. वायसस्य IV. समुद्रस्य
(A) I (B) II
(C) III (D) IV

**473.** निरुपद्रवं पदं किम् अस्ति ?
I. क्रिया II. विशेषणम्
III. संज्ञा IV. क्रियाविशेषणम्
(A) I (B) II
(C) III (D) IV

**474.** 'अन्विष्यताम्' पदम् इदम् कस्य वर्तते?
I. कर्मवाच्यस्य II. कर्तृवाच्यस्य
III. भाववाच्यस्य IV. कर्मभावयोः
(A) I (B) II
(C) III (D) IV

**475.** 'अवलोक्य' इत्यस्मिन् पदे निम्नलिखितेषु कः प्रत्ययः ?
I. ल्यप् II. क्यप्
III. यत् IV. ण्यत्
(A) I (B) II
(C) III (D) IV

**निर्देश (प्रश्न संख्या 476 से 483 तक)**

अधोलिखितं गद्यांशं पठित्वा अधोलिखितानां अष्टप्रश्नानां उचितं विकल्पं चित्वा उत्तरं दत्त।

भारतीयसंस्कृतेः परम्परातिदीर्घाखण्डा चास्ति। भारतीयसंस्कृतेर्मूलं तु वेदाः सन्ति। यद्यपि वेदः एकोऽखण्डश्च वर्तते। परन्तु व्यावहारिकरूपेण एकः एव वेदः चतसृषु संहितासु विभक्तोऽस्ति। तासां नामानि सन्ति—ऋक्संहिता, यजुःसंहिता, सामसंहिता, अथर्वसंहिता च। वेदसम्बन्धि विशालं साहित्यं लिखितम्। ब्राह्मणानि वेदानां व्याख्या ग्रन्थाः सन्ति।

ब्राह्मणानामङ्गरूपेणैवारण्यकोपनिषद्ग्रन्थाः लिखिताः। एतेषु ग्रन्थेषु उपनिषदां विशेषमहत्त्वं वर्तते यतः उपनिषत्सु गहनाध्यात्मिकचिन्तनं वर्तते। ब्रह्म-विषयकं ज्ञानमुपनिषत्स्वेव वर्तते।

वैदिक साहित्ये वेदाङ्गानामपि गणना क्रियते। प्राचीनकाले वेदाङ्गानामध्ययनं वेदैः सहैवावश्यकरूपेण क्रियते स्म। एतद्विपुलसाहित्यमाश्रित्यैव वैदिकसंस्कृतेः विकासः सञ्जातः। वैदिकसंस्कृतिरेवाविच्छिन्ना परम्परा अद्यावधि वर्तते।

**476.** कस्य परम्परा दीर्घास्ति ? अनुच्छेदानुसारं लिखत।
I. वैदिकसंस्कृतेः II. भारतीयसंस्कृतेः
III. उपनिषद्ज्ञानस्य IV. वैदिकसाहित्यस्य
(A) I (B) II
(C) III (D) IV

**477.** उपनिषत्सु किं वर्तते ?
I. वेदानां व्याख्या
II. ब्राह्मणविषयकं ज्ञानम्
III. आध्यात्मिकचिन्तनम्
IV. वैदिकसंस्कृतिः

(A) I (B) II
(C) III (D) IV

**478.** 'उपनिषदाम्' इति रूपं कस्यां विभक्तौ कस्मिन् वचने च वर्तते ?
I. षष्ठीविभक्तौ, बहुवचने
II. द्वितीयाविभक्तौ, एकवचने
III. द्वितीयाविभक्तौ, बहुवचने
IV. सप्तमीविभक्तौ, एकवचने
(A) I (B) II
(C) III (D) IV

**479.** 'उपनिषत्स्वेव' इत्यत्र सन्धिविच्छेदः कथं भविष्यति ?
I. उपनिषत्स्व + इव
II. उपनिषत् + स्वेव
III. उपनिषत्सु + एव
IV. उपनिषद् + स्वेव
(A) I (B) II
(C) III (D) IV

**480.** आरण्यकोपनिषद्ग्रन्थाः कस्य अङ्गरूपेण लिखिता—
I. वेदानाम् II. ब्राह्मणानाम्
III. वेदाङ्गानाम् IV. भारतीयसंस्कृतेः
(A) I (B) II
(C) III (D) IV

**481.** 'आश्रितैव' इत्यत्र कः सन्धि विद्यते ?
I. यण सन्धि
II. गुण सन्धि
III. वृद्धि सन्धि
IV. दीर्घ सन्धि
(A) I (B) II
(C) III (D) IV

**482.** 'क्रियते' इति रूपं कथम् निर्मीयते ?
I. कृ + श्यन् + ते
II. क्रि + यत् + ते
III. कृ + यक् + ते
IV. क्रि + ल्यप् + ते
(A) I (B) II
(C) III (D) IV

**483.** 'चिन्तनम्' इत्यत्र कः प्रत्ययः वर्तते ?
I. अन II. तन
III. ल्युट् IV. घञ्
(A) I (B) II
(C) III (D) IV

**निर्देश (प्रश्न संख्या 484 से 491 तक)**

निम्नलिखितं गद्यांशं पठित्वा अष्टप्रश्नानां यथोचितं विकल्पं चित्वा उत्तराणि देयानि—

ते तत्र विश्वासमापन्नाः तात! मातुल! भ्रात! इति ब्रुवाणा अहं पूर्वमहं पूर्वमिति समन्तात् परितस्थुः। सोऽपि दुष्टाशयः क्रमेण तान् पृष्ठे आरोप्य जलाशयस्य नातिदूरे शिलां समासाद्य तस्यामाक्षिप्य स्वेचछ्या भक्षयित्वा भूयोऽपि जलाशयं समासाद्य जलचराणां मिथ्यावार्त्तासन्देशकैर्मनांसि रञ्जयन्नित्यामिवाहारवृत्तिमकरोत्। अन्यस्मिन् दिने च कुलीरकेणोक्त—"माम! मया सह ते प्रथमः स्नेहसम्भाषः सञ्जातः। तत् किं मां परित्यज्य अन्यान्नयसि। तस्मादद्य मे प्राणत्राणं कुरु" तदाकर्ण्य सोऽपि दुष्टाशयश्चिन्तितवान्। "निर्विणोऽहं मत्स्यमांसादनेन। तदद्य एनं कुलीरकं व्यञ्जनस्थाने करोमि"। इति विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः। कुलीरकोऽपि दूरादेवास्थिपर्वतं शिलाश्रयमवलोक्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत्—"माम! कियद्दूरे स जलाशयः? मदीयभारेण अतिश्रान्तस्त्वं तत् कथय"। सोऽपि मन्दधीर्जलचरोऽप्यमिति मत्वा स्थले न प्रभवतीति सस्मितमिदमाह—"कुलीरक!" कुतोऽन्यो जलाशयः मम प्राणयात्रेयम्, तस्मात् स्मर्य्यतामात्मनोऽभीष्टदेवता। त्वामपि अस्यां शिलायां निक्षिप्य भक्षयिष्यामि"। इत्युक्तवति तस्मिन् स्ववदनदंशद्वयेन मृणालनालधवलायां मृदुग्रीवायां गृहीतो मृतश्च।

अथ स तां बकग्रीवां समादाय शनैः शनैः तज्जलाशयमाससाद। ततः सर्वैरेव जलचरैः पृष्टः—"भोः कुलीरक! किं निवृत्तस्त्वम्?" स मातुलोऽपि न आयातः? तत। किं चिरयति? वयं सर्वे सोत्सुकाः कृतक्षणास्तिष्ठामः"। एवं तैरभिहिते कुलीरकोऽपि विहस्योवाच—"मूर्खाः सर्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्मया आयुः शेषतया तस्य विश्वासघातकस्य अभिप्रायं ज्ञात्वा ग्रीवेयमानीता। तदलं सम्भ्रमेण। अधुना सर्वजलचराणां क्षेमं भविष्यति"। अतोऽहंब्रवीमि—"भक्षयित्वा बहून् मत्स्यान्" इति।

**484.** कः जलचरान् पृष्ठे आरोप्य शिलां समासाद्य भक्षयति स्म?
(A) सिंहः (B) मकरः
(C) बकः (D) व्याधः

**485.** बकस्य आतङ्कात् जलचराः केन मोचिता?
(A) व्याधेन (B) कुलीरकेण
(C) सिंहेन (D) गजेन

**486.** मत्स्यमासभक्षणेन कः खिन्नोऽभवत्?
(A) बकः (B) कुलीरकः
(C) मकरः (D) व्याधः

**487.** "तस्मादद्य मे प्राणत्राणं कुरु" कथनमिदं कस्यास्ति?
(A) व्याधस्य (B) जलचरस्वामिनः
(C) बकस्य (D) कुलीरकस्य

**488.** 'प्रस्थितः' इत्यस्य शब्दस्य कोऽर्थः?
(A) आगतः (B) गतः
(C) अतिष्ठत् (D) हतः

**489.** गद्यांशे "मन्दधीः" विशेषणं कस्य कृते प्रयुक्तम्?
(A) कुलीरकस्य (B) बकस्य
(C) पथिकस्य (D) जलचराणाम्

**490.** अयम् शब्दस्य किं निर्वचनं समीचीनम् ?
(A) इदम् + प्रथमा-एकवचनम्
(B) अयम् + प्रथमा-एकवचनम्
(C) अदस् + प्रथमा-द्विवचनम्
(D) अस्मद् + प्रथमा-एकवचनम्

**491.** चिन्तितवान् इत्यस्मिन् शब्दे कः प्रत्ययः?
(A) वतुप् (B) क्तवतु
(C) शानच् (D) शतृ

**निर्देश (प्रश्न संख्या 492 से 498 तक)**

अधोलिखितं गद्यांशं पठित्वा प्रश्नानां विकल्पात्मकेभ्यः उचिततमम् उत्तरं चिनुत।

एकस्मिन् विद्यालये नवमकक्षायाः छात्रेषु अकिञ्चनः इतिनामा एकः छात्रः आसीत्। कक्षायाः सर्वे छात्राः सम्पन्नपरिवारेभ्यः आसन्, परन्तु अकिञ्चनस्य पिता एकस्मिन् कार्यालये चतुर्थश्रेण्याः कर्मकरः आसीत्। इतरान् सम्पन्नान् छात्रान् दृष्ट्वा प्रायः अकिञ्चनस्य मनसि हीनभावना प्राविशत्। सः अचिन्तयत् एतेषां सहपाठिनां जीवनं धन्यम् अस्ति। धिक् मम अभावपूर्णं जीवनम्। मम सहपाठिनां जीवनं पर्वत इव उच्चतं मम च जीवनं धूलिवत् निम्नम्। यदा स एवं चिन्तयति स्म तदैव वैभवः, तस्य सहपाठी, तम् अवदत् भो मित्र! अहं त्वतः गणितं पठितुम् इच्छामि। किं त्वम् अद्य सायङ्काले मम गृहम् आगन्तुं शक्नोषि। अकिञ्चनः वैभवस्य आमन्त्रणं स्वीकृत्य सायङ्काले यदा तस्य गृहम् अगच्छत्।

तदा सः अपश्यत् यत् वैभवस्य गृहे माता पितरौ अनुपस्थितौ आस्ताम्। वैभवः तस्मै असूचयत् यत् रात्रौ विलम्बेन एव तौ गृहम् आगच्छतः। वैभवस्य विषादपूर्णं जीवनं दृष्ट्वा अकिञ्चनः अबोधयत् यत् तस्य गृहे मातापित्रोः अधिकसानिध्येन तस्य एव जीवनं वरम् न तु वैभवस्य।

**492.** अकिञ्चनः कस्मात् गणितं पठितुम् इच्छति?
(A) अकिञ्चनः (B) गौरवात्
(C) सोहनात् (D) रामात्

**493.** वैभवः कस्याः कक्षायाः छात्रः आसीत्?
(A) नवमकक्षायाः (B) सप्तमकक्षायाः
(C) दशमकक्षायाः (D) अष्टम कक्षायाः

**494.** अधस्तनेषु क्रियापदेषु द्विवचनं कस्यां प्रयुक्तम्?
(A) आस्ताम् (B) इच्छामि
(C) आगच्छत् (D) प्राविशत्

**495.** 'रात्रौ' इति पदे का विभक्तिः—
(A) द्वितीया (B) चतुर्थी
(C) षष्ठी (D) सप्तमी

**496.** 'स्वीकृत्य' इति पदे कृदन्तप्रत्ययं चित्वा लिखत—
(A) क्त्वा (B) ल्यप्
(C) शतृ (D) शानच्

**497.** अस्मिन् अनुच्छेदे 'वरं' इति पदं कस्मिन् अर्थे प्रयुक्तम्?

(A) श्रेष्ठः (B) अन्यः
(C) परिणीत पुरुषः (D) सौभाग्यशाली

**498.** चतुर्थश्रेण्याः कर्मकरः कः आसीत्?
(A) अकिञ्चनस्य पिता
(B) वैभवस्य पिता
(C) अकिञ्चनस्य मित्रम्
(D) वैभवस्य मित्रम्

**निर्देश (प्रश्न संख्या 499 से 505 तक)**

अधोलिखितं गद्यांशं पठित्वा तदाश्रितानाप्रश्नानां उत्तरं समुचितं विकल्पं चित्वा लिखत।

अस्मांक देशः भारतवर्षम्। एतस्य उत्तरस्यां दिशायां हिमालयः पर्वतराजोऽस्ति। प्राचीनकाले भारतस्याभिधानमार्यावर्तः आसीत्। अत्रत्याः मूलनिवासिनः आर्याः एव इति विचारः एतेन परिपुष्टो भवति। अत्र पुरा एकः प्रतापी नृपोऽभवत्। यस्याभिधानं भरतः आसीत्। तस्य राज्यं न केवलं भारते एव आसीत्, अपितु विदेशेषु अपि तस्य शासनमासीत्। राज्य-प्रबन्धे सः अतीव कुशलः आसीत्। सर्वे जनाः तस्य राज्ये सुखिनः आसन्। तस्याभिधानेनैव एतस्य देशस्याभिधानं भारतमस्ति।

अस्माकं देशे विविधाः भाषाः विविधाः च सम्प्रदायाः सन्ति, परम् अनेकेषां भाषणामुद्गमः संस्कृतभाषा अस्ति, अनेकेषां च सम्प्रदायानामुद्गमः वैदिक-संस्कृतिः। अस्माकं भारतभूमिः चैका। तस्मात् ये वयं भारते वसामः, ते सर्वे एव भारतभूमे सुताः, परस्परं च बान्धवाः। यदि वयं सहयोगेन कार्यं करिष्यामः, परस्परं च स्नेहेन मिलित्वा च स्थास्यामः, तदाऽस्माकं सर्वेषां कल्याणम्। यदि च वयं परस्परं घृणां द्वेषं च दर्शयिष्यामः। तदाऽस्मांक देशस्य च महती हानिः भविष्यति। अतः सर्वेषां परमं कर्त्तव्यं यत् ते सर्वे एव मिलित्वैवात्र वसेयुः द्वेषं घृणां च त्यजेयुः।

**499.** भारतवर्षस्य मूलनिवासिनः के आसन्?
(A) आर्याः (B) द्रविडाः
(C) भारतीयाः (D) विदेशीयाः

**500.** भारतदेशे कति सम्प्रदायाः सन्ति?
(A) पञ्च (B) षट्
(C) सप्त (D) विविधाः

**501.** घृणा-द्वेष-प्रदर्शनेन किं भविष्यति?
(A) महती हानिः
(B) परस्परं कलहः
(C) देशस्य विघटनम्
(D) भारतवर्षस्य कीर्तेः विनाशः

**502.** 'मिथः' इत्यस्यार्थे कः शब्दः गद्यांशे प्रयुक्तः?
(A) मिलित्वा (B) सहयोगेन
(C) परस्परं (D) सुखिनः

**503.** विदेशेषु कस्य शासनम् आसीत्?
(A) भारतस्य (B) भरतस्य
(C) मनोः (D) आर्याणाम्

**504.** विधिलिङ्ग लकारस्य क्रियापदम् चिनुत?
(A) आसीत् (B) वसामः
(C) स्थास्यामः (D) त्यजेयुः

**505.** मिलित्वा + एव अत्र कः सन्धिः विद्यते?
(A) वृद्धिः सन्धिः (B) यण् सन्धिः
(C) अयादिसन्धिः (D) दीर्घसन्धिः

**निर्देश (प्रश्न संख्या 506 से 46 तक)**

निम्नलिखितं गद्यांशं पठित्वा सप्तप्रश्नाम् यथोचितं विकल्पं चित्वा उत्तराणि देयानि—

स्त्रीशिक्षाक्षेत्रे अग्रगण्या पण्डिता रमाबाई 1858 तमे खिष्टाब्दे जन्म अलभत्। तस्याः पिता अनन्तशास्त्री डोंगरे माता च लक्ष्मीबाई आस्ताम्। तस्मिन् काले स्त्रीशिक्षायाः स्थितिः चिन्तनीया आसीत्। स्त्रीणां कृते संस्कृतशिक्षणं प्रायः प्रचलितं नासीत्। किन्तु डोंगरे रूढिबद्धां धारणां परित्यज्य स्वपत्नीं संस्कृतमध्यापयत्। एतदर्थं स—समाजस्य प्रतारणाम् अपि असहत। अनन्तरं रमा अपि स्वमातुः संस्कृतशिक्षां प्राप्तवती।

कालक्रमेण रमायाः पिता विपन्नः सञ्जातः। तस्याः पितरौ ज्येष्ठाभगिनी च दुर्भिक्षपीडिताः दिवङ्गताः। तदनन्तरं रमा स्व-ज्येष्ठभ्रात्रा सह पद्भ्यां समग्रं भारतम् अभ्रमत्। भ्रमणक्रमे सा कोलकातां प्राप्ता। संस्कृतवैदुष्येण सा तत्र 'पण्डिता' 'सरस्वती' चेति उपाधिभ्यां विभूषिता। तत्रैव सा ब्रह्मसमाजेन प्रभाविता वेदाध्ययनम् अकरोत्। पश्चात् सा स्त्रीणां कृते वेदादीनां शास्त्राणां शिक्षायै आन्दोलनं प्रारब्धवती।

1880 तमे खिष्टाब्दे सा विपिनबिहारीदासेन सह बाकीपुर-न्यायालये विवाहम् अकरोत्। सार्धैकवर्षात् अनन्तरं तस्याः पतिः दिवङ्गतः। तदनन्तरं सा पुत्र्या मनोरमया सह जन्मभूमिं महाराष्ट्रं प्रत्यागच्छत्। नारीणां सम्मानाय शिक्षायै च सा स्वकीमं जीवनम् अर्पितवती। हण्टर-शिक्षा-आयोगस्य समक्षं नारीशिक्षाविषये सा स्वमतं प्रस्तुवती। सा उच्चशिक्षार्थम् इंग्लैण्डदेशं गतवती। तत्र इसाईधर्मस्य स्त्रीविषयकैः उत्तमविचारैः प्रभाविता जाता। इंग्लैण्डदेशात् रमाबाई अमरीकादेशम् अगच्छत्। तत्र सा भारतस्य विधवास्त्रीणां सहायतार्थम् अर्थसञ्चयम् अकरोत्। भारतं प्रत्यागत्य मुम्बईनगरे सा 'शारदा-सदनम्' अस्थापयत्। अस्मिन् आश्रमे निस्सहायाः स्त्रियः निवसन्ति स्म। तत्र स्त्रियः मुद्रण-टङ्कण-काष्ठकलादीनाञ्च प्रशिक्षणमपि लभन्ते स्म। परम् इदं सदनं पुणेनगरे स्थानान्तरितं जातम्। ततः पुणेनगरस्य समीपे केडगाँव-स्थाने 'मुक्तिमिशन' नाम संस्थानं तया स्थापितम्। अत्र अधुना अपि निराश्रिताः स्त्रियः ससम्मानं जीवनं यापयन्ति।

1922 तमे खिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्। सा देश-विदेशानाम् अनेकासु भाषासु निपुणा आसीत्। समाजसेवायाः अतिरिक्तं लेखनक्षेत्रे अपि तस्याः महत्वपूर्णम् अवदानम् अस्ति। 'स्त्रीधर्मनीति'। 'हाई कास्ट हिन्दू विमेन' इति तस्याः प्रसिद्धं रचनाद्वयं वर्तते।

**506.** अनन्तशास्त्रीडोंगरे कस्याः पतिः आसीत्?
(A) 'रमाबाई' इत्यस्याः
(B) 'लक्ष्मीबाई' इत्यस्याः
(C) मनोरमायाः
(D) शारदायाः

**507.** रमाबाई 'पण्डिता' इत्युपाधिना कुत्र विभूषिताः?
(A) कोलकातानगरे (B) नासिकनगरे
(C) इंग्लैण्डदेशे (D) अमरीकादेशे

**508.** रमाबाई 'शारदासदनम्' कुत्र अस्थापयत्?
(A) कोलकातानगरे (B) मुम्बईनगरे
(C) नासिकनगरे (D) पुणेनगरे

**509.** रमायाः प्रमुखं लक्ष्यं किम् आसीत्?
(A) स्त्रीणां स्वतन्त्रता
(B) स्त्रीणां शिक्षा
(C) भारतीयसंस्कृतेः प्रचारः
(D) विधवां-उत्थानम्

**510.** रमाबाई इसाईधर्मस्य कैः विचारैः प्रभाविता आसीत्?
(A) धार्मिकविचारैः (B) नीतिपरकविचारैः
(C) मानवसेवाविचारैः (D) स्त्रीविषयकैः विचारैः

**511.** 'शिक्षायै' इत्यस्मिन् पदे का विभक्तिः वर्तते?
(A) चतुर्थी (B) तृतीया
(C) षष्ठी (D) सप्तमी

**512.** 'सा आन्दोलनं प्रारब्धवती।' अस्य वाक्यस्य कर्मवाच्ये परिवर्तनम् किम् भविष्यति?
(A) सा आन्दोलनं प्रारभत।
(B) तया आन्दोलनं प्रारब्धम्।
(C) तया आन्दोलनं प्रारब्धः।
(D) तया आन्दोलनं प्रारब्धवती।

**निर्देश (प्रश्न संख्या 513 एवं 514 के लिए)**

निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।

समाजे सर्वत्र दुर्जनाः पीडयन्ति जनान्। यद्यपि सज्जनानां संख्या अधिका अस्ति तथापि दुर्जनाः एवं प्रबलाः इति महादाश्चर्यम्। यतो हि सज्जनाः प्रायः तटस्थाः भवन्ति। यदि दुर्जनानां प्रतिपदं विरोधं सज्जनाः करिष्यन्ति तर्हि निश्चयेन समाजः निर्भयो भविष्यति।

**513.** उपर्युक्त गद्य के अनुसार समाज में किसकी संख्या कम है?
(A) निर्भयों की (B) दुर्जनों की
(C) सज्जनों की (D) शिक्षकों की

**514.** उपर्युक्त गद्य के अनुसार दुष्ट लोग समाज में क्यों प्रबल दिखते हैं?
(A) क्योंकि उनकी पहुँच होती है
(B) क्योंकि उनकी संख्या अधिक होती है
(C) क्योंकि वे धनी होते हैं
(D) क्योंकि सज्जन तटस्थ रहते हैं

**निर्देश (प्रश्न संख्या 515 से 518 तक)**

प्रस्तुत गद्यखण्ड के आधार पर प्रश्न संख्या **3** से **6** तक के प्रश्नों के सही उत्तर दीजिए।

एकस्मिनवसरे कदाचित् लक्ष्मीः पार्वतीम् अवदत् प्रेम्णा—''गौरि! स्वपत्युः नाम उच्यताम्। अन्यथा अहं क्रीडाब्जेन भवतीं ताडयेयम्।'' इति। तदा पार्वती अवदत्— ''मम पत्युः नाम शिवः'' इति। शिवपदस्य अन्यार्थः श्रृगालः इत्यर्थं मत्त्वा लक्ष्मीः अपृच्छत्। ''किं भवत्याः पतिः श्रृंगालः?'' इति। ''मम पतिः स्थाणुरिति निर्दिश्यते'' इति उक्तवर्ती पार्वती। लक्ष्मीः अवदत्—''किं सः स्तम्भः?'' इति। ''सः अस्ति पशुपतिः'' इति अवदत् पार्वती। ''तन्नाम सः पशून् चारयति इत्यर्थः'' इति अवदत् लक्ष्मीः। एतादृशः लक्ष्मी–पार्वत्योः संलापः सर्वेषां मङ्गलाय भवतु।

**515.** शिवपदस्य अन्यार्थः कः?

(A) स्तम्भः (B) श्रृगालः
(C) स्थाणुः (D) पशुः

**516.** गद्यखण्डे कया प्रश्नः पृच्छ्यते?

(A) गौर्या (B) पार्वत्या
(C) लक्ष्म्या (D) दुर्गया

**517.** कयोः संलापः सर्वेषां मङ्गलाय भवतु?

(A) लक्ष्म्याः (B) पार्वत्याः
(C) लक्ष्मी–पार्वत्योः (D) गौर्याः

**518** (A) ज्ञानेन्द्रियों को क्रियाशील करना
(B) कर्मेन्द्रियों को क्रियाशील करना
(C) अनुभूति कराना
(D) उपर्युक्त सभी।

**निर्देश (प्रश्न संख्या 519 से 521 तक)**

निम्नलिखित गद्यावतरण को ध्यानपूर्वक पढ़कर सही विकल्प चुनकर उत्तर दीजिए।

परेषाम् उपकरणमेव 'परोपकार' इति कथ्यते। परोपकरणं मानवानामेकः सात्त्विकः सद्गुणः स्वीकृतः। परोपकार–सद्गुणेन मानवेषु सहयोगभावना वर्धते। यदि वयं परेषां जनानां उपकारं करिष्यामः तर्हि परेऽपि अस्माकं हितं विधास्यन्ति। परस्परोपकरणेनैव अस्माकं कल्याणं भवितुं शक्यते। जन–कल्याणायैव सत्पुरुषा मनसा वाचा कर्मणा च परोपकाररताः दृश्यन्ते। सत्पुरुषाणां सम्पत्तयः परजीवेभ्यः एव भवन्ति।

धर्मशास्त्रेषु परोपकारस्य महत्त्वं विशदरूपेण वर्णितम्। सत्परोपकारी तु स एव भवति यः स्वार्थं विहाय परेषां हितसाधने रमते। अनेकानि उदाहरणान्यपि तत्र वर्तन्ते। महर्षिदधीचिं रन्तिदेवं वा को न जानाति। प्रकृतिरपि परोपकाररता दृश्यते। नद्यः परार्थमेव जलं वहन्ति। वृक्षाः परहितायैव फलन्ति। गावः स्वदुग्धं परेभ्यः एव यच्छन्ति। परोपकाररूपं सद्गुणं सदैव उपार्जयेयुः। परोपकारभावनयैव अस्माकं, अस्माकं देशस्य च कल्याण ां भवितुं शक्यते।

**519.** सत्पुरुषाणां सम्पत्तयः भवन्ति—

(A) स्व–पुत्रेभ्यः (B) स्व–मित्रेभ्यः
(C) परजीवेभ्यः (D) स्व–वंशेभ्यः

**520.** 'सदैव' पद में सन्धि है—

(A) यण् (B) वृद्धि
(C) गुण (D) अयादि

**521.** परोपकारस्य महत्त्वं विशदरूपेण वर्णितम्—

(A) भक्तिशास्त्रेषु (B) धर्मशास्त्रेषु
(C) न्यायशास्त्रेषु (D) सांख्यदर्शनेषु

**निर्देश (प्रश्न संख्या 522 से 527 तक)**

निम्नलिखित अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेयाः—

अपरस्मिन् दिवसे शिक्षकः रामानुजम् अतर्जयत्। तत्पश्चात् सः गणितविषयस्य कक्षां कदापि न त्यक्तवान् परीक्षापरिणामे च शतप्रतिशतम् अङ्कान् गणितविषये प्राप्तवान्। प्रार्थनासभायामपि शिक्षकः तद् वृत्तान्तं सर्वेभ्यः छात्रेभ्यः श्रावितवान्। पुनश्चोक्तवान्—"एषः बालकः एतस्य विद्यालयस्य महान् विद्यार्थी भविष्यति।" रामानुजोऽपि पूर्णसामर्थ्येन अध्ययने संलग्नोऽभूत्। कालान्तरे सः महान् गणितज्ञोऽभवत्।

**522.** 'रामानुजम्' इत्यत्र कः सन्धिः ?

(A) यण् सन्धि (B) दीर्घ सन्धिः
(C) गुण सन्धिः (D) अयादि सन्धिः

**523.** 'त्यक्तवान्' इत्यत्र प्रत्ययः अस्तिः—

(A) वतुप् (B) मतुप्
(C) क्तवतु (D) शानच्

**524.** 'परीक्षापरिणामे' इत्यत्र समासविग्रहः वर्तते—

(A) परीक्षया परिणामे
(B) परीक्षायाः परिणामे
(C) परीक्षयाः परिणामे
(D) परीक्षायां परिणामे

**525.** 'शतप्रतिशतम् अङ्कान् गणितविषये प्राप्तवान्।' अस्मिन् वाक्ये बहुवचनान्तं पदं किम् अस्ति?

(A) शतप्रतिशतम् (B) अङ्कान्
(C) गणित विषये (D) प्राप्तवान्

**526.** 'सभायाम्' इत्यत्र का विभक्तिः ?

(A) द्वितीया (B) चतुर्थी
(C) षष्ठी (D) सप्तमी

**527.** माहेश्वर सूत्रेषु यण् प्रत्याहारस्य उचितक्रमः अस्ति—

(A) य व र ल (B) य र ल व
(C) य ल र व (D) य ल व र

**निर्देश (प्रश्न संख्या 528 से 67 तक)**

निम्नलिखितम् अपठितं गद्यांशम् आधारीकृत्य अधोलिखिताः प्रश्नाः समाधेयाः—

सूर्यनगरीरूपेण प्रसिद्धं जोधपुरनगरमपि ऐतिहासिकं महत्त्वं धारयति। मारवाडराज्यस्य राजधानीरूपेण प्रसिद्धेऽस्मिन् नगरे मेहरानगढदुर्गः, राजस्थानस्य ताजमहलरूपेण प्रसिद्धं जसवन्तथडा नामकं स्थानं, कायलानाकासारः, मण्डोरोद्यानं च इत्यादीनि स्थलानि सन्ति। वीरशिरोमणेः प्रतापस्य मातुलगृहं पालीनगरमेवास्ति। पालीजनपदे परशुराममहादेवस्य मन्दिरं, स्थापत्यदृष्ट्या विश्वप्रसिद्धं रणकपुरजैनमन्दिरम् अपि विद्यते।

**528.** "इत्यादीनि स्थलानि सन्ति"। रेखांकित क्रियापदं लङ्लकारे भवति—

(A) आसीत् (B) आसन्
(C) आसनम् (D) आस्ताम्

**529.** "मन्दिरम्" इत्यत्र किं लिङ्गम् ?

(A) पुंल्लिंगम् (B) स्त्रीलिंगम्
(C) नपुंसकलिंगम् (D) सर्वलिंगम्

**530.** "स्थापत्यदृष्ट्या विश्वप्रसिद्धं रणकपुरजैनमन्दिरं विद्यते"। अत्र रेखांकितपदे वचनम् अस्ति—

(A) एकवचनम् (B) द्विवचनम्
(C) बहुवचनम् (D) सर्ववचनम्

**531.** 'अप्रसिद्धम्' इत्यस्य विलोमपदः अस्ति :

(A) असिद्धम् (B) सुसिद्धम्
(C) प्रसितम् (D) प्रसिद्धम्

**532.** 'रणकपूर जैनमन्दिरमपि विद्यते।' अत्र रेखाङ्किते पदे लकारः अस्ति—

(A) लङ् लकारः (B) लट् लकारः
(C) लृट् लकारः (D) लोट् लकारः

**533.** ऐतिहासिकं महत्वं धारयति। अत्र रेखाङ्किते पदे धातुः अस्ति—

(A) धृष् (B) धारि
(C) धृ (D) धर

**निर्देश (प्रश्न संख्या 534 से 539 तक)**

निम्नलिखित अपठितं गद्यांशम् आधारीकृत्य निम्नाङ्किताः प्रश्नाः समाधेयाः—

इदं हि विज्ञानप्रधानं युगम्। अस्यां शताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो दृश्यते। अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साह्ययं न अपेक्ष्यते। सम्प्रति मानवः प्रकृति वशोकृत्य ता स्वेच्छया कार्येषु नियुङ्क्ते। वैज्ञानिकैरनेके आविष्काराः विहिताः। मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्वनिर्माणे एव विशेषतः उपयोगो विहितः। तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं भवति। अतोऽस्य यथाशक्ति मानवकल्याणार्थमेव प्रयोगः करणीयः।

**534.** 'अस्यां' इत्यस्य का विभक्तिः अस्ति?

(A) प्रथमा (B) द्वितीया
(C) षष्ठी (D) सप्तमी

**535.** 'विज्ञानस्यैव पदे सन्धि-विच्छेदः करणीयः—

(A) विज्ञानस्य + इव (B) विज्ञानस्ये + ऐव
(C) विज्ञा + नस्यैव (D) विज्ञानस्य + एव

**536.** 'करणीयः' इत्यत्र कः प्रत्ययः ?

(A) कृ + अनीयर् (B) कृ + शतृ
(C) कृ + ल्यट् (D) कृ + शानच्

537. "वैज्ञानिकैरनेके आविष्काराः विहिताः। इत्यत्र अनेके विशेषणपदस्य विशेष्यपदं किम्"?
(A) वैज्ञानिकैः (B) अनेके
(C) आविष्काराः (D) विहिताः

538. 'यथाशक्ति' इत्यत्र समासविग्रह भवति—
(A) शक्तिम् अनतिक्रम्य
(B) शक्तेः अभावः
(C) शक्तेः समीपम्
(D) शक्तेः योग्यम्

539. "सम्प्रति मानवः प्रकृतिं वशीकृत्य तां ........... नियङ्क्ते" अस्मिन् वाक्ये अव्ययपदम् अस्ति—
(A) मानवः (B) सम्प्रति
(C) प्रकृतिं (D) ताम्

**निर्देश (प्रश्न संख्या 540 से 545 तक)**

अधोलिखितं गद्यांशं पठित्वा निम्नलिखिताः प्रश्नाः समाधेयाः—

विश्वप्रसिद्धां पशुमेलां द्रष्टुं ग्रामीणजनाः विदेशिपर्यटकाः च आगच्छन्ति। अस्य मासस्य कार्तिकपूर्णिमायां जनाः पुष्करस्य सरोवरे आत्मनः पवित्रार्थं स्नानं कुर्वन्ति। मेलायाम् अश्वानां नृत्यम्, उष्ट्राणां धावनं सौन्दर्यप्रतियोगिताश्च विदेशिपर्यटकाणां सांस्कृतिकी-प्रतिस्पर्द्धाः भवन्ति। श्रेष्ठजातीयाणां पशूनां कृते पुरस्काराणि मेलासमितिपक्षतः प्रदीयनते। प्रायः मेलायां सर्वत्र उष्ट्राणां सम्मेलनं दृश्यते। राजस्थानस्य क्रमेलकः (उष्ट्रः) राज्यपशुः घोषितः वर्तते।

540. ग्रामीणजनाः विदेशिपर्यटकाः च आगच्छन्ति। रेखाङ्कितं क्रियापदं लङ्लकारे परिवर्तयंतु—
(A) आगच्छन् (B) आगमिष्यन्ति
(C) आगच्छन्तु (D) आगच्छेयुः

541. मेलायाम् अश्वानां नृत्यम् ............ प्रतिस्पर्द्धाः भवन्ति। अस्मिन् वाक्ये प्रश्ननिर्माणाय निम्नाङ्कितं पदमुपयुक्तम्—
(A) किम् (B) कस्य
(C) कदा (D) केषां

542. मेलासमितिपक्षतः - इत्यत्र प्रत्ययः विद्यते—
(A) क्त (B) तरप्
(C) तसिल् (D) तमप्

543. आत्मनः पवित्रार्थं स्नानं कुर्वन्ति। रेखाङ्कितपदे विभक्तिरस्ति—
(A) षष्ठी (B) प्रथमा
(C) चतुर्थी (D) पञ्चमी

544. 'देशी' पदस्य विलोमपदं वर्तते—
(A) विदेही (B) विदेशी
(C) विदिशा (D) राज्य

545. 'प्रदीयन्ते' अस्मिन् पदे लकारः वर्तते—
(A) लोट् लकार (B) लङ् लकार
(C) लृट् लकार (D) लट् लकार

**निर्देश (प्रश्न संख्या 546 से 551 तक)**

अधोलिखितं गद्यांशमाधारीकृत्य निम्नलिखिताः प्रश्नाः समाधेयाः—

मानवंजीवने अनुशासनस्य खलु महती आवश्यकतास्ति। यदि मानवाः अनुशासनशीलाः न भवेयुः तदा तु विचित्रा जगतः गतिः स्यात्। यदि सर्वे जनाः स्वेच्छया कार्यं कुर्वन्ति तदा सर्वत्रैव कार्यहानिः भवेत्। अनुशासनेन एव अस्माकं सर्वाणि कार्याणि भवन्ति। यस्मिन् देशे अनुशासनव्यवस्था उत्तमा वर्तते, तस्मिन् देशे एव सुख-प्राप्तिः भवति। अनुशासनेन एव सर्वेषां कल्याणं भवति।

546. 'जगतः' इत्यत्र का विभक्तिः ?
(A) सप्तमी (B) चतुर्थी
(C) षष्ठी (D) तृतीया

547. तदा तु विचित्रा जगतः गतिः स्यात्। अस्मिन् वाक्ये विशेषणपदमस्ति—
(A) विचित्रा (B) जगतः
(C) गतिः (D) तदा

548. 'कार्यहानिः' इत्यत्र कः समासः ?
(A) अव्ययीभावः (B) कर्मधारयः
(C) बहुव्रीहिः (D) तत्पुरुषः

549. 'प्राप्तिः' इत्यत्र कः उपसर्गः ?
(A) आङ् (B) प्र
(C) आप् (D) प्रा

550. 'गतिः' इत्यत्र कः प्रत्ययः ?
(A) क्तिन् (B) क्त
(C) ति (D) णिनि

551. तस्मिन् देशे एव सुख-प्राप्तिः भवति।
अस्मिन् वाक्ये अव्ययपदमस्ति—
(A) तस्मिन् (B) सुखप्राप्तिः
(C) एव (D) भवति

**निर्देश (प्रश्न संख्या 552 से 557 तक)**

अधोलिखितम् अपठितं गद्यांशम् आधारीकृत्य निम्नलिखिताः प्रश्नाः समाधेयाः—

गृहस्य सुशिक्षिता स्त्री सद्गृहिणी गृहलक्ष्मीः गृहस्वामिनी वा भवति। सैव मातृभूता सद्वंशं सन्नागरिकं च निर्मातुं प्रभवति।

स्त्री एव समाजे धार्मिकसंस्काराणां सद्गुणादिकानां स्थापनां करोति। अतः समाजे राष्ट्रे वा स्त्रीणां समादरो मातृशक्तेश्च गौरवरक्षणं तदैव सम्भवति यदा ताः सुशिक्षिताः स्युः।

552. 'मातृशक्तेः' इत्यत्र का विभक्तिः ?
(A) चतुर्थी (B) षष्ठी
(C) सप्तमी (D) तृतीया

553. 'प्रभवति' इत्यस्य लङ् लकारे रूपं भविष्यति—
(A) प्राभवत् (B) अप्रभवत्
(C) प्राभूयत् (D) प्रभावत

554. 'तदैवः' इत्यस्मिन् पदे कः सन्धिः ?
(A) गुण सन्धिः (B) यण् सन्धिः
(C) वृद्धि सन्धिः (D) अयादि सन्धिः

555. 'निर्मातुम्' इत्यस्मिन् पदे प्रत्ययः अस्ति—
(A) तुन् (B) तुम्
(C) टुम् (D) तुमुन्

556. 'गृहलक्ष्मीः' इत्यत्र समासः अस्ति—
(A) द्वन्द्व (B) अव्ययीभावः
(C) तत्पुरुषः (D) बहुव्रीहिः

557. "समादरो" इत्यस्य पदस्य सन्धि-विच्छेदः भविष्यति—
(A) सम् + आदरः (B) समा + आदरः
(C) स + मादरः (D) समा + दरः

**निर्देश (प्रश्न संख्या 558 से 562 तक)**

अधोलिखितम् अपठितं गधांशम् आधारीकृत्य प्रश्नाः समाधेया

अस्माकं तु निश्चितं मतं यत् संस्कृतभाषैव विश्वभाषापदमर्हति। जगति या अपि संस्कृत– प्राकृत-लेटिन-ग्रीक-इंग्लिशाद्याः भाषा तत्र देशेषु प्रचलिताः दृश्यन्ते तासु संस्कृतभाषैव सौष्ठवे, सारल्ये, माधुर्ये च श्रेष्ठा। कस्यामपि अन्यस्यां भाषायां न तादृक् सर्वाङ्गपूर्णं व्याकरणं यादृक् संस्कृतभाषायां, न च तादृशी वैज्ञानिकी लिपिः यादृशी संस्कृतभाषायाम्।

558. 'अस्माकम्' इत्यत्र का विभक्तिः ?
(A) प्रथमा (B) षष्ठी
(C) तृतीया (D) चतुर्थी

559. "संस्कृतभाषैव" इत्यत्र सन्धिविच्छेदः करणीयः
(A) संस्कृतभाषा + ऐव
(B) संस्कृतभाषे + एव
(C) संस्कृतभाषा + एव
(D) संस्कृतभाषा + इव

560. 'संस्कृतभाषायां वैज्ञानिकी लिपि विद्यते' अत्र वाक्ये विशेषणपदं लिखत—
(A) संस्कृतभाषायाम् (B) विद्यते
(C) लिपि (D) वैज्ञानिकी

561. "व्याकरणम्" इत्यत्र कः प्रत्ययः ?
(A) ल्युट् (B) ल्यु
(C) क्त (D) क्तवतु

562. "विश्वभाषा" इत्यत्र समासविग्रह वर्तते—
(A) विश्व भाषा
(B) विश्वस्य भाषा
(C) विश्वास भाषा
(D) विश्वं भाषा

**निर्देश (प्रश्न संख्या 563 से 567 तक)**

अधोलिखित अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेयाः

परमेश्वरेण जगति समुत्पादितेषु सर्वद्रव्येषु विद्यैव सर्वश्रेष्ठं धनम्। विद्याधनेन विहीनः यो मानवोऽस्ति सः

असभ्यः मूर्खः ग्राम्यश्च कथ्यते। ज्ञानेन विना यथा पशुः धर्माधर्मयोर्विचारं कर्तुं न शक्नोति तथैव मानवोऽपि विद्यया विहीनः पापपुण्ययोः कर्त्तव्याकर्त्तव्ययोर्विचारं कर्तुं न पारयति। विद्याविहीनो मानवोऽन्ध एव निगद्यते। आचार्यदण्डिनः कथनानुसारं विद्यैव शब्दाह्वयं ज्योतिः। यदि नामेयं विद्याज्योतिरस्मिन् जगति न भवेत् तर्हि जगदिदमखिलमपि अन्धकारावृत्तं सम्पत्स्येत। अतएव उक्तं "विद्याधनं सर्वधनप्रधानम्" इति।

**563.** "ज्ञानेन" इत्यस्मिन् पदे का विभक्तिः ?
(A) चतुर्थी (B) तृतीया
(C) द्वितीया (D) पञ्चमी

**564.** "निगद्यते" इत्यत्र कः धातुः ?
(A) गद् (B) निगद्
(C) गद्य (D) निगद्य

**565.** "कर्तुम्" इत्यत्र कः प्रत्ययः वर्तते ?
(A) क्त्वा (B) शतृ
(C) तुमुन् (D) ल्यप्

**566.** "अन्धकारावृतम्" इत्यत्र समासविग्रहः अस्ति—
(A) अन्धकारात् आवृतम्
(B) अन्धकारेण आवृतम्
(C) अन्धकारस्य आवृतम्
(D) अन्धकाराय आवृतम्

**567.** "विद्यैव" इत्यस्य पदस्य सन्धिविच्छेदः भवति
(A) विद्या + इव (B) विद्य + एव
(C) विद्या + एव (D) विद्य् + एव

## निर्देश (प्रश्न संख्या 568 से 572 तक)

अधोलिखितम् अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेया

चूण्डावसतसर्वदारस्य रावतरत्नसिंहस्य विवाहः हाडावतीराजकुमार्या सह अभवत्। तस्य विवाहस्य द्वितीये तृतीये वा दिवसे महाराणाराजसिंहस्य सन्देशः आगतः यत् शीघ्रमेव अवरङ्गजेबेन सह युद्धं करणीयम्। इति विज्ञाय रावतत्नसिंहस्य मनः दोलायमानम् अभवत्। एकतः राज्ञीं प्रति अनुरक्तिः अपरतश्च क्षत्रियधर्मः। अन्ततः क्षत्रियधर्मं पालयन् युद्धाय निश्चयः कृतः। राज्ञी अपि स्वपतिं तिलकं कृत्वा रक्षासूत्रं बध्द्वा आरार्तिकम् अवतारयत्।

**568.** ''तस्य विवाहस्य द्वितीये तृतीये वा दिवसे'' इत्यत्र अव्ययपदं किम्?
(A) द्वितीय (B) वा
(C) तस्य (D) दिवसे

**569.** 'रक्षासूत्रम्'' इत्यस्मिन् पदे कः समासः ?
(A) तत्पुरुषः (B) अव्ययीभावः
(C) बहुव्रीहिः (D) द्वन्द्वः

**570.** ''अवतारयत्'' इत्यस्मिन् पदे मूलधातः कः?
(A) अव (B) अवतार
(C) तृ (D) अवतृ

**571.** ''पालयन्'' इत्यत्र कः प्रत्ययः?
(A) ल्युट् (B) तुमुन्
(C) शानच् (D) शतृ

**572.** ''युद्धाय'' इत्यत्र का विभक्ति?
(A) पञ्चमी (B) चतुर्थी
(C) तृतीया (D) द्वितीय

## निर्देश (प्रश्न संख्या 573 से 577 तक)

अधोलिखितम् अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेया

'भारतदेशः विश्वगुरुरासीत्' इति यदा वयं वदामः तदा प्रायशः जनानां मनसि भारतस्य आध्यात्मिकं स्वरूपमेव प्रकटितं भवति। तैः मन्यते यत् भारतं धर्म-दर्शन-तत्त्वज्ञान-खाद्यान्नादिपदार्थानां कारण ादेव विश्वगुरुः आसीत्। ते न जानन्ति यदं ज्ञान-विज्ञानदृष्ट्या अपि अस्माकं देशः विश्वस्य मार्गदर्शकः आसीत्।

**573.** ''भवति'' इत्यस्य विधिलिङ्लकारे रूपं भवति।
(A) भवतु (B) अभवत्
(C) भवेत् (D) भविष्यति

**574.** ''जानन्ति'' इति पदे मूलधातुः कः?
(A) जान् (B) ज्ञा
(C) जा (D) ज्ञान्

**575.** ''मार्गदर्शकः'' इत्यस्य पदस्य स्त्रीलिङ्गे रूपं भवति।
(A) मार्गदर्शिकी (B) मार्गदर्शकम्
(C) मार्गदर्शिनी (D) मार्गदर्शिका

**576.** ''धर्मः'' इति पदस्य विलोमशब्दः कः?
(A) प्रधर्मः (B) अतिधर्मः
(C) अधर्मः (D) सुधर्मः

**577.** ''तदा प्रायशः जनानां मनसि'' इत्यत्र बहुवचनान्तं पदं किम्?
(A) मनसि (B) जनानाम्
(C) प्रायशः (D) तदा

## निर्देश (प्रश्न संख्या 578 से 582 तक)

अधोलिखितम् अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेयाः—

अयं कविकुलगुरुः कदा कतम् जनपदमलङ्कतवान् स्वजन्मनेति विवादास्पदमद्यापि। तथापि अस्य ग्रन्थानां सूक्ष्मपरीक्षणेनेदं वक्तुं शक्यते यदेष महाकविः स्वजनुषा काश्मीरभुवमलंकार। अस्य कविवरस्य मेघदूते उज्जयिनीवर्णनेन कुमारसम्भवे च हिमालयवर्णनेन ज्ञायते यदयं प्रौढे वयसि उज्जयिनीं गतो भवेत्, तत्र च महीभुजो विक्रमाङ्कस्य सभायां प्रतिष्ठां लेभे, तरुणे च वयसि काशमीरानेवाधिजगाहे।

**578.** ''महीभुजो'' इति पदे का विभक्तिः?
(A) तृतीया (B) चतुर्थी
(C) षष्ठी (D) सप्तमी

**579.** ''महाकविः'' इत्यत्र कः समासः?
(A) बहुव्रीहिः (B) कर्मधारयः
(C) अव्ययीभावः (D) द्वन्द्वः

**580.** ''वक्तुम्'' इत्यत्र कः प्रत्ययः ?
(A) क्त्वा (B) तुम
(C) क्तुम् (D) तुमुन्

**581.** ''अद्यापि'' इति पदस्य सन्धिविच्छेदं कुरुत।
(A) अदि + आपि (B) अद् + यापि
(C) अद्य + अपि (D) अद्या + अपि

**582.** ''भवेत्'' इत्यत्र कः लकारः प्रयुक्तः ?
(A) लिट् लकारः (B) विधिलिङ्लकारः
(C) लट् लकारः (D) लुङ् लकारः

## निर्देश (प्रश्न संख्या 583 से 587 तक)

निम्नलिखितम् अपठितं गद्यांशं आधारीकृत्य व्याकरण सम्बन्धिनः प्रश्नाः समाधेयाः—

संस्कृतभाषा जगतः सर्वासु भाषासु प्राचीनतमा, सर्वोत्कृष्ट-साहित्यसंयुक्ता च वर्तते। अनन्तानन्तवर्षेषु व्यपगतेष्वपि अस्याः माधुर्यम्, उदारत्वं च नाद्यापि विकृतम्। पाश्चात्यदेशीया विचारशीलाः कोलहार्न-मैक्समूलर-मैकडानाल्ड-कीथादयः विद्वांसः संस्कृत-भाषायाः प्रशंसामकुर्वन्। सर्वासामार्यभाषाणाम् उत्पत्तिः अत एव बभूव। पुरा सर्वे जनाः संस्कृत-भाषयैवाभाषन्त। अतः सर्वमपि प्राक्तनं साहित्यं संस्कृतभाषायामेव उपलभ्यते। सर्वे प्राचीनतमाः ग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। वेदेषु मानवकर्त्तव्या–कर्तव्ययोः सम्यक् निर्धारणमस्ति। संस्कृतसाहित्यं भ. ारतस्य गौरवं उद्घोषयति। समस्तं देशं च एकतासूत्रे बध्नाति। अस्य साहित्यस्य प्रचारः प्रसारश्च नितान्तं लाभप्रदः एतज्ज्ञानविहीनस्तु पशुरेव।

**583.** 'जगतः' इत्यत्र का विभक्तिः ?
(A) प्रथमा (B) षष्ठी
(C) सप्तमी (D) तृतीया

**584.** 'व्यपगतेष्वपि' इत्यत्र कः सन्धिः ?
(A) यणसन्धिः (B) विसर्गसन्धिः
(C) वृद्धिसन्धिः (D) पररूपसन्धिः

**585.** 'विकृतम्' इत्यत्र कः प्रत्यय ?
(A) क्तवतुः (B) क्त्वा
(C) क्त (D) ण्वुल्

**586.** संस्कृतभाषायां कति वेदाः सन्ति ?
(A) सप्त (B) पञ्च
(C) दश (D) चत्वारः

**587.** 'एकतासूत्रे' इत्यत्र समासविग्रहः कः अस्ति ?
(A) एकतायाः सूत्रे (B) एकता सूत्रे
(C) एकताम् सूत्रे (D) एकस्मिन् सूत्रे

## निर्देश (प्रश्न संख्या 588 से 592 तक)

अधोलिखितं अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेयाः—

भारतवर्ष एकः महान् देशः वर्तते। अस्मिन् अनेके प्रदेशाः सन्ति। तेषु राजस्थानप्रदेशोऽपि एकः वर्तते। अयं प्रदेशः मूलतः विविधराज्ञां स्थली वर्तते। स्वतन्त्रताप्राप्तिपश्चात् तेषां एकीकरणम् अभवत्। अस्मिन् एकीकरणे पटेल महोदयस्य महत्वपूर्णभूमिका आसीत्। साम्प्रतं राजस्थानप्रदेशः एकं राज्यं वर्तते। अस्य राजधानी जयपुरम् अस्ति। राजस्थान-प्रदेशस्य

काश्चन एतादृश्यः विशेषताः सन्ति या खलु अन्यत्र न लभन्ते। अस्य प्रदेशस्य भूमिः वीराणां वीरांगनानां च जननी वर्तते। साम्प्रतं शिक्षाक्षेत्रे राजस्थानप्रदेशः उन्नतिपथमारूढो वर्तते। अत्र छात्राणां कृते उच्च शिक्षाया उत्तमा व्यवस्था वर्तते। अत्र अनेकानि रमणीयानि स्थानानि वर्तन्ते। अस्य प्रदेशस्य भाषा राजस्थानी वर्तते। अत्रत्या संस्कृतिः सर्वत्र प्रसिद्धा।

**588.** 'राज्ञाम्' इत्यत्र का विभक्तिः अस्ति ?
(A) सप्तमी बहुवचनम् (B) षष्ठी बहुवचनम्
(C) पञ्चमी बहुवचनम् (D) चतुर्थी बहुवचनम्

**589.** 'अभवत्' इति पदं कस्मिन् लकारे प्रयुक्तमस्ति ?
(A) लट्लकारे (B) लोट लकारे
(C) लङ्लकारे (D) विधिलिङ् लकारे

**590.** 'वीराणाम्' इत्यस्य विलोमशब्दः कः अस्ति ?
(A) वीरांगनानाम् (B) वीरान्
(C) वीराणिं (D) वीरेषु

**591.** 'छात्राणां कृते' इति पदस्य पर्याय अस्ति–
(A) छात्रेषु (B) छात्राय
(C) छात्रेण (D) छात्रान्

**592.** 'अत्र अनेकानिं रमणीयानि स्थानानि वर्तन्ते' वाक्यस्य लोट्लकारे परिवर्तितम् रूपम् अस्ति–
(A) अत्र अनेकानि रमणीयानि स्थानानि सन्ति
(B) अत्र अनेकानि रमणीयानि स्थानानि आसीत्
(C) अत्र अनेकानि रमणीयानि स्थानानि वर्तन्ताम्
(D) अत्र अनेकानि रमणीयानि स्थानानि भविष्यन्ति

**निर्देश (प्रश्न संख्या 593 से 597 तक)**
अधोलिखितम् अपठितम् गद्यांशम् आधारीकृत्य प्रश्नाः समाधेयाः–

मम विद्यालयः नगरस्य एकस्मिन् सुरम्ये स्थले स्थितः अस्ति। प्राङ्गणस्य मध्ये एकं सुन्दरम् उद्यानम् वर्तते। अत्र अध्यापकानां संख्या सप्ततिः छात्राणां च सहस्त्रद्वयं वर्तते। अध्यापकाः अतीव निपुणाः योग्याः च सन्ति। शिक्षाक्षेत्रे अस्य ख्यातिः समपूर्णदेशे अस्ति। अतः दूरतः पठनाय अत्र छात्राः प्रवेशं लभन्ते। क्रीडाक्षेत्रे सदा प्रमुखं स्थानं प्रप्नोति। अहं गर्वितः भाग्यशाली च यः एतादृशे अत्युत्तमे विद्यालये शिक्षां लभे।

**593.** 'मम' इत्यस्य का विभक्तिः ?
(A) प्रथमा (B) द्वितीया
(C) षष्ठी (D) पञ्चमी

**594.** 'शिक्षाक्षेत्रे' इत्यत्र समासविग्रहः अस्ति–
(A) शिक्षायाम् क्षेत्रे (B) शिक्षाम् क्षेत्रे
(C) शिक्षया क्षेत्रे (D) शिक्षायाः क्षेत्रे

**595.** 'स्थितः' इत्यत्र कः प्रत्ययः वर्तते ?
(A) स्था + क्तवतु प्रत्यय
(B) स्था + शतृ प्रत्यय
(C) स्था + क्त प्रत्यय
(D) स्थ् + इतः प्रत्यय

**596.** 'अत्युत्तमे' पदे सन्धिविच्छेदः करणीयः–
(A) अति + उत्तमे (B) अत्य + उत्तमे
(C) अति + त्तमे (D) अत्यु + त्तमे

**597.** 'प्राप्नोति' इत्यत्र कः धातुः अस्ति ?
(A) प्राप् धातु (B) प्रप् धातु
(C) प्रपन् धातु (D) आप् धातु

**निर्देश (प्रश्न संख्या 598 से 602 तक)**
अधोलिखितं अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेयाः

श्रवणकुमारः पितृभक्तः बालकः आसीत्। तस्य मातापितरौ नेत्रहीनौ आस्ताम्। सः सदा तयोः सेवां करोति स्म। एकदा श्रवणस्य पितरौ तम् अवदताम्–वत्स। आवां तीर्थयात्रां कर्तुम् इच्छावः। श्रवणकुमारः आज्ञाकारी पुत्रः आसीत्। सः पित्रोः आज्ञाम् अपालयत्। श्रवणकुमारः एकस्यां वहङ्गिकायां पितरौ उपावेशयत् अथ सः ताम् स्कन्धे धृत्वा तीर्थयात्रायै प्राचलत्।

**598.** 'मातापितरौ इत्यस्य समासविग्रहः अस्ति
(A) माता च पिता च
(B) मातु : पितरः
(C) मात्ता पितरौ
(D) मात्रो पितरो

**599.** 'धृत्वा' इत्यत्र कः प्रत्ययः प्रयुक्तः ?
(A) क्त (B) शानच्
(C) क्तवतु (D) क्त्वा

**600.** 'तीर्थयात्रायै' इत्यस्य का विभक्तिः ?
(A) षष्ठी (B) चतुर्थी
(C) पञ्चमी (D) तृतीया

**601.** 'अपालयत्' इत्यत्र लकारः अस्ति–
(A) लोट् लकार (B) लट् लकार
(C) लुङ् लकार (D) लङ् लकार

**602.** 'श्रवणकुमारः आज्ञाकारी पुत्रः आसीत्' अत्र विशेषणं अस्ति–
(A) श्रवणकुमारः (B) पुत्रः
(C) आज्ञाकारी (D) आसीत्

**निर्देश (प्रश्न संख्या 603 से 607 तक)**
अधोलिखितं अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेयाः

"भारतस्य उत्तरस्यां दिशि हिमालयो नाम नगाधिराजः वर्तते। स हिममण्डितैः दुर्गमैश्च निजशिखरैः प्रहरीव भारतस्य रक्षां करोति। दक्षिणदिशायां च हिन्दमहासागरः भारतमातुः चरण-प्रक्षालनं करोति। भारतदेशः कृषिप्रधानोऽस्ति। अस्य पर्वतेभ्यः निर्गता नद्यः निजपावनेन जलेन वसुन्धरां सस्यश्यामलां कुर्वन्ति। नदीषु गंगा पवित्रतमा वर्तते। अस्याः जलम् अमृत-तुल्यम् अस्ति। यमुनायाः जलमपि पवित्रं मन्यते।"

**603.** 'दिशि' इत्यस्मिन् पदे का विभक्तिः ? किम् वचनं च ?
(A) षष्ठी–एकवचनम्
(B) द्वितीया–एकवचनम्
(C) सप्तमी–द्विवचनम्
(D) सप्तमी–एकवचनम्

**604.** 'प्रहरीव' अत्र सन्धिविच्छेदं कुरुत–
(A) प्रहरी + इव (B) प्रह + रीव
(C) प्रहर + इव (D) प्र + हरीव

**605.** 'पवित्रतमा' इत्यत्र कः प्रत्ययः ?
(A) तरप् (B) तसिल्
(C) तमप् (D) तव्यत्

**606.** 'अस्ति' इति पदं लङ्लकारे परिवर्तयत–
(A) अत्ति (B) आसीत्
(C) स्तः (D) सन्ति

**607.** 'निर्गताः' इत्यत्र कः उपसर्गः ?
(A) निः (B) निस्
(C) नि (D) निर्

**निर्देश (प्रश्न संख्या 608 से 612 तक)**
प्रस्तुतं गद्यांशम् आधारीकृत्य प्रश्नाः समाधेयाः

भूलोके परमेश्वरः समस्तमपि भूतजातम् उद्योगनिरतं निर्मितवान्। तथा हि पृथ्वी चक्रवत् भ्रमति, वसन्तादीन् ऋतूंश्च चालयति। सूर्यो द्वादशराशिषु भ्रमन् जगत् प्रकाशयति। वायुः सर्वेषां जीवनं सञ्चारयति। जलं नदीनदादिभिः सेचनक्रियाभिः सस्यकार्यं करोति। सर्वमेतत् यत् भूतजातं स्वभावत एव उद्योगनिरतं वर्तते। सर्वेषामेव कार्याणां कृते उद्यमः परमावश्यकः। केवलेन मनोरथेन न कोऽपि जनः किमपि सिद्धि लभते। पुरुषार्थहीना जना न किमपि कर्तुं शक्ताः। पुरुषार्थं विना सकलोऽपि समाजः निष्क्रियः निरर्थकश्च भवेत्। उद्योगेन विना न कोऽपि सुखं प्राप्नोति। अनुद्योगः मानवस्य बलीयान् रिपुः सः खलु सदैव दुःखस्य कारणम्। उद्योगेनैव सर्वं सिध्यति, अनुद्योगेन च नश्यति।

**608.** 'निर्मितवान्' इत्यत्र कः प्रत्ययः ?
(A) शतृ (B) शानच्
(C) क्तवतु (D) ण्वुल्

**609.** 'नदीनदादिभिः इत्यत्र का विभक्तिः ?
(A) चतुर्थी बहुवचनम्
(B) तृतीया बहुवचनम्
(C) षष्ठी बहुवचनम्
(D) पञ्चमी बहुवचनम्

**610.** 'अनुद्योगः' इत्यत्र कः समासः ?
(A) बहुव्रीहिः (B) उपपदसमासः
(C) नञ् तत्पुरुषः (D) कर्मधारयः

**611.** 'सकलोऽपि' इत्यस्य संधिविच्छेदः करणीयः–
(A) सकलो + अपि (B) सकल + अपि
(C) सकलः + अपि (D) सकलो + पि

**612.** 'उद्योगेनैव' इत्यत्र कः संधिः अस्ति ?

(A) गुणसंधिः (B) वृद्धि संधिः
(C) यण् संधिः (D) पररूपसंधिः

**निर्देश (प्रश्न संख्या 613 से 619 तक)**

प्रस्तुतं गद्यांशं पठित्वा तदाधारित प्रश्नाम् उत्तराणि लेखनीयानि—

संस्कृतभाषा भारतीयभाषाणां जननी अस्ति। अनया भाषया सर्वाः प्रान्तीयभाषाः अनुप्राणिताः प्रभाविताः च सन्ति। इयं भाषा अतीव सरला मधुरा चास्ति। श्रुतिः स्मृतिः उपनिषतः पुराणं दर्शनम् अन्यानि च शास्त्राणि संस्कृते एवं रचितानि सन्ति। श्रुतयः चतस्तः सन्तिऋक्, यजुः साम, अथर्व इति। श्रुतीनामाशयं स्मृतयः प्रतिपादयन्ति। यद्यपि बह्व्यः स्मृतयः सन्ति तथापि मनुस्मृतिः याज्ञवल्क्यस्मृतिः चेति द्वे स्मृती प्रसिद्धे स्तः।

**613.** श्रुतीनामाशयं काः प्रतिपादयन्ति?
(A) वेदाः (B) स्मृतयः
(C) श्रुतयः (D) उपनिषदः

**614.** 'यद्यपि' इत्यत्र सन्धि–विच्छेदः कः ?
(A) यदि + आपि (B) यद् + अपि
(C) यदि + अपि (D) यदि + अपी

**615.** 'चतस्त्रः' इत्यस्य पदस्य पुल्लिंगे रूपं भवेत्।
(A) चत्वारि (B) चतुरः
(C) चतस्त्रः (D) चत्वारः

**616.** 'स्तः' इति पदं लङ् लकारे परिवर्तयत—
(A) आसीत् (B) आस्ताम्
(C) आसन् (D) आस्तम्

**617.** 'स्मृतिः' इत्यत्र कः प्रत्ययः?
(A) क्तिन् (B) विः
(C) तिप् (D) क्त

**618.** कति स्मृत्यः प्रसिद्धाः सन्ति?
(A) द्वौ (B) त्रयः
(C) द्वयम् (D) द्वे

**619.** 'स्मृति' इत्यस्मिन् पदे का विभक्तिः? किं वचनं चः?
(A) प्रथमा–एकवचनम् (B) द्वितीया–एकवचनम्
(C) प्रथमा–द्विवचनम् (D) द्वितीया–बहुवचनम्

**निर्देश (प्रश्न संख्या 620 से 626 तक)**

प्रस्तुतं गद्यांशं पठित्वा तदाधारित प्रश्नाम् उत्तराणि लेखनीयानि—

अथ का नाम संस्कृतिः? मनसः आत्मनः च संस्कारः परिष्कारः इति संस्कृतिः। संस्कृतिः मनः निर्मल करोति। विश्वसंस्कृतिषु भारतीय संस्कृतिः प्राचीनतमा। भारतीय संस्कृतेः आदर्शवाक्यानि सन्ति—'सर्वे भवन्तु सुखिनः', 'वसुधैव कुटुम्बकम्', 'आत्मवत् सर्वभूतेषु–, 'अहिंसा परमोधर्मः', 'मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्' इत्यादीनि। भारतीय संस्कृतिः धर्मप्रधाना, वर्णाश्रम–व्यवस्थायुक्ता चास्ति। कर्मफलं, पुनर्जन्म, मोक्षवादः च अस्याः प्रमुखाः सिद्धान्ताः सन्ति। सत्यस्य, त्यागस्य, अहिंसायाः च अन्न महत्वं वर्तते। विश्वहितस्य मूलभूताः भावनाः भारतीयसंस्कृतौ उपलभ्यन्ते।

**620.** सर्वभूतेषु कीदृशः व्यवहारः करणीयः?
(A) मार्तृवत् (B) आत्मवत्
(C) पितृवत् (D) लोष्ठवत्

**621.** 'वसुधैव' इत्यत्र सन्धि–विच्छेदः कार्यः—
(A) वसुधा + इव (B) वसुधा + ऐव
(C) वसुधा + एव (D) वसुधा + ईव

**622.** 'लोष्ठवत्' व्यवहारः कुत्र प्रदर्शनीयः?
(A) परदारेषु (B) सर्वभूतेषु
(C) परद्रव्येषु (D) सर्वत्र

**623.** 'महत्त्वम्' इत्यत्र कः प्रत्ययः?
(A) तमप् (B) सम्
(C) सु (D) त्व

**624.** 'संस्कृतिः' इत्यत्र कः उपसर्ग?
(A) सह (B) सम्
(C) सु (D) सः

**625.** 'कर्मफलम्' इत्यत्र कः समासः ?
(A) तत्पुरुषः (B) कर्मधारयः
(C) बहुव्रीहिः (D) द्वन्द्वः

**626.** "संस्कृतिः मनः निर्मलः करोति" वाक्यमिंद लङ् लकारे परिवर्तयत—
(A) संस्कृति मनः निर्मल करिष्यति
(B) संस्कृति मनः निर्मलम् अकरोत्
(C) संस्कृतिः मनः निर्मलं कुर्यात्
(D) संस्कृतिः मन' निर्मलम अकुरुत

## उत्तरमाला

| | | | | |
|---|---|---|---|---|
| **1.** (D) | **2.** (B) | **3.** (A) | **4.** (C) | **5.** (D) |
| **6.** (C) | **7.** (B) | **8.** (A) | **9.** (A) | **10.** (C) |
| **11.** (C) | **12.** (D) | **13.** (C) | **14.** (D) | **15.** (C) |
| **16.** (D) | **17.** (D) | **18.** (A) | **19.** (D) | **20.** (D) |
| **21.** (A) | **22.** (C) | **23.** (D) | **24.** (A) | **25.** (A) |
| **26.** (D) | **27.** (D) | **28.** (C) | **29.** (B) | **30.** (B) |
| **31.** (B) | **32.** (A) | **33.** (D) | **34.** (B) | **35.** (C) |
| **36.** (C) | **37.** (D) | **38.** (A) | **39.** (A) | **40.** (A) |
| **41.** (C) | **42.** (D) | **43.** (A) | **44.** (C) | **45.** (C) |
| **46.** (A) | **47.** (D) | **48.** (C) | **49.** (B) | **50.** (B) |
| **51.** (B) | **52.** (A) | **53.** (C) | **54.** (D) | **55.** (D) |
| **56.** (A) | **57.** (C) | **58.** (D) | **59.** (D) | **60.** (C) |
| **61.** (D) | **62.** (A) | **63.** (C) | **64.** (A) | **65.** (A) |
| **66.** (A) | **67.** (C) | **68.** (B) | **69.** (C) | **70.** (C) |
| **71.** (A) | **72.** (C) | **73.** (A) | **74.** (D) | **75.** (D) |
| **76.** (A) | **77.** (C) | **78.** (A) | **79.** (A) | **80.** (B) |
| **81.** (C) | **82.** (D) | **83.** (B) | **84.** (B) | **85.** (A) |
| **86.** (A) | **87.** (A) | **88.** (C) | **89.** (B) | **90.** (C) |
| **91.** (C) | **92.** (D) | **93.** (B) | **94.** (B) | **95.** (A) |
| **96.** (C) | **97.** (A) | **98.** (C) | **99.** **(B)** | **100.** (D) |
| **101.** (A) | **102.** (C) | **103.** (B) | **104.** (A) | **105.** (B) |
| **106.** (A) | **107.** (A) | **108.** (D) | **109.** (C) | **110.** (D) |
| **111.** (A) | **112.** (B) | **113.** (D) | **114.** (A) | **115.** (B) |
| **116.** (A) | **117.** (D) | **118.** (C) | **119.** (D) | **120.** (A) |
| **121.** (C) | **122.** (D) | **123.** (C) | **124.** (B) | **125.** (D) |
| **126.** (B) | **127.** (B) | **128.** (D) | **129.** (C) | **130.** (A) |
| **131.** (A) | **132.** (D) | **133.** (B) | **134.** (B) | **135.** (D) |
| **136.** (B) | **137.** (A) | **138.** (A) | **139.** (B) | **140.** (A) |
| **141.** (D) | **142.** (B) | **143.** (A) | **144.** (B) | **145.** (A) |
| **146.** (A) | **147.** (D) | **148.** (D) | **149.** (A) | **150.** (C) |
| **151.** (D) | **152.** (A) | **153.** (C) | **154.** (B) | **155.** (A) |
| **156.** (D) | **157.** (D) | **158.** (A) | **159.** (B) | **160.** (C) |
| **161.** (D) | **162.** (B) | **163.** (C) | **164.** (B) | **165.** (C) |
| **166.** (C) | **167.** (A) | **168.** (B) | **169.** (A) | **170.** (B) |
| **171.** (A) | **172.** (A) | **173.** (A) | **174.** (C) | **175.** (D) |
| **176.** (D) | **177.** (C) | **178.** (C) | **179.** (A) | **180.** (B) |
| **181.** (B) | **182.** (C) | **183.** (A) | **184.** (B) | **185.** (A) |
| **186.** (D) | **187.** (D) | **188.** (C) | **189.** (D) | **190.** (D) |
| **191.** (B) | **192.** (A) | **193.** (D) | **194.** (A) | **195.** (C) |
| **196.** (D) | **197.** (C) | **198.** (D) | **199.** (D) | **200.** (A) |
| **201.** (A) | **202.** (B) | **203.** (B) | **204.** (A) | **205.** (A) |
| **206.** (D) | **207.** (A) | **208.** (A) | **209.** (B) | **210.** (A) |
| **211.** (A) | **212.** (D) | **213.** (A) | **214.** (C) | **215.** (C) |
| **216.** (C) | **217.** (C) | **218.** (C) | **219.** (C) | **220.** (D) |
| **221.** (A) | **222.** (C) | **223.** (A) | **224.** (C) | **225.** (A) |
| **226.** (B) | **227.** (C) | **228.** (D) | **229.** (B) | **230.** (B) |
| **231.** (B) | **232.** (D) | **233.** (B) | **234.** (A) | **235.** (C) |
| **236.** (D) | **237.** (B) | **238.** (D) | **239.** (B) | **240.** (D) |
| **241.** (A) | **242.** (D) | **243.** (D) | **244.** (C) | **245.** (A) |
| **246.** (D) | **247.** (D) | **248.** (D) | **249.** (C) | **250.** (C) |
| **251.** (D) | **252.** (C) | **253.** (D) | **254.** (C) | **255.** (A) |
| **256.** (C) | **257.** (B) | **258.** (D) | **259.** (C) | **260.** (B) |
| **261.** (B) | **262.** (C) | **263.** (C) | **264.** (D) | **265.** (B) |
| **266.** (D) | **267.** (A) | **268.** (B) | **269.** (A) | **270.** (C) |
| **271.** (C) | **272.** (A) | **273.** (D) | **274.** (C) | **275.** (B) |
| **276.** (C) | **277.** (C) | **278.** (D) | **279.** (D) | **280.** (A) |
| **281.** (C) | **282.** (D) | **283.** (D) | **284.** (A) | **285.** (A) |
| **286.** (C) | **287.** (B) | **288.** (A) | **289.** (D) | **290.** (D) |
| **291.** (B) | **292.** (B) | **293.** (C) | **294.** (D) | **295.** (C) |
| **296.** (B) | **297.** (C) | **298.** (A) | **299.** (B) | **300.** (A) |
| **301.** (D) | **302.** (C) | **303.** (C) | **304.** (B) | **305.** (C) |
| **306.** (A) | **307.** (D) | **308.** (A) | **309.** (B) | **310.** (A) |
| **311.** (B) | **312.** (C) | **313.** (C) | **314.** (D) | **315.** (C) |
| **316.** (C) | **317.** (C) | **318.** (C) | **319.** (A) | **320.** (A) |
| **321.** (A) | **322.** (B) | **323.** (D) | **324.** (A) | **325.** (D) |
| **326.** (B) | **327.** (D) | **328.** (D) | **329.** (A) | **330.** (D) |
| **331.** (D) | **332.** (B) | **333.** (A) | **234.** (B) | **335.** (A) |
| **336.** (D) | **337.** (D) | **338.** (D) | **339.** (B) | **340.** (D) |
| **341.** (A) | **342.** (A) | **343.** (B) | **344.** (B) | **345.** (D) |
| **346.** (D) | **347.** (B) | **348.** (B) | **349.** (D) | **350.** (B) |
| **351.** (B) | **352.** (C) | **353.** (B) | **354.** (C) | **355.** (D) |
| **356.** (A) | **357.** (B) | **358.** (C) | **359.** (C) | **360.** (B) |
| **361.** (D) | **362.** (D) | **363.** (A) | **364.** (B) | **365.** (A) |
| **366.** (D) | **367.** (C) | **368.** (C) | **369.** (D) | **370.** (C) |
| **371.** (B) | **372.** (D) | **373.** (D) | **374.** (A) | **375.** (C) |
| **376.** (B) | **377.** (A) | **378.** (D) | **379.** (B) | **380.** (D) |
| **381.** (C) | **382.** (A) | **383.** (C) | **384.** (B) | **385.** (D) |
| **386.** (A) | **387.** (B) | **388.** (D) | **389.** (C) | **390.** (B) |
| **391.** (A) | **392.** (C) | **393.** (D) | **394.** (B) | **395.** (D) |
| **396.** (C) | **397.** (A) | **398.** (A) | **399.** (D) | **400.** (A) |
| **401.** (A) | **402.** (A) | **403.** (A) | **404.** (C) | **405.** (C) |
| **406.** (A) | **407.** (D) | **408.** (D) | **409.** (A) | **410.** (B) |
| **411.** (C) | **412.** (A) | **413.** (D) | **414.** (A) | **415.** (B) |
| **416.** (D) | **417.** (A) | **418.** (A) | **419.** (C) | **420.** (B) |
| **421.** (D) | **422.** (D) | **423.** (C) | **424.** (A) | **425.** (C) |
| **426.** (C) | **427.** (B) | **428.** (D) | **429.** (B) | **430.** (A) |
| **431.** (A) | **432.** (D) | **433.** (C) | **434.** (A) | **435.** (D) |
| **436.** (B) | **437.** (C) | **438.** (B) | **439.** (A) | **440.** (C) |
| **441.** (D) | **442.** (D) | **443.** (B) | **444.** (A) | **445.** (A) |
| **446.** (B) | **447.** (B) | **448.** (A) | **449.** (C) | **450.** (C) |

**451.** (A) **452.** (C) **453.** (A) **454.** (A) **455.** (C)
**456.** (C) **457.** (B) **458.** (C) **459.** (B) **460.** (A)
**461.** (D) **462.** (B) **463.** (B) **464.** (D) **465.** (D)
**466.** (D) **467.** (B) **468.** (B) **469.** (C) **470.** (A)
**471.** (C) **472.** (D) **473.** (D) **474.** (A) **475.** (A)
**476.** (C) **477.** (C) **478.** (A) **479.** (C) **480.** (B)
**481.** (C) **482.** (C) **483.** (C) **484.** (C) **485.** (B)
**486.** (A) **487.** (D) **488.** (B) **489.** (B) **490.** (A)
**491.** (B) **492.** (A) **493.** (A) **494.** (A) **495.** (D)
**496.** (B) **497.** (A) **498.** (A) **499.** (A) **500.** (D)
**501.** (A) **502.** (C) **503.** (B) **504.** (D) **505.** (A)
**506.** (B) **507.** (A) **508.** (A) **509.** (B) **510.** (D)
**511.** (A) **512.** (B) **513.** (B) **514.** (D) **515.** (B)
**516.** (C) **517.** (C) **518.** (D) **519.** (C) **520.** (B)
**521.** (B) **522.** (D) **523.** (C) **524.** (B) **525.** (B)
**526.** (D) **527.** (A) **528.** (B) **529.** (A) **530.** (A)
**531.** (D) **532.** (B) **533.** (C) **534.** (D) **535.** (D)
**536.** (A) **537.** (C) **538.** (A) **539.** (B) **540.** (A)
**541.** (D) **542.** (C) **543.** (A) **544.** (B) **545.** (A)
**546.** (C) **547.** (A) **548.** (D) **549.** (B) **550.** (A)
**551.** (C) **552.** (B) **553.** (A) **554.** (C) **555.** (D)
**556.** (C) **557.** (A) **558.** (B) **559.** (C) **560.** (D)
**561.** (A) **562.** (B) **563.** (B) **564.** (A) **565.** (C)
**566.** (B) **567.** (C) **568.** (B) **569.** (A) **570.** (C)
**571.** (D) **572.** (B) **573.** (C) **574.** (B) **575.** (D)
**576.** (C) **577.** (B) **578.** (C) **579.** (B) **580.** (D)
**581.** (C) **582.** (B) **583.** (B) **584.** (A) **585.** (C)
**586.** (D) **587.** (A) **588.** (B) **589.** (C) **590.** (A)
**591.** (B) **592.** (C) **593.** (C) **594.** (D) **595.** (C)
**596.** (A) **597.** (D) **598.** (A) **599.** (D) **600.** (B)
**601.** (D) **602.** (C) **603.** (D) **604.** (A) **605.** (C)
**606.** (B) **607.** (D) **608.** (C) **609.** (B) **610.** (C)
**611.** (A) **612.** (B) **613.** (B) **614.** (C) **615.** (D)
**616.** (B) **617.** (A) **618.** (D) **619.** (C) **620.** (B)
**621.** (C) **622.** (C) **623.** (D) **624.** (B) **625.** (A)
**626.** (B)

❑❑